इतिश्रीमहाभारतेआदिपर्वणिअस्त्रदर्शनंसमाप्तम् ५२ वैशं ततःसंवत्सरस्यांतेयौवराज्या
यपार्थिव।स्थापितोधृतराष्ट्रेणपांडुपुत्रोयुधिष्ठिरः।पितुरंतर्दधेकीर्तिंशीलवृत्तसमाधिभिः।असियु
द्धेगदायुद्धेरथयुद्धेचपांडवः।संकर्षणादशिक्षद्वैशश्वच्छिक्षांवृकोदरः।समाप्तशिक्षोभीमस्तुद्युमत्सेन
समोबले।पराक्रमेणसंपन्नोभ्रातृणामचरद्वशे।प्रगाढदृढमुष्टित्वेलाघवेवेधनेतथा।क्षुरनाराचभल्ला
नांविपाठानांचभारत।ऋजुवक्रविशालानांप्रयोक्ताफाल्गुनोभवत्।लाघवेसौष्ठवेचैवनान्यःकश्चनवि
द्यते।बीभत्सुसदृशोलोकेइतिद्रोणोव्यवस्थितः।ततोब्रवीद्गुडाकेशंद्रोणःकौरवसंसदि।अगस्त्यस्य
धनुर्वेदेशिष्योममगुरुःपुरा।अग्निवेश्यइतिख्यातस्तस्यशिष्योस्मिभारत।तीर्थात्तीर्थंगमयितुमहमे
तत्समुद्यतः।तपसायन्मयाप्राप्तममोघमशनिप्रभं।अस्त्रंब्रह्मशिरोनामयद्दहेत्पृथिवीमपि।ददता
गुरुणाचोक्तंनमनुष्येष्विदंत्वया।भारद्वाजविमोक्तव्यमल्पवीर्येष्वपिप्रभो।यत्त्वयाप्तमिदंवीरदिव्यंनान्यो
र्हतित्विदं।समयस्तुत्वयारक्ष्योमुनिसृष्टोविशांपते।आचार्यदक्षिणांदेहिज्ञातिग्रामस्यपश्यतः।दद
नीतिप्रतिज्ञातेफाल्गुनेनाब्रवीद्गुरुः।युद्धेहंप्रतियोद्धव्योयुध्यमानस्त्वयानघ।तथेतिचप्रतिज्ञायद्रोण

आ०प० २२७

यः कुरुपुंगवः।उपसंगृह्यचरणौसंप्रायादुत्तरांदिशं।सभावादगमद्वीपंमहींसागरमेखलां।अर्जुन
स्यसमोलोकेनास्तिकश्चिद्धनुर्धरः।गदायुद्धेसियुद्धेचरथयुद्धेचपांडवः।पारगश्चधनुर्युद्धेबभूवाथ
धनंजयः।नीतिमान्सकलांनीतिंविबुधाधिपतेस्तदा।अवाप्यसहदेवोपिभ्रातॄणांववृतेवशे।द्रोणेनैवंवि
नीतश्चभ्रातॄणांनकुलःप्रियः।चित्रयोधीसमाख्यातोबभूवातिरथोदितः।त्रिवर्षकृतयज्ञस्तुगंधर्वाणा
मुपप्लवे।अर्जुनःप्रमुखैःपार्थैःसौवीरःसमरेहतः।नशशाकवशेकर्तुंयंपांडुरपिवीर्यवान्।सोर्जुने
नवशंनीतोराजासीद्यवनाधिपः।अतीवबलसम्पन्नःसदामानीकुरून्प्रति।विपुलोनामसौवीरःश
स्तःपार्थेनधीमता।दत्तामित्रमितिख्यातंसंग्रामेकृतनिश्चयं।सुमित्रंनामसौवीरमर्जुनोदमयच्छरैः।भी
मसेनसहायश्चरथानामयुतंचसः।अर्जुनःसमरेप्राच्यान्सर्वानेकरथोजयत्।तथैवैकरथोगत्वाद २२७
क्षिणामजयद्दिशं।धनौघंप्रापयामासकुरुराष्ट्रंधनंजयः।एवंसर्वेमहात्मानःपांडवामनुजोत्तमाः।पर
राष्ट्राणिनिर्जित्यस्वराष्ट्रंववृधुःपुरा।ततोबलमतिख्यातंविज्ञायदृढधन्विनां।दूषितःसहसाभावोधृतरा
ष्ट्रस्यपांडुषु।सचिन्तापरमोराजाननिद्रामलभन्निशि इत्यादिपर्वणि १३३ वैशम् ॥

श्रुत्वापांडुसुतान्वीरान्बलोद्रिक्तान्महौजसः।धृतराष्ट्रोमहीपालश्चिंतामगमदातुरः।ततआहूयमंत्र
ज्ञंराजशास्त्रार्थवित्तमं।कणिकंमंत्रिणांश्रेष्ठंधृतराष्ट्रोब्रवीद्वचः॥ धृतराष्ट्रउ ॥उत्सिक्ताःपां
डवानित्यंतेभ्योसूयेद्विजोत्तम।तत्रमेनिश्चिततमंसंधिविग्रहकारणं।कणिकत्वंममाचक्ष्वकरिष्ये
हंवचस्तव वैशं सप्रसन्नमनास्तेनपरिपृष्टोद्विजोत्तमः।उवाचवचनंतीक्ष्णंराजशास्त्रनिदर्शनं
॥ कणिकउ ॥ शृणुराजन्निदंतत्रप्रोच्यमानंमयानघ।नमेभ्यसूयाकर्त्तव्याश्रुत्वैतत्कुरुसत्त
म।नित्यमुद्यतदंडःस्यान्नित्यंविवृतपौरुषः।अछिद्रःछिद्रदर्शीस्यात्परेषांविवरानुगः।नित्यमुद्यतदंडा
द्धिभृशमुद्विजतेजनः।तस्मात्सर्वाणिकार्याणिदंडेनैवविधारयेत्।नास्यछिद्रंपरःपश्येच्छिद्रेणपरमन्वि
यात्।गूहेत्कूर्मइवांगानिरक्षेद्विवरमात्मनः।नासम्यक्कृतकारीस्यादुपक्रम्यकदाचन।कंटकोह्यपिदुः
छिन्नआस्रावंजनयेच्चिरं।वधमेवप्रशंसंतिशत्रूणामपकारिणां।सुविदीर्णंसुविक्रांतंसुयुद्धंसुपला
यिनं।आपद्यापदिकालेचकुर्वीतनविचारयेत्।नावज्ञेयोरिपुस्तातदुर्बलोपिकथंचन।अल्पोप्यग्नि
र्वनंकृत्स्नंदहत्याश्रयसंश्रयात्।अंधःस्यादंधवेलायांबाधिर्यमपिचाश्रयेत्।कुर्यात्तृणमयंचापंश

यीनमृगशायिकां। सांत्वादिभिरुपायैस्तु हन्याच्छत्रुं वशे स्थिते। दयानतस्मिन्कर्त्तव्या शरणागत इत्यु
त। निरुद्विग्नोहि भवति न हताज्जायते भयं। हन्यादमित्रं दानेन तथा पूर्वापकारिणं। हन्यात्त्रीन्पंचस
प्तेति परपक्षस्य सर्वशः। मूलमेवादितश्छिंद्यात्परपक्षस्य नित्यशः। ततः सहायांस्तत्पक्षान्सर्वांश्च
तदनंतरं। छिन्नमूले ह्यधिष्ठाने सर्वे तज्जीविनो हताः। कथं तु शाखास्तिष्ठेरं छिन्नमूले वनस्पतौ।
एकाग्रः स्याद्विवृतो नित्यं विवरदर्शकः। राजन्राज्यसपत्नेषु नित्योद्विग्नः समाचरेत्। अग्न्याधानेन
यज्ञेन काषायेन जटाजिनैः। लोकान्विश्वासयित्वैव ततो लुंपेद्यथा वृकः। अंकुशं शौचमित्याहुर
र्थानामुपधारणे। आनाम्य फलिनीं शाखां पक्वं पक्वं प्रशातयेत्। फलार्थोयं समारंभो लोके पुंसां विप
श्चितां। वहेदमित्रं स्कंधेन यावत्कालस्य पर्ययः। ततः प्रत्यागते काले भिंद्याद्घटमिवाश्मनि। अमित्रो
न विमोक्तव्यः कृपणं बह्वपि ब्रुवन्। कृपा न तस्मिन्कर्त्तव्या हन्यादेवापकारिणं। हन्यादमित्रं सांत्वेन त
था दानेन वा पुनः। तथैव भेददंडाभ्यां सर्वोपायैः प्रशांतयेत्॥ धृतराष्ट्र उ ॥ कथं सांत्वेन दानेन
भेदैर्दंडेन वा पुनः। अमित्रं शक्यते हंतुं तन्मे ब्रूहि यथातथं कणिक उ शृणु राजन्यथावृत्तं व

नेनिवसतःपुरा।जंबुकस्यमहाराजनीतिशास्त्रार्थदर्शिनः।अथकश्चित्कृतप्रज्ञःशृगालःस्वार्थपं
डितः।सखिभिर्न्यवसत्सार्द्धंव्याघ्राखुवृकबभ्रुभिः।तेपश्यन्विपिनेतस्मिन्बलिनंमृगयूथपं।अश
क्याग्रहणेतस्यततोमंत्रममंत्रयन्॥ जंबुकउ ॥असकृद्यतितोह्येषहंतुंव्याघ्रवनेत्वया।युवा
वेजवसम्पन्नोबुद्धिशालीनशक्यते।मूषिकोस्यशयानस्यचरणौभक्षयत्वयं।अथैनंभक्षितैःपादै
र्गृहंव्याघ्रोवधीत्तदा।दृष्ट्वैवचेष्टमानंतुभूमौमृगकलेवरं।स्नात्वागछतभद्रंवोरक्षामीत्याहजंबुकः
।शृगालवचनात्तेपिगताःसर्वेनदींततः।सचिंतापरमोभूत्वानतस्थौतत्रैवजंबुकः।अथाजगामप्र
र्वंतुस्नात्वाव्याघ्रोमहाबलः।ददर्शजंबुकंचैवचिंताकुलितमानसं व्याघ्रउ किंशोचसिमहा
प्राज्ञत्वन्नोबुद्धिमतांवरः।अशित्वापिशितान्यद्यविहरिष्यामहेवयं जंबुकउ शृणुमेत्वंमहा
बाहोयद्वाक्यंमूषिकोऽब्रवीत्।धिग्बलंमृगराजस्यमयाद्यायंमृगोहतः॥।मद्बाहुबलमाश्रित्यतृप्तिम
द्यगमिष्यति।गर्जमानस्यतस्यैवमतोभक्ष्यंनरोचये व्याघ्रउवाच ब्रवीतियदिसह्येवंकाले
लस्मिन्प्रबोधितः।स्वबाहुबलमाश्रित्यहनिष्येहंवनेचरान्।खादिष्येतत्रमांसानिइत्युक्त्वाप्रस्थितो

श्री०प्र० २२९

यनं।एतस्मिन्नेवकालेतुमूषिकोप्याजगाममहातमागतमभिप्रेक्ष्यश्रृगालोप्यब्रवीद्वचः॥ जंबुकउ ॥
शृणुमूषिकभद्रंतेनकुलोयदिहाब्रवीत्।मृगमांसंनखादेयंशवमेतन्नरोचते।मूषिकंभक्षयिष्यामितद्भवाननुमन्यतां।तच्छ्रुत्वामूषिकोवाक्यंसंत्रस्तःप्रगतोबिलं।ततःस्नात्वासवैतत्रआजगामवृकोनृपातमागतंमृगंवाक्यमब्रवीज्जंबुकस्तथा।मृगराजोहिसंक्रुद्धोनतेसाधुभविष्यति।सकलत्रस्त्विहायातिकुरुष्वयदनंतरं।एवंसंचोदितस्तेनजंबुकेनतदावृकः।ततोवल्लुपनंकृत्वाप्रयातःपिशिताशनः।एतस्मिन्नेवकालेतुनकुलोप्याजगाममहातमुवाचमहाराजनकुलंजंबुकोवने।स्वबाहुबलमाश्रित्यनिर्जितास्तेन्यतोगताः।ममदत्वानियुद्धंत्वंभुंक्ष्वमांसंयथेप्सितं नकुलउ मृगराजोवृकश्चैवबुद्धिमानपिमूषिकः।निर्जितायत्त्वयावीरास्तस्माद्वीरतरोभवान्।नत्वयाप्युत्सहेयोद्धुमित्युक्त्वासोप्यपागमत् क
लिकउ एवंतेषुप्रयातेषुजंबुकोहृष्टमानसः।खादतिस्मतदामांसमेकःसन्मंत्रनिश्चयात्।एवंसमाचरन्नित्यंसुखमेधेतभूपतिः।भयेनभेदयेच्छूरंशूरमंजलिकर्मणा।लुब्धमर्थप्रदानेनसमंन्यूनंतथौजसा।एवंतेकथितंराजन्छृणुचाप्यपरंतथा।पुत्रःसखावाभ्रातावापितावायदिवागुरुः।रिपुस्थाने

२२९

षुवर्त्तेतः हन्याम्रूनिमित्ततासपथेनाप्यरिं हन्यादर्थदानेनवापुनः। विषेणमाययावापिनोपेक्षेतक
थंचन। उभौतेसंशयोपेतौ श्रद्धावांस्तत्रवर्द्धते। गुरोरप्यवलिप्तस्यकार्याकार्यमजानतः। उत्पथप्रति
प्रतिपन्नस्यन्यायंभवतिशासनं। क्रुद्धोप्यक्रुद्धरूपःस्यात्स्मितपूर्वाभिभाषिता। नचाप्यन्यमपध्वंसेत्क
दाचित्कोपसंयुतः। प्रहरिष्यन्प्रियंब्रूयात्प्रहरन्नपिभारत। प्रहृत्यचकृपायीतशोचेतचरुदेतच। आ
श्वासयेच्चापिपरंसांत्वधर्मार्ज्जववृत्तिभिः। अथास्यप्रहरेत्कालेयदाविचलितेपथि। अपिघोरापराधस्य
धर्ममाश्रित्यतिष्ठतः। सहिप्रच्छाद्यतेदोषःशैलोमेघैरिवासितैः। यःस्यादनुप्राप्तवधस्तस्यागारंप्रदीपये
त्। अधनान्नास्तिकांश्चौरांश्विषयेस्वेनवासयेत्। प्रत्युत्थानासनाद्येनसंप्रदानेनकेनचित्। प्रतिविश्रब्ध
घातीस्यात्तीक्ष्णदंष्ट्रोनिमग्नकः। अशंकितेभ्यःशंकेतशंकितेभ्यश्चसर्वशः। अशंक्याद्भयमुत्पन्नमपिमू
लंनिकृन्तति। चारःसुविहितःकार्यआत्मनश्चपरस्यच। पाखंडांस्तापसादींश्चपरराष्ट्रेषुयोजयेत्। उद्या
नेषुविवाहेषुदेवतायतनेषुच। पानागारेषुरथ्यासुसर्वतीर्थेषुवाप्यथ। चत्वरेषुचकूपेषुपर्वतेषुवने
षुच। समवायेषुसर्वेषुसरित्सुचविचारयेत्। वाचाभृशंविनीतःस्याद्धृदयेनतथाक्षुरः। स्मितपूर्वाभिभा

बीस्यात्स्पष्टे रौद्रेणकर्म्मणा। अंजलिं शपथं सांत्वं शिरसा पादवंदनं। आशाकरणमित्येवं कर्त्तव्यं भूतिमिछ
ता। सुपुष्पितः स्यादफलः फलवान्स्याद्दुरारुहः। आमः स्यात्पक्वसंकाशो नच जीर्य्येत कर्हिचित्। त्रिवर्गे त्रि
विधा पीडा ह्यनुबंधस्तथैव च। अनुबंधाः शुभा ज्ञेयाः पीडास्तु परिवर्जयेत्। धर्मं विचरतः पीडा सापि द्वाभ्यां
नियछति। अर्थः स्यादर्थलुब्धस्य कामश्चातिप्रवर्त्तिनः। अगर्वितात्मा युक्तश्च सांत्वयुक्तो नसूयिता। अ
वेक्षितार्थः शुद्धात्मा मंत्रयीत द्विजैः सह। कर्मणा येन तेनैव मृदुना दारुणेन च। उद्धरेद्दीनमात्मानं समर्थो
धर्ममाचरेत्। न संशयमनारुह्य नरो भद्राणि पश्यति। संशयं पुनरारुह्य यदि जीवति पश्यति। यस्य बु
द्धिः परिभवेत्तमतीतेन सांत्वयेत्। अनागतेन दुर्बुद्धिं प्रत्युत्पन्नेन पंडितं। योरिणा सह संधाय शयीत कृ
तकृत्यवत्। स वृक्षाग्रे यथा सुप्तः पतितः प्रतिबुध्यते। मंत्रसंवरणे यत्नः सदाकार्य्यो नसूयता। आकार
मभिरक्षेत चारेणाप्यनुपालितः। नाछित्वा परमर्म्माणि नाकृत्वा कर्म्म दारुणं। नाहत्वा मत्स्यघातीव प्राप्नो
ति महतीं श्रियं। कर्षितं व्याधितं क्लिन्नमपानीयमघासकं। परिविश्वस्तमंदं च प्रहर्त्तव्यमरेर्बलं। नार्थिको
र्थिनमभ्येति कृतार्थे नास्ति संगतं। तस्मात्सर्वाणि साध्यानि सावशेषाणि कारयेत्। संग्रहे विग्रहे चैव यत्नः

कार्य्येण स्मयता। उत्साहश्चापि यत्नेन कर्त्तव्यो भूतिमिच्छता। नासम्यक्कृत्यानि कुर्व्वेरन्मित्राणि रिपवस्तथा।
आरब्धान्येव पश्येरन्सुपर्य्यवसितान्यपि। भीतवत्संविधातव्यं यावद्भयमनागतं। आगतं तु भयं दृष्ट्वा
प्रहर्त्तव्यमभीतवत्। दंडेनोपनतं शत्रुमनुगृह्णाति यो नरः। स मृत्युमुपगृह्णीयाद्गर्भमश्वतरी यथा। अ
नागतं हि बुध्येत यच्च कार्य्यं पुरः स्थितं। न तु बुद्धिक्षयात्किंचिदतिक्रामेत्प्रयोजनं। उत्साहश्चापि यत्नेन
कर्त्तव्यो भूतिमिच्छता। विभज्य देशकालौ च दैवं धर्म्मादयस्त्रयः। नैश्रेयसौ तु तौ ज्ञेयौ देशकालाविति
स्थितिः। तालवत्कुरुते मूलं बालः शत्रुरुपेक्षितः। गहनेऽग्निरिवोत्सृष्टः क्षिप्रं संजायते महान्। अग्निं
स्तोकमिवात्मानं संधुक्षयति यो नरः। स वर्द्धमानो ग्रसते महान्तमपि संचयं। आशां कालवतीं कुर्य्यात्
कालं विघ्नेन योजयेत्। विघ्नं निमित्ततो ब्रूयान्निमित्तं वापि हेतुतः। क्षुरो भूत्वा हरेत्प्राणान्निशितः काल
साधनः। प्रतिच्छन्नो लोमहारी द्विषतां परिवर्त्तनः। पांडवेषु यथान्यायमन्येषु च कुरूद्वह। वर्त्तमानो नम
ज्जेस्त्वं तथा कृत्यं समाचर। सर्वकल्याणसम्पन्नो विशिष्ट इति निश्चयः। तस्मात्त्वं पांडुपुत्रेभ्यो रक्षा
त्मानं नराधिप। भ्रातृव्या बलिनो यस्मात्पांडुपुत्रा नराधिप। पश्चात्तापो यथा न स्यात्तथा नीतिर्विधीय

तां ॥ वैशं ॥ एवमुक्त्वा संप्रतस्थे कणिकः स्वगृहं ततः। धृतराष्ट्रोपि कौरव्यः शोकार्त्तः समपद्यत
॥ इत्यादिपर्व्वणि १३४ वैशं ॥ ततः सुबलपुत्रस्तु राजा दुर्य्योधनश्च ह। दुःशासनश्च क
र्णश्च दुष्टमंत्रममंत्रयन्। ते कौरव्यमनुज्ञाप्य धृतराष्ट्रं नराधिपं। दहने तु सपुत्राया कुंत्या बुद्धिम
कारयत्। तेषामिंगितभावज्ञो विदुरस्तत्वदर्शिवान्। आकारेण च तं मंत्रं बुबुधे दुष्टचेतसां। ततो वि
दितवेद्यात्मा पांडवानां हिते रतः। पलायने मतिं चक्रे कुंत्याः पुत्रैः सहानघ। ततो वातसहां नावं यंत्रयु
क्तां पताकिनीं। ऊर्म्मिक्षमां दृढां कृत्वा कुंतीमिदमुवाच ह। एष जातः कुलस्यास्य कीर्त्तिवंशप्रणाश
नः। धृतराष्ट्रः परीतात्मा धर्मं त्यजति शाश्वतं। इयं वारिपथे युक्ता तरंगपवनक्षमा। नौर्यया मृत्युपा
शात्त्वं सपुत्रा मोक्ष्यसे शुभे। तच्छ्रुत्वा व्यथिता कुंती पुत्रैः सह यशस्विनी। नावमारुह्य गंगायां प्रययौ भ
रतर्षभ। ततो विदुरवाक्येन नावं विक्षिप्य पांडवाः। धनं चादाय तैर्द्दत्तमरिष्टं प्राविशन्वनं। निषादी पं
चपुत्रा तु जातुषे तत्र वेश्मनि। कारणाभ्यागता दग्धा सह पुत्रैरनागसा। स च म्लेच्छाधमः पापो दग्ध
स्तत्र पुरोचनः। वंचिताश्च दुरात्मानो धार्त्तराष्ट्राः सहानुगाः। अविज्ञाता महात्मानो जनानामक्षतास्त

थ्या। जनन्यासहकौन्तेयामुक्ताविदुरमंत्रिताः। ततस्तस्मिन्पुरेलोकानगरेवारणावते। दृष्ट्वाजतुगृहं
दग्धमनुशोचन्तदुःखिताः। प्रेषयामासुराजानंयथावृत्तंनिवेदितुं। संवृत्तस्तेमहान्कामः पांडवान्दग्ध
वानसि। सकामोभवकौरव्यभुंक्ष्वराज्यंसपुत्रकः। नच्छ्रुत्वाधृतराष्ट्रस्तुसहपुत्रेणशोचयन्। प्रेतकार्य्या
णिचतथाचकारसहवांधवैः। पांडवानांतथाक्षत्ताभीष्मश्चकुरुसत्तम   जनमेजयउवाच
पुनर्विस्तरशःश्रोतुमिच्छामिद्विजसत्तम। दाहंजतुगृहस्यैवंपांडवानांचमोक्षणं। सुनृशंसमिदंकर्म्म
तेषांक्रूरोपसंहितं। कीर्त्तयस्वयथावृत्तंपरंकौतूहलंमम॥ वैशं ॥शृणुविस्तरशोराजन्वद
तोमेपरंतप। दाहंजतुगृहस्यैतत्पांडवानांचमोक्षणं। प्राणाधिकंभीमसेनंकृतविद्यंधनंजयं। दु
र्य्योधनोलक्षयित्वापर्य्यतप्यतदुर्मनाः। ततोवैकर्त्तनःकर्णःशकुनिश्चापिसौवलः। अनेकैरभ्यु
पायैस्तेजिघांसंतिस्मपांडवान्। पांडवाश्चापितत्सर्वंप्रतिचक्रुर्यथागतं। उद्भावनमकुर्वंतोविदुरस्य
मतेस्थिताः। गुणैःसमुदितान्दृष्ट्वापौराःपांडुसुतांस्तदा। कथयांचक्रिरेतेषांगुणान्संसत्सुभारत।
राज्यप्राप्तिंचसंप्राप्तंज्येष्ठंपांडुसुतंतदा। कथयंतिस्मसंभूयचत्वरेषुसभासुच। प्रज्ञाचक्षुरचक्षु

आ०प०
२२२

ष्ट्रो धृतराष्ट्रो जनेश्वरः। राज्यं न प्राप्तवान्पूर्वं स कथं नृपतिर्भवेत्। तथा शांतनवो भीष्मः सत्यसंधो महाव्र
तः। प्रत्याख्याय पुरा राज्यं न स जातु गृहीष्यति। ते वयं पांडवं ज्येष्ठं तरुणं वृद्धशीलिनं। अभिषिंचाम सा
ध्वद्य सत्यकारुण्यवेदिनं। स हि भीष्मं शांतनवं धृतराष्ट्रं च धर्मवित्। सपुत्रं विविधैर्भोगैर्योजयिष्यति
पूजयन्। तेषां दुर्योधनः श्रुत्वा तानि वाक्यानि जल्पतां। युधिष्ठिरानुरक्तानां पर्यतप्यत दुर्मतिः। स
तप्यमानो दुष्टात्मा तेषां वाचो न चक्षमे। ईर्षया चापि संतप्तो धृतराष्ट्रमुपागमत्। ततो विरहितं दृ
ष्ट्वा पितरं प्रतिपूज्य सः। पौरानुरागसंतप्तः पश्चादिदमभाषत। श्रुता मे जल्पतां तात पौराणामशि
वा गिरः। त्वामनादृत्य भीष्मं च पतिमिच्छंति पांडवं। मतमेतच्च भीष्मस्य न स राज्यं बुभुक्षति। अस्मा
कं तु परां पीडां चिकीर्षंति पुरे जनाः। पितृतः प्राप्तवान्राज्यं पांडुरात्मगुणैः पुरा। त्वमंधगुणसंयोगा
त्प्राप्तं राज्यं न लब्धवान्। स एष पांडोर्दायाद्यं यदि प्राप्नोति पांडवः। तस्य पुत्रो ध्रुवं प्राप्तस्तस्य तस्या
पि चापरः। ते वयं राजवंशेन हीनाः सह सुतैरपि। अवज्ञाता भविष्यामो लोकस्य जगतीपते। सततं
निरयं प्राप्ताः परपिंडोपजीविनः। न भवेम यथा राजंस्तथा नीतिर्विधीयतां। यदि त्वं हि पुरा राज

२२२

त्विदंराज्यमवाप्तवान्।ध्रुवंप्राप्स्यामचवयंराज्यमप्यवशेजने इत्यादिपर्वणि १३९
वैशं एतच्छ्रुत्वातुपुत्रस्यप्रज्ञाचक्षुर्नराधिपः।कणिकस्यचवाक्यानितानिश्रुत्वासर्वशः।धृ
तराष्ट्रोद्विधाचित्तःशोकार्त्तःसमपद्यत।दुर्य्योधनश्चकर्णश्चशकुनिःसौबलस्तथा।दुःशासनचतु
र्थास्तेमंत्रयामासुरेकतः।ततोदुर्य्योधनोराजाधृतराष्ट्रमभाषत।पांडवेभ्योभयंनस्यात्तान्विवास
यतांभवान्।निपुणेनाभ्युपायेननगरंवारणावतं।धृतराष्ट्रस्तुपुत्रेणश्रुत्वावचनमीरितं।मुहूर्त्त
मिवसंचिंत्यदुर्य्योधनमथाब्रवीत्।धर्मनित्यःसदापांडुस्तथाधर्मपरायणः।सर्वेषुज्ञातिषुत
थामयित्वासीद्विशेषतः।नासौकिंचिद्विजानातिभोजनादिचिकीर्षितं।निवेदयतिनित्यंहिमम
राज्यंधृतव्रतः।तस्यपुत्रोयथापांडुस्तथाधर्मपरायणः।गुणवांल्लोकेविख्यातःपौरवाणांसुसं
मतः।सकथंशक्यतेस्माभिरपाकर्त्तुंबलादितः।तेपुरासत्कृतास्तातपांडुनानागराजनाः।कथं
युधिष्ठिरस्यार्थेननोहन्युःसबांधवान् दुर्य्योधनउ एवमेतद्यथातातभावितंदोषमात्मनः।
दृष्ट्वाप्रकृतयःसर्वाअर्थमानेनपूजिताः।ध्रुवमस्मत्सहायास्तेभविष्यंतिप्रधानतः।अर्थवर्गः

सहामात्योमत्संस्थोद्यमहीपते।सभवान्पांडवानाशुविवासयितुमर्हति।मृदुनैवाभ्युपायेननगरंवार
णावतं।यदाप्रतिष्ठितंराज्यंमयिराजन्भविष्यति।तदाकुंतीसहापत्यापुनरेष्यतिभारत धृतराष्ट्रउ
वाच दुर्योधनममाप्येतद्धृदिसंपरिवर्तते।अभिप्रायस्यपापत्वान्नैवंतुविवृणोम्यहं।नचभीष्मोन
चद्रोणोनक्षत्तानचगौतमः।विवास्यमानान्कौंतेयानन्विछस्पथकर्हिचित्।समाहिकौरवेयाणांवयं
तेचैवपुत्रकानैतेविषममिच्छेयुर्धर्मयुक्तामनस्विनः।तेवयंकौरवेयाणामेतेषांचमहात्मनां।कथंन
वध्यतांतातगच्छामजगतस्तथा॥ दुर्योधनउ ॥मध्यस्थःसततंभीष्मोद्रोणपुत्रोमयिस्थितः।
यतःपुत्रस्ततोद्रोणोभवितानात्रसंशयः।कृपःशारद्वतश्चैवयतएतौततोभवेत्।द्रोणंचभागिनेयंच
नसंत्यक्ष्यतिकर्हिचित्।क्षत्तार्थबद्धस्त्वस्माकंप्रच्छन्नंसंयतःपरैः।नचैकःससमर्थोस्मान्पांडवार्थेप्र
बाधितुं।सुविश्रब्धःपांडुपुत्रान्सहमात्राप्रवासय।वारणावतमद्यैवयथायांतितथाकुरु।विनिद्रकर
णंघोरंहृदिशल्यमिवार्पितं।शोकपावकमुद्भूतंकर्मणैतेननाशय इत्यादिपर्वणि १३६ ॥
वैशं ततोदुर्योधनोराजासर्वाःप्रकृतयःशनैः।अर्थमानप्रदानाभ्यांसंजहारसहानुजः।धृतराष्ट्र

प्रयुक्तास्तेकेचित्कुशलामंत्रिणः।कथयांचक्रिरेरम्यंनगरंवारणावतं।अयंसमाजःसुमहान्रमणी
यतमोभुवि।उपस्थितःपशुपतेर्नगरेवारणावते।सर्वरत्नसमाकीर्णःपुंसांदेशेमनोरमे।इत्येवंधृत
राष्ट्रस्यवचनाच्चक्रिरेकथाः।कथ्यमानेतथारम्येनगरेवारणावते।गमनेपांडुपुत्राणांजज्ञेतत्रमति
र्नृप।यदात्वमन्यतनृपोजातकौतूहलाइति।उवाचैतानेस्तदापांडवानंविकासुतः।ममैतेपुरुषानि
त्यंकथयन्तिपुनःपुनः।रमणीयतमंलोकेनगरंवारणावतं।तेतातायदिमन्यध्वमुत्सवंवारणाव
ते।सगणाःसान्वयाश्चैवविहरध्वंयथामराः।ब्राह्मणेभ्यश्चरत्नानिगायनेभ्यश्चसर्वशः।प्रयच्छध्वं
यथाकामंदेवाइवसुवर्चसः।कंचित्कालंविहृत्यैवमनुभूयपरांमुदं।इदंवैहास्तिनपुरंसुखिनःपुन
रेष्यथाधृतराष्ट्रस्यतंकाममनुबुद्ध्वायुधिष्ठिरः।आत्मनश्चासहायत्वंतथेतिप्रत्युवाचतं।ततोभीष्मं
शांतनवंविदुरंचमहामतिं।द्रोणंचवाह्लिकंचैवसोमदत्तंचकौरवं।कृपमाचार्यपुत्रंचभूरिश्रवसमे
वच।मान्यानन्यानमात्यांश्चब्राह्मणांश्चतपोधनान्।पुरोहितांश्चपौरांश्चगांधारींचयशस्विनीं।युधि
ष्ठिरःशनैर्दीनमुवाचेदंवचस्तदा।रमणीयेजनाकीर्णेनगरेवारणावते।सगणास्तत्रयास्यामोधृतराष्ट्र

आ०प०
२२४

स्यशासनात्।प्रसन्नमनसः सर्वे पुण्या वाचो विमुंचत।आशीर्भिर्बृंहितानस्मान्नचपापंसहिष्यते।एव
मुक्तास्तु ते सर्वे पांडुपुत्रेण कौरवाः।प्रसन्नवदना भूत्वा तेन्ववर्त्तंत पांडवान्।स्वस्त्यस्तु वः पथि सदा भूते
भ्यश्चैव सर्वशः।माचवोस्त्वशुभं किंचित्सर्वशः पांडुनंदनाः।ततः कृतस्वस्त्ययना राज्यलंभाय पांडवाः।
कृत्वा सर्वाणि कार्याणि प्रययुर्वारणावतं   इत्यादिपर्वणि १४७   वैशम्   एवमुक्तेषु राज्ञा
तु पांडुपुत्रेषु भारत।दुर्योधनः परं हर्षमगच्छत्स दुरात्मवान्।स पुरोचनमेकांतमानीय भरतर्षभ।गृही
त्वा दक्षिणे पाणौ सचिवं वाक्यमब्रवीत्।ममेयं वसुसंपूर्णा पुरोचन वसुंधरा।यथेयं मम तद्वत्ते स तां र
क्षितुमर्हसि।नहि मे कश्चिदन्योस्ति वैश्वासिकतरस्तथा।सहायो येन संधाय मंत्रयेयं यथा त्वया।संरक्ष
नात मंत्रं च सपत्नांश्च ममोद्धर।निपुणेनाभ्युपायेन यद्ब्रवीमि तथा कुरु।पांडवा धृतराष्ट्रेण प्रेषिता वारणा
वतं।उत्सवे विहरिष्यंति धृतराष्ट्रस्य शासनात्।स त्वं रासभयुक्तेन स्यंदनेनाशुगामिना।वारणावतमद्यै
व यथा यासि तथा कुरु।तत्र गत्वा चतुःशालं गृहं परमसंवृतं।नगरोपान्तमाश्रित्य कारयेथा महाधनं।
शणसर्जरसादीनि यानि द्रव्याणि कानिचित्।आग्नेयान्युत संतीह तानि तत्र प्रदापय।सर्पिस्तैलवसाभि

२२४

स्थूलाद्व्ययावाप्यनल्पयामृत्तिकांमिश्रयित्वात्वंलेपंकुर्द्योह्युदापयाश्शाणंतैलंघृतंचैवजतुदारूणि
चैवहि।तस्मिन्वेश्मनिसर्वाणिनिक्षिपेथाःसमंततः।यथातच्चपश्येरन्परीक्षंतोपिपांडवाः।आग्नेय
मितितत्कार्यमपिचान्येपिमानवाः।वेश्मन्येवंकृतेतत्रकृत्वातान्परमार्च्चिताः।वासयेथाःपांडवेयान्कुं
तींचससुहृज्जनान्।आसनानिचदिव्यानियानानिशयनानिच।विधातव्यानिपांडूनांयथातुष्येतमेपि
ता।यथाचतन्नजानंतिनगरेवारणावते।तथासर्वंविधातव्यंयावत्कालस्यपर्ययः।ज्ञात्वाचतान्सुविश्व
स्तान्शयानानकुतोभयान्।अग्निस्त्वयाततोदेयोद्वारतस्तस्यवेश्मनः।दह्यमानेस्वकेगेहेदग्धाइति
ततोजनाः।नगर्ह्येयुरस्मान्वैपांडवार्थायकर्हिचित्।सतथेतिप्रतिज्ञायकौरवायपुरोचनः।प्रायाद्रास
भयुक्तेनस्यंदनेनाशुगामिना।सगत्वात्वरितंराजन्दुर्योधनमतेस्थितः।यथोक्तंराजपुत्रेणसर्वंचक्रेपुरो
चनः इत्यादिपर्वणि १३८ वैशं पाण्डवास्तुरथान्युक्तान्सदश्वैरनिलोपमैः।आरोहमाणा
भीष्मस्यपादौजगृहुरार्त्तवत्।राज्ञश्चधृतराष्ट्रस्यद्रोणस्यचमहात्मनः।अन्येषांचैववृद्धानांकृपस्यविदु
रस्यच।एवंसर्वान्कुरून्वृद्धानभिवाद्ययतव्रताः।समालिंग्यसमानान्वैबालैश्चाप्यभिवादिताः।सर्वामा

त्तृस्तथापृष्ट्वाकृत्वाचैवप्रदक्षिणं।सर्वाःप्रकृतयश्चैवप्रययुर्वारणावतं।विदुरश्चमहाप्राज्ञस्तथान्येकु
रुपुंगवाः।पौराश्चपुरुषव्याघ्रानन्वियुःशोककर्षिताः।तत्रकेचिद्ब्रुवंतिस्मब्राह्मणानिर्भयास्तदा।दीना
न्दृष्ट्वापांडुसुतानतीवभृशदुःखिताः।विषमंपश्यतेराजासर्वथाससुमंदधीः।कौरव्योधृतराष्ट्रस्तु
नचधर्मंप्रपश्यति।नहिपापमपापात्मारोचयिष्यतिपांडवः।भीमोवाबलिनांश्रेष्टःकौंतेयोवाधनंज
यः।कुतएवमहात्मानौमाद्रीपुत्रौकरिष्यतः।तान्राज्यंपितृतःप्राप्तान्धृतराष्ट्रोनमृष्यते।अधर्म्य
मिदमत्यंतंकथंभीष्मोनुमन्यते।विवास्यमानानस्थानेननगरेयोभिमन्यते।पितेवहिनृपोस्माकमभू
च्छांतनवःपुरा।विचित्रवीर्य्योराजर्षिःपांडुश्चकुरुनंदनः।सतस्मिन्पुरुषव्याघ्रेदेवभावंगतेसति।रा
जपुत्रानिमान्बालान्धृतराष्ट्रोनमृष्यते।वयमेतदनिष्टंतःसर्वएवपुरोत्तमात्।गृहान्विहायगच्छामोय
त्रगंतायुधिष्ठिरः।तांस्तथावादिनःपौरान्दुःखितान्दुःखकर्षितः।उवाचमनसाध्यात्वाधर्मराजोयुधि
ष्ठिरः।पितामान्योगुरुःश्रेष्ठोयदाहपृथिवीपतिः।अशंकमानैस्तत्कार्य्यमस्माभिरितिनोव्रतं।भवं
तःसुहृदोस्माकमस्मान्कृत्वाप्रदक्षिणं।प्रतिनंद्यतथाशीर्भिर्निवर्त्तध्वंयथागृहं।यदातुकार्य्यमस्मा

कंप्रियाणिचहितानिच।एवमुक्त्वास्ततःपौराःकृत्वाचापिप्रदक्षिणं।आशीर्भिरभिनंद्यैतान्जग्मुर्न्नग
रमेवहि।पौरेषुविनिवृत्तेषुविदुरःसर्वधर्मवित्।बोधयन्पांडवःश्रेष्ठमिदंवचनमब्रवीत्।प्राज्ञःप्राज्ञं
प्रलापज्ञःप्रलापज्ञमिदंवचः।योजानातिपरांप्रज्ञांनीतिशास्त्रानुसारिणीं।विज्ञायेहतथाकुर्यादा
पदंनिस्तरेद्यथा।अलोहंनिशितंशास्त्रंशरीरपरिकर्त्तनं।योवेत्तिनतुतंघ्नंतिप्रतीघातमिदंद्विषः।क
क्षघ्नःशिशिरघ्नश्चमहाकक्षेबिलौकसः।नदहेदितिचात्मानंयोरक्षतिसजीवति।नाचक्षुर्वेत्तिपंथा
नंनाचक्षुर्विंदतेदिशः।नाधृतिर्भूतिमाप्नोतिबुध्यस्वैवंप्रबोधितः।अनाप्तैर्दत्तमादत्तेनरःशास्त्रमलो
हजं।श्वाविच्छरणमासाद्यप्रमुच्येतहुताशनात्।चरन्मार्गान्विजानातिनक्षत्रैर्विंदतेदिशः।आत्मना
चात्मनःपंचपीडयन्नानुपीड्यते।एवमुक्तःप्रत्युवाचधर्मराजोयुधिष्ठिरः।विदुरंविदुषांश्रेष्ठंज्ञातमि
त्येवपांडवः।अनुशिष्यानुगम्यैतान्कृत्वाचैवप्रदक्षिणं।पांडवानभ्यनुज्ञायविदुरःप्रययौगृहान्।निवृ
त्तेविदुरेवापिभीष्मेपौरजनेतथा।अजातशत्रुमासाद्यकुंतीवचनमब्रवीत्।क्षत्तायदब्रवीद्वाक्यंजनम
ध्येऽब्रुवन्निव।त्वयाचसतथेत्युक्तोजानीमोनचतद्वयं।यदीदंशक्यमस्माभिर्ज्ञातुंनचसदोषवत्।श्रोतुमि

छामितत्सर्वंसंवादंतवतस्यच॥ युधिष्ठिरउ ॥गृहादग्निश्चबोद्धव्यइतिमांविदुरोब्रवीत्।पंथाश्च
वोनाविदितःकश्चित्स्यादितिधर्म्मधीः।जितेंद्रियश्चवसुधांप्राप्स्यसीतिचमेब्रवीत्।विज्ञातमितितत्स
र्वंप्रत्युक्तोविदुरोमया वैशं अष्टमेहनिरोहिण्यांप्रयाताःफाल्गुनस्यते।वारणावतमासाद्यददृशु
र्नागरंजनं इत्यादिपर्वणि २३९ वैशं ततःसर्वाःप्रकृतयोनगराद्वारणावतात्।सर्वमंगलस
संयुक्तायथाशास्त्रमतंद्रिताः।श्रुत्वागतान्पांडुपुत्रान्नानायानैःसहस्रशः।अभिजग्मुर्नरश्रेष्ठांश्रुत्वैवप
रयामुदा।तेसमासाद्यकौंतेयान्वारणावतकाजनाः।कृत्वाजयाशिषःसर्वेपरिवार्य्यावतस्थिरे।तैर्वृतः
पुरुषव्याघ्रोधर्म्मराजोयुधिष्ठिरः।विबभौदेवसंकाशोवज्रपाणिरिवामरैः।सत्कृतास्तैवपौरैस्तेपौरान्
सत्कृत्यचानघ।अलंकृतंजनाकीर्णंविविशुर्वारणावतं।तेप्रविश्यपुरींवीरास्तूर्णंजग्मुरथोगृहान्।ब्राह्म
णानांमहीपालरतानांस्वेषुकर्म्मसु।नगराधिकृतानांचगृहाणिरथिनांतदा।उपतस्थुर्नरश्रेष्ठावैश्यशू
द्रकुलान्यपि।अर्चिताश्चनरैःपौरैःपांडवाभरतर्षभ।जग्मुरावसथंपश्चात्पुरोचनपुरस्सराः।तेभ्योभक्ष्या
णिपानानिशयनानिशुभानिच।आसनानिचमुख्यानिप्रददौसपुरोचनः।तत्रतेसत्कृतास्तेनसुमहार्हप

रिच्छदाः॥ उपास्यमानाः पुरुषैस्तूष्टुः पुरनिवासिभिः॥ दशरात्रोषितानां तु तत्र तेषां पुरोचनः॥ निवेदयामा
स गृहं शिवाख्यमशिवं तदा॥ तत्र ते पुरुषव्याघ्रा विविशुः सपरिच्छदाः॥ पुरोचनस्य वचनात्कैलासमिव गुह्य
काः॥ तत्त्वागारमभिप्रेक्ष्य सर्वधर्मभृतां वरः॥ उवाचाग्नेयमित्येवं भीमसेनं युधिष्ठिरः॥ जिघ्राणश्च वसागंधं
सर्पिर्जतुविमिश्रितं॥ कृतं हि व्यक्तमाग्नेयमिदं वेश्म परंतप॥ शणसर्जरसं व्यक्तमानीय गृहकर्मणि॥ मुंज
बल्वजवंशादि द्रव्यं सर्वं घृतोक्षितं॥ शिल्पिभिः सुकृतं ह्याप्तैर्विनीतैर्वेश्मकर्मणि॥ विश्वस्तं मामयं पापो द
ग्धुकामः पुरोचनः॥ तथा हि वर्त्तते मंदः सुयोधनवशे स्थितः॥ इमां तु तां महाबुद्धिर्विदुरो दृष्टवांस्तदा॥ आपदं
तेन मां पार्थ स संबोधितवान्पुरा॥ ते वयं बोधितास्तेन नित्यमस्मद्धितैषिणा॥ पित्रा कनीयसा स्नेहाद्बुद्धिम
त्ताऽशिवं गृहं॥ अनार्यैः सुकृतं गूढैः दुर्योधनवशानुगैः॥ भीमसेन उ॥ यदिदं गृहमाग्नेयं विहितं म
न्यते भवान्॥ तत्रैव साधु गच्छामो यत्र पूर्वोषिता वयं॥ युधिष्ठिर उ॥ इह यत्तैर्निराकारैर्वस्तव्यमिति रोच
ये॥ अप्रमत्तैर्विचिन्वद्भिर्गतिमिष्टां ध्रुवामितः॥ यदि विंद्येत वाकारमस्माकं स पुरोचनः॥ क्षिप्रकारी ततो भूत्वा
प्रसह्यापि दहेत नः॥ नायं बिभेत्युपक्रोशादधर्माद्वा पुरोचनः॥ तथा हि वर्त्तते मंदः सुयोधनवशे स्थितः॥ अपि

आ०प०
२२७

चायंप्रदग्धेषुभीष्मोऽस्मासुपितामहः।कोपंकुर्यात्किमर्थंवाकौरवान्कोपयीतसः।अथवापीहदग्धेषुभी
ष्मोऽस्माकंपितामहः।धर्म्मइत्येवकुप्येरन्येचान्येकुरुपुंगवाः।वयंतुयदिदाहस्यबिभ्यतःप्रद्रवेमहि।स्पशै
र्न्नोघातयेत्सर्वान्राज्यलुब्धःसुयोधनः।अपदस्थान्पदेतिष्ठन्नपक्षान्पक्षसंस्थितः।हीनकोशान्महाकोशः
प्रयोगैर्घातयेद्ध्रुवं।तदस्माभिरिमंपापंतंवपापंसुयोधनं।वंचयद्भिर्न्निवस्तव्यंछन्नावासेक्वचित्क्वचि
त्।तेवयंमृगयाशीलाश्चरामवसुधामिमां।तथानोविदितामार्गाभविष्यंतिपलायतां।भौमंचबिलम
द्यैवकरवामसुसंवृतं।गूढोच्छ्वासान्ननस्तत्रहुताशःसंप्रधक्ष्यति।वसतोत्रयथाचास्मान्नबुध्येतपुरोच
नः।पौरोवापिजनःकश्चित्तथाकार्य्यमतंद्रितैः॥ इत्यादिपर्व्वणि १४· वैशं विदुरस्यसु
हृत्कश्चित्खनकःकुशलोनरः।विविक्तेपांडवान्राजन्निदंवचनमब्रवीत्।प्रहितोविदुरेणास्मिखन २२७
कःकुशलोभृशं।पांडवानांप्रियंकार्य्यमितिकिंकरवाणिवः।प्रच्छन्नंविदुरेणोक्तःश्रेयस्त्वमिहपांडवान्।
प्रतिपादयविश्वासादितिकिंकरवाणिवः।कृष्णपक्षेचतुर्द्दश्यांरात्रावस्यपुरोचनः।भवनस्यतवद्वारि
प्रदास्यतिहुताशनं।मात्रासहप्रदग्धव्याःपांडवाःपुरुषर्षभाः।इतिव्यवसितंतस्यधार्त्तराष्ट्रस्यदुर्म्म

नेः।किंचिच्चविदुरेणोक्तोम्लेछवाचासिपांडवः।त्वयाचतत्तथेत्युक्तमेतद्विश्वासकारणं।उवाचतंसत्य
धृतिःकुंतीपुत्रोयुधिष्ठिरः।अभिजानामिसौम्यत्वांसुहृदंविदुरस्यवै।शुचिमाप्तंप्रियंचैवसदाचदृढ
भक्तिकं।नविद्यतेकवेःकिंचिदविज्ञातंप्रयोजनं।यथातस्यतथानस्त्वंनिर्विशेषावयंत्वयि।भवतश्च
यथातस्यपालयास्मान्यथाकविः।इदंशरणमाग्नेयंमदर्थमितिमेमतिः।पुरोचनेनविहितंधार्तरा
ष्ट्रस्यशासनात्।सपापःकोषवांश्चैवससहायश्चदुर्मतिः।अस्मानपिचपापात्मानित्यकालंप्रबाध
ते।सभवान्मोक्षयत्वस्मान्यत्नेनास्माद्धुताशनात्।अस्मास्विहहिदग्धेषुसकामःस्यात्सुयोधनः।स
मृद्धमायुधागारमिदंतस्यदुरात्मनः।वप्रान्तंनिःप्रतीकारमाश्रित्येदंकृतंमहत्।इदंतदशुभंनूनंत
स्यकर्मचिकीर्षितं।प्रागेवविदुरोवेदतेनास्मानचबोधयत्।सेयमापदनुप्राप्ताक्षत्तायांदृष्टवान्पुरा
।पुरोचनस्याविदितानस्मांस्त्वंप्रतिमोचय।सतथेतिप्रतिश्रुत्यखनकोयत्नमास्थितः।परिखामुत्कि
रन्नामचकारचमहाबिलं।वभूववेश्मनस्तस्यमध्येनातिमहद्बिलं।कपाटयुक्तमज्ञातंसमंभूम्याश्च
भारत।पुरोचनभयादेवव्यदधात्संवृतंमुखं।सतस्यतुगृहद्वारिवसत्यशुभधीःसदा।तत्रतेसायु

धाः सर्वे वसंति स्म ह्रुपां नृप। दिवा चरंति मृगयां पांडवेया वनाद्वनं। विश्रब्धस्तवदविश्रब्धस्तावंचयंतः पु
रोचनं। अतुष्टास्तुष्टवद्राजन्नूषुः परमविस्मिताः। न चैतानन्वबुध्यंत नरा नगरवासिनः। अन्यत्र विदु
रामात्यात्तस्मात् खनकसत्तमात् इत्यादिपर्वणि जतुगृहे १४१ वैशं तांस्तु दृष्ट्वा सु
सुमनसः परिसंवत्सरोषितान्। विश्वस्तानिव संलक्ष्य हर्षं चक्रे पुरोचनः। पुरोचनेन तथा हृष्टे कौंतेयोथ
युधिष्ठिरः। भीमसेनार्जुनौ चोभौ यमौ प्रोवाच धर्मवित्। अस्मानयं सुविश्रब्धान्वेत्ति पापः पुरोचनः
वंचितोयं नृशंसात्मा कालं मन्ये पलायने। आयुधागारमादीप्य दग्ध्वा चैव पुरोचनं। षट्प्राणिनो नि
धायेह द्रवामोऽनभिलक्षिताः। अथ दानापदेशेन कुंती ब्राह्मणभोजनं। चक्रे निशि महाराज आज
ग्मुस्तत्र योषितः। ता विहृत्य यथाकामं भुक्त्वा पीत्वा च भारत। जग्मुर्निशि गृहानेव समनुज्ञाप्य मा
धवीं। निषादी पंचपुत्रा तु तस्मिन्भोज्ये यदृच्छया। अन्नार्थिनी समभ्यागात्सपुत्रा कालचोदिता। सा पी
त्वा मदिरां मत्ता सपुत्रा मदविह्वला। सह सर्वैः सुतै राजंस्तस्मिन्नेव निवेशने। सुष्वाप विगतज्ञाना मृ
तकल्पा नराधिप। अथ प्रवाते तुमुले निशि सुप्ते जने तदा। तदुपादीपयद्भीमः शेते यत्र पुरोचनः। त

तोजतुगृहद्वारंदीपयामासपांडवः।समंततोददौपश्चादग्निंतत्रनिवेशने।ज्ञातंतुतद्गृहंसर्वमादी
प्तंपांडुनंदनाः।सुरुंगांविविशुस्तूर्णमात्रासार्द्धमरिंदमाः।ततःप्रतापःसुमहांछब्दश्चैवविभावसोः
प्रादुरासीत्तदातेनबुबुधेसजनव्रजः।तदवेक्ष्यगृहंदीप्तमाहुःपौराःकृशाननाः पौराऊचुः
दुर्योधनप्रयुक्तेनपापेनाकृतबुद्धिना।गृहमात्मविनाशायकारितंदाहितंचतत्।अहोधिग्धृतराष्ट्रस्यबुद्धि
र्नातिसमंजसी।यःशुचीन्पांडुदायादान्दाहयामासशत्रुवत्।दिष्ट्यात्विदानींपापात्मादग्धोयमतिदुर्मतिः
।अनागसःसुविश्वस्तान्योददाहनरोत्तमान् वैशंप एवंतेविलपंतिस्मवारणावतकाजनाः।परि
वार्यगृहंतच्चनस्थूरात्रौसमंततः।पांडवाश्चापितेसर्वेसहमात्रासुदुःखिताः।बिलेनतेननिर्गत्यजग्मुर्दु
नमलक्षिताः।तेननिद्रापरोधेनसाध्वसेनचपांडवाः।नशेकुःसहसागंतुंसहमात्रापरंतपाः।भीमसेन
स्तुराजेंद्रभीमवेगपराक्रमः।जगामभ्रातृनादायसर्वान्मातरमेवच।स्कंधमारोप्यजननीयमावंकेन
वीर्यवान्।पार्थौगृहीत्वापाणिभ्यांभ्रातरौसुमहाबलः।उरसापादपान्भंजन्महींपद्भ्यांविदारयन्।स
जगामाशुतेजस्वीवाततरंहावृकोदरः इत्यादिपर्वणिजतुगृहे १४२ वैशं एतस्मिन्नेवका

लेनुयथासंप्रत्ययंकविः।विदुरःप्रेषयामासतद्धनंपुरुषंशुचिं।सगत्वातुयथोद्दिशंपांडवान्ददृशेव
ने।जनन्यासहकौरव्यमापयानान्नदीजले।विदितंतन्महाबुद्धेर्विदुरस्यमहात्मनः।ततस्तस्यापिचा
रेणचेष्टितंपापचेतसः।ततःसंप्रेषितोविद्वान्विदुरेणनरस्तदा।पार्थानांदर्शयामाससमनोमारुतगा
मिनीं।सर्ववातसहांनावंयंत्रयुक्तांपताकिनीं।शिवेभागीरथीतीरेनरैर्विस्त्रंभिः कृतां।ततःपुनर
थोवाचज्ञापकंपूर्वचोदितं।युधिष्ठिरनिबोधेदंसंज्ञार्थवचनंकवेः।कक्षघ्नःशिशिरघ्नश्चमहाकक्षे
बिलौकसः।नहंतीत्येवमात्मानंयोरक्षतिसजीवति।तेनमांप्रेषितंविद्धिविश्वस्तंसंज्ञयानया।भूय
श्चैवाहमांक्षत्ताविदुरःसर्वतोर्थवित्।कर्णंदुर्योधनंचैवभ्रातृभिःसहितंरणे।शकुनिंचैवकौंतेयविजे
तासिनसंशयः।इयंवारिपथेयुक्तानौरप्सुसुखगामिनी।मोचयिष्यतिवःसर्वानस्माद्देशान्नसंशयः।
अथतान्व्यथितान्दृष्ट्वासहमात्रानरोत्तमान्।नावमारोप्यगंगायांप्रस्थितानब्रवीत्पुनः।विदुरोमूर्ध्न्यु
पाघ्रायपरिष्वज्यवचोमुहुः।अरिष्टंगच्छताव्यग्राःपंथानमितिचाब्रवीत्।इत्युक्त्वासतुतान्वीरान्पुमां
विदुरचोदितः।तारयामासराजेंद्रगंगांनावानरर्षभान्।तारयित्वाततोगंगांपारंप्राप्तांश्चसर्वशः।ज

यात्रिषुःशृणुस्याथयथागतमगाद्विसः।पांडवाश्चमहात्मानःप्रतिसंदिश्यवैकचेः।गंगामुत्तीर्यवेगेन
जग्मुर्गूढमलक्षिताः इत्यादिपर्वणिजतुगृहे १४२ वैशं अथरात्र्यांव्यतीतायामशेषो
नागरोजनः।तत्राजगामत्वरितोदिदृक्षुःपांडुनंदनान्।निर्वापयंतोज्वलनंतेजनाददृशुस्ततः।जातुषं
तद्गृहंदग्धममात्यंचपुरोचनं।नूनंदुर्योधनेनेदंविहितंपापकर्मणा।पांडवानांविनाशायेत्येवंतेचुक्रुशु
र्जनाः।विदितेधृतराष्ट्रस्यधार्त्तराष्ट्रोनसंशयः।दग्धवान्पांडुदायादान्नह्येनंप्रतिषिद्धवान्।नूनंशांतन
वोपीहनधर्ममनुवर्त्तते।द्रोणश्चविदुरश्चैवकृपश्चान्येचकौरवाः।तेवयंधृतराष्ट्रस्यप्रेषयामोदुरात्म
नः।संवृत्तस्तेपरःकामःपांडवान्दग्धवानसि।ततोव्यपोहमानास्तेपांडवार्थेहुताशनं।निषादींददृशुर्द
ग्धांपंचपुत्रामनागसं।खनकेनतुतेनैववेश्मशोधयताबिलं।पांशुभिःपिहितंतच्चपुरुषैस्तैर्नलक्षि
तं।ततस्तेज्ञापयामासुर्धृतराष्ट्रस्यनागराः।पांडवानग्निनादग्धानमात्यंचपुरोचनं।श्रुत्वातुधृतराष्ट्रस्तद्रा
जासुमहदप्रियं।विनाशंपांडुपुत्राणांविललापसुदुःखितः।अद्यपांडुर्मृतोराजाभ्राताममहायशाः।
तेषुवीरेषुदग्धेषुमात्रासहविशेषतः।गच्छंतुपुरुषाःशीघ्रंनगरंवारणावतं।सत्कारयंतुतान्वीरान्कुंति

आ०प०
२३०

राजसुतांचतां।कारयंतुचकुल्यानिशुभान्यथहृहंतिचा।येचतत्रमृतास्तेषांसुहृदोयांतुतामपि।एवंग
तेमयाशक्यंयद्यत्कारयितुंहितं।पांडवानांचकुंत्याश्चतत्सर्वंक्रियतांधनैः।एवमुक्त्वाततश्चक्रेज्ञाति
भिःपरिवारितः।उदकंपाण्डुपुत्राणांधृतराष्ट्रोंबिकासुतः।रुरुदुःसहिताःसर्वेभृशंशोकपरायणाः।
हायुधिष्ठिरकौरव्यहाभीमइतिचापरे।हाफाल्गुनेतिचाप्यन्येहायमावितिचापरे।कुंतीमार्त्ताश्चशोचं
तउदकंचक्रिरेजनाः।अन्येपौरजनाश्चैवमन्वशोचंतपांडवान्।विदुरस्त्वल्पशश्चक्रेशोकंवेदपरंहिसः।
पांडवाश्चापिनिर्गत्यनगराद्वारणावतात्।नदींगंगामनुप्राप्तामातृषष्ठामहावलाः।हासुतानांभुजवेग
नतद्याःस्रोतोजवेनच।वायुनाचानुकूलेनतूर्णंपारमवाप्नुवन्।ततोनावंपरित्यज्यप्रययुर्दक्षिणांदिशं।
विज्ञायनिशिपंथानंनक्षत्रगणसूचितं।यतमानावनंराजन्गहनंप्रतिपेदिरे।ततःश्रांताःपिपासार्त्ताः
निद्रांधाःपांडुनंदनाः।पुनरूचुर्महावीर्यंभीमसेनमिदंवचः।इतःकष्टतरंकिंनुयद्वयंगहनेवने।दिशश्च
नविजानीमोगंतुंचैवनशक्नुमः।तंचपापंनजानीमोयदिदग्धःपुरोचनः।कथंनुविप्रमुच्येमभयादस्मा
दलक्षिताः।पुनरस्मानुपादायतथैवव्रजभारत।त्वंहिनोवलवानेकोयथासततगस्तथा।इत्युक्तोध

२३०

र्मराज्ञेनभीमसेनोमहाबलः॥ आदायकुंतींभ्रातॄंश्च जगामाशुमहाबलः   इत्यादिपर्वणिजतु
गृहे १४४ वैशं तेनविक्रममाणेनऊरुवेगसमीरितं। वनंसवृक्षविटपंव्याघूर्णितमिवाभव
त्। जंघावातोववौचास्यशुचिशुक्रागमेयथा। आवर्जितलतावृक्षंमार्गंचक्रेमहाबलः। संमृद्नन्सुपुष्पितां
श्चैवफलितांश्चवनस्पतीन्। अवरुह्यययौगुल्मान्पथस्तस्यसमीपजान्। सरोषितइवक्रुद्धोवनेभंजन्म
हाद्रुमान्। त्रिप्रस्रुतमदःशुष्मीषष्टीवर्षीमतंगराट्। गच्छतस्तस्यवेगेनतार्क्ष्यमारुतरंहसः। भीमस्यपां
डुपुत्राणांमूर्च्छेवसमजायत॥ असकृच्चापिसंतीर्यदूरपारंभुजप्लवैः। पथिप्रच्छन्नमासेदुर्धार्त्तराष्ट्र
भयात्तदा। कृच्छ्रेणमातरंचैवसुकुमारींयशस्विनीं। अवहत्सतुपृष्ठेनरोधःसुविषमेषुच। आगमच्चव
नोद्देशमल्पमूलफलोदकं। क्रूरपक्षिमृगंघोरंसायाह्नेभरतर्षभ। घोरासमभवत्संध्यादारुणामृगपक्षिणः
॥ अप्रकाशादिशःसर्वावातैरासन्ननार्त्तवैः। शीर्णपर्णफलैराजन्बहुगुल्मक्षुपैर्द्रुमैः। भग्नावभग्नभूयि
ष्ठैर्नानाद्रुमसमाकुलैः। तेश्रमेणचकौरव्यास्तृष्णयाचप्रपीडिताः। नाशक्नुवंस्तदागंतुंनिद्रयाचप्रवृद्ध
या। न्यविशंतहितेसर्वेनिरास्वादेमहावने। ततस्तृषापरिक्लांताकुंतीपुत्रानथाब्रवीत्। मातासतीपांड

वानांपंचानांमध्यतःस्थिता।तृष्णयाहिपरीतास्मिपुत्रान्भृशमथाब्रवीत्।तच्छ्रुत्वाभीमसेनस्यमातृ
स्नेहात्प्रजल्पितं।कारुण्येनमनस्तप्तंगमनायोपचक्रमे।ततोभीमोवनंघोरंप्रविश्यविजनंमहत्।न्य
ग्रोधंविपुलच्छायंरमणीयंददर्शह।तत्रनिक्षिप्यतान्सर्वानुवाचभरतर्षभः।पानीयंमृगयामीहविश्र
मध्वमितिप्रभो।एतेरुवंतिमधुरंसारसाजलचारिणः।ध्रुवमत्रजलस्थानंमहच्चेतिमतिर्मम।अनुज्ञा
तःसगच्छेतिभ्रात्राज्येष्ठेनभारत।जगामतत्रयत्रस्मसारसाजलचारिणः।सतत्रपीत्वापानीयंस्नात्वाच
भरतर्षभः।उत्तरीयेणपानीयमानयामासभारत।गव्यूतिमात्रादागत्यत्वरितोमातरंप्रति।शोकदुः
खपरीतात्मानिशश्वासोरगोयथा।ससुप्तांमातरंदृष्ट्वाभ्रातृंश्चवसुधातले।भृशंशोकपरीतात्माविल
लापवृकोदरः।अतःकष्टतरंकिंनुद्रष्टव्यंहिभविष्यति।यत्पश्यामिमहीसुप्तान्भ्रातृनद्यसुमंदभाक्।
शयनेषुपरार्ध्येषुयेपुरावारणावते।नाधिजग्मुस्तदानिद्रांतेद्यसुप्तामहीतले।स्वसारंवसुदेवस्यशत्रु
संघावमर्दिनः।कुंतिराजसुतांकुंतींसर्वलक्षणपूजितां।स्नुषांविचित्रवीर्यस्यभार्यांपांडोर्महात्मनः।त
थैवचास्मज्जननींपुंडरीकोदरप्रभां।सुकुमारतरामेनांमहार्हशयनोचितां।शयानांपश्यताद्येह

थिव्यामनर्थोचितां।धर्मादिंद्राञ्चवाताञ्चसुषुवेयासुतानिमान्॥सेयंभूमौपरिश्रांताशेतेप्रासादशायि
नी।किंनुदुःखतरंशक्यंमयाद्रष्टुमतःपरं।योहमद्यनरव्याघ्रान्सुप्तान्पश्यामिभूतले।त्रिषुलोकेषुयो
राज्यंधर्मनित्योर्हतेनृपः।सोयंभूमौपरिश्रांतःशेतेप्राकृतवत्कथं।अयंनीलांबुदश्यामोनरेष्वप्रतिमो
र्जुनः।शेतेप्राकृतवद्भूमौततोदुःखतरंनुकिं।अश्विनाविवदेवानांयाविमौनृपसंपदा।तौप्राकृतवदद्येमौ
प्रसुप्तौधरणीतले।ज्ञातयोयस्यनैवस्युर्विषमाःकुलपांसनाः।सजीवेत्सुखंलोकेग्रामद्रुमइवैकजः।ए
कोप्येकोहियोग्रामेभवेत्पर्णफलान्वितः।चैत्योभवतिनिर्ज्ञातिरर्चनीयःसुपूजितः।येषांचबहवःशूराज्ञा
तयोधर्ममाश्रिताः।तेजीवंतिसुखंलोकेभवंतिचनिरामयाः।बलवंतःसमृद्धार्थामित्रबांधवनंदनाः।
जीवंत्यन्योन्यमाश्रित्यद्रुमाःकाननजाइव।वयंतुधृतराष्ट्रेणसपुत्रेणदुरात्मना।विवासितानदग्धाश्च
कथंचिद्देवसंश्रयात्।तस्मान्मुक्तावयंदाहादिमंवृक्षमुपाश्रिताः।कांदिशंप्रतिपत्स्यामःप्राप्ताःक्लेशमनु
त्तमं।सकामोभवदुर्बुद्धेधार्तराष्ट्राल्पदर्शन।नूनंदेवाःप्रसन्नास्तेनानुज्ञांमेयुधिष्ठिरः।प्रयच्छतिवधेतुभ्यं
तेनजीवसिदुर्मते।नन्वद्यससुतामात्यसकर्णानुजसौबलं।गत्वाक्रोधसमाविष्टःप्रेषयिष्येयमक्षयं।किं

नुरूपंकंमयाकर्त्तुंयस्तेनकुरुतेनृपः।धर्मात्मापांडवश्रेष्ठःपापाचारयुधिष्ठिरः।एवमुक्त्वामहाबाहुःक्रो
धसंदीप्तमानसः।करंकरेणनिष्पिष्यनिश्वसन्दीप्तमानसः।पुनर्दीनमनाभूत्वाशांतार्चिरिवपावकः।भ्रा
तॄन्महीतलेसुप्तानवैक्षतवृकोदरः।विश्वस्तानिवसंविष्टान्पृथग्जनसमानिव।नातिदूरेणनगरंवनादस्मा
द्धिलक्षये।जागर्त्तव्येस्वपंतीमेहंतजागर्म्यहंस्वयं।पास्यंतीमेजलंपश्चात्प्रतिबुद्धाजितक्लमाः।इतिभीमो
व्यवस्यैवजजागरस्वयंतदा इत्यादिपर्वणिजतुगृहदाहःसमाप्तः १४५ वैशं तत्रतेषुश
यानेषुहिडिंबोनामराक्षसः।अविदूरेवनात्तस्माच्छालवृक्षंसमाश्रितः।क्रूरोमानुषमांसादोमहावीर्यप
राक्रमः।प्रावृड्जलधरश्यामःपिंगाक्षोदारुणाकृतिः।दंष्ट्राकरालवदनःपिशितेप्सुःक्षुधार्दितः।
लंबस्फिग्लंबजठरोरक्तश्मश्रुशिरोरुहः।महावृक्षगलस्कंधःशंकुकर्णोविभीषणः।यदृच्छयाता
नपश्यत्पांडुपुत्रान्महारथान्।विरूपरूपःपिंगाक्षःकरालोघोरदर्शनः।पिशितेप्सुःक्षुधार्त्तस्तानप
श्यद्यदृच्छया।ऊर्ध्वांगुलिःसकंडूयन्धुन्वन्रूक्षाञ्शिरोरुहान्।जंभमाणोमहावक्त्रःपुनःपुनरवेक्ष्यचाह
ष्टोमानुषमांसस्यमहाकायोमहाबलः।आघ्रायमानुषंगंधंभगिनीमिदमब्रवीत्।उपपन्नश्चिरस्या

घमक्षोयंममसुप्रियः। स्नेहस्रवान्प्रस्रवतिजिह्वापर्येतिमेमुखं। अष्टौदंष्ट्राःसुतीक्ष्णाग्राश्चिरस्यापातदुः
सहाः। देहेषुमज्जयिष्यामिस्निग्धेषुपिशितेषुच। आक्रम्यमानुषंकंठमाच्छिद्यधमनीमपि। उष्णंनवंप्र
पास्यामिफेनिलंरुधिरंबहु। गच्छजानीहिकेत्वेतेशेरतेवनमाश्रिताः। मानुषोबलवान्गंधोघ्राणंतर्प
यतीवमे। हत्वैतान्मानुषान्सर्वानानयस्वममांतिकं। अस्मद्विषयसुप्तेभ्योनैतेभ्योभयमस्तिते। एषामुत्कृ
त्यमांसानिमानुषाणांयथेष्टतः। भक्षयिष्यावसहितौकुरुतूर्णंवचोमम। भक्षयित्वाचमांसानिमानुषा
णांप्रकामतः। नृत्यावःसहितावावांदत्ततालौवनेकशः। एवमुक्ताहिडिंबातुहिडिंबेनतदावने। भ्रातुर्वच
नमाज्ञायत्वरमाणेवराक्षसी। जगामतत्रयत्रस्मपांडवाभरतर्षभ। ददर्शतत्रसागत्वापांडवान्पृथया
सह। शयानान्भीमसेनंचजाग्रतंत्वपराजितं। दृष्ट्वैवभीमसेनंसाशालपोतमिवोद्गतं। राक्षसीकामयां
मासरूपेणाप्रतिमंभुवि। अयंश्यामोमहाबाहुःसिंहस्कंधोमहाद्युतिः। कंबुग्रीवःपुष्कराक्षोभर्तायुक्तोभ
वेन्मम। नाहंभ्रातृवचोजातुकुर्यांक्रूरोपसंहितं। पतिस्नेहोतिबलवान्नतथाभ्रातृसौहृदं। मुहूर्त्तमिवतृ
प्तिश्चभवेद्भ्रातुर्ममैवच। हतैरेतैरहत्वातुमोदिष्येशाश्वतीःसमाः। साकामरूपिणीरूपंकृत्वामानुषमुत्त

मं।उपतस्थेमहाबाहुंभीमसेनंशनैःशनैः।लज्जमानेवललनादिव्याभरणभूषिता।स्मितपूर्वमिदंवाक्यं
भीमसेनमथाब्रवीत्।कुतस्त्वमसिसंप्राप्तःकश्चासिपुरुषर्षभ।कइमेशेरतेचेहपुरुषादेवरूपिणः।के
यंवैबृहतीश्यामासुकुमारीतवानघ।शेतेवनमिदंप्राप्यविश्वस्तास्वगृहेयथा।नेदंजानातिगहनंवनंराक्षस
सेवितं।वसतिह्यत्रपापात्माहिडिंबोनामराक्षसः।तेनाहंप्रेषिताभ्रात्रादुष्टभावेनरक्षसा।बिभक्षयिषतामां
संयुष्माकममरोपम।साहंत्वामभिसंप्रेक्ष्यदेवगर्भसमप्रभं।नान्यंभर्तारमिच्छामिसत्यमेतद्ब्रवीमिते।एत
द्विज्ञायधर्मज्ञयुक्तंमयिसमाचर।कामोपहतचित्तांगींभजमानांभजस्वमां।त्रास्यामित्वांमहाबाहोराक्षसात्पु
रुषादकात्।वत्स्यावोगिरिदुर्गेषुभर्ताभवममानघ।अंतरिक्षचराह्यस्मिकामतोविचरामिच।अतुलामाप्नु
हिप्रीतिंतत्रतत्रमयासह भीमसेनउ मातरंभ्रातरंज्येष्ठंसुखसुप्तान्कथंविमान्।परित्यजेत्कोन्व
द्यप्रभवन्निहराक्षसी।कोहिसुप्तानिमान्भ्रातॄन्दत्वाराक्षसभोजनं।मातरंचनरोगच्छेत्कामार्तइवमद्विधः
॥ राक्षस्युवाच ॥यत्तेप्रियंतत्करिष्येसर्वानेतान्प्रबोधय।मोक्षयिष्याम्यहंकामंराक्षसात्पुरुषाद
कात् भीमउ सुखसुप्तान्वनेभ्रातॄन्मातरंचैवराक्षसि।नभयाद्बोधयिष्यामिभ्रातुस्तवदुसात्मनःभन

रात्मनः

हिमेराक्षसाभीरुसोढुंशक्ताःपराक्रमंनमनुष्यानगंधर्व्वानयक्षांश्चारुलोचने।गछवातिष्ठवाभद्रेयद्वा
पीछसितत्कुरु।तंवाप्रेषयतन्वंगिभ्रातरंपुरुषादकं इत्यादिपर्वणिहिडिंववधे १४६ वैशं
तांविदित्वाचिरगतांहिडिंवोराक्षसेश्वरः।अवतीर्यद्रुमात्तस्मादाजगामाथपांडवान्।लोहिताक्षोमहाबा
हुरूर्ध्वकेशोमहाननः।मेघसंघातवर्ष्माचतीक्ष्णदंष्ट्रोभयानकः।तमापतंतंदृष्ट्वैवतथाविकृतदर्शनं।
हिडिंवोवाचवित्रस्ताभीमसेनमिदंवचः।आपतत्येषदुष्टात्मासंक्रुद्धःपुरुषादकः।साहंत्वांभ्रातृभिःसार्द्धं
यद्ब्रवीमितथाकुरु।अहंकामगमावीररक्षोवलसमन्विता।आरुहेमांम् मश्रोणिंनेष्यामित्वांविहाय
सा।प्रवोधयैतान्संसुप्तान्मातरंचपरंतप।सर्व्वानेवगमिष्यामिगृहीत्वावोविहायसा भीमउवाच
माभैस्त्वंपृथुसुश्रोणिनैषकश्चिन्मयिस्थिते।अहमेनंहनिष्यामिप्रेक्षंत्यास्तेसुमध्यमे।नायंप्रतिवलोभी
रुराक्षसापसदोमम।सोढुंयुधिपरिस्पंदमथवासर्व्वराक्षसाः।पश्यवाहूसुवृत्तौमेहस्तिहस्तनिभाविमौ।
ऊरूपरिघसंकाशौसंहतंचाप्युरोमहत्।विक्रमंमेयथेंद्रस्यसाद्यद्रक्षसिशोभने।मावमंस्थाःपृथुश्रोणिम
त्वामामिहमानुषं॥ हिडिंवोवाच ॥नावमन्येनरव्याघ्रत्वामहंदेवरूपिणं।दृष्टप्रभावस्तुमयामानुषेष्वेव

क्षसः वैशं तथासंजल्पतस्तस्यभीमसेनस्यभारत।वाचःशुश्रावताःक्रुद्धोराक्षसःपुरुषादकः।
अवेक्षमाणस्तस्याश्चहिडिंबोमानुषंवपुः।स्रग्दामपूरितशिखंसमग्रेंदुनिभाननं।सुभ्रुनासाक्षिकेशं
तंसुकुमारनखत्वचं।सर्वाभरणसंयुक्तंसुसूक्ष्मांबरवाससं।तांतथामानुषंरूपंबिभ्रतींसुमनोहरं।पुं
स्कामांशंकमानश्चुक्रोधपुरुषादकः।संक्रुद्धोराक्षसस्तस्याभगिन्याःकुरुसत्तमा उत्फाल्यविपुले
नेत्रेततस्तामिदमब्रवीत्।कोहिमेभोक्तुकामस्यविघ्नंचरतिदुर्मतिः।नबिभेषिहिडिंबेकिंमत्कोपाद्वि
प्रमोहिता।धिक्त्वामसतिपुंस्कामेममविप्रियकारिणि।पूर्वेषांराक्ष सेंद्राणांसर्वेषामयसस्क
रि।यानिमानाश्रिताकार्षीर्विप्रियंसुमहन्मम।एषतानद्यवैसर्वान्हनिष्यामित्वयासह।एवमुक्त्वाहिडिं
बांसहिडिंबोलोहितेक्षणः।वधायाभिपपातैनांदंतैर्दंतानुपस्पृशन्।तमापतंतंसंप्रेक्ष्यभीमःप्रहरतां
वरः।भर्त्सयामासतेजस्वीतिष्ठतिष्ठेतिचाब्रवीत्॥ वैशं ॥भीमसेनस्तुतंदृष्ट्वाराक्षसंप्रहसन्निव।
भगिनींप्रतिसंक्रुद्धमिदंवचनमब्रवीत्।किंतेहिडिंबएतैर्वासुखसुप्तैःप्रबोधितैः।मामासादयदुर्बुद्धेतरसा
सात्वंनराशन।।मय्येवप्रहरेहित्वंनस्त्रियंहंतुमर्हसि।विशेषतोनपकृतेपरेणापकृतेसति।नहीयंस्ववशा

बालाकामयसद्यमामिहाचोदितैषाह्यनंगेनशरीरांतरचारिणा।भगिनीतवदुर्वृत्तरक्षसांवैयशोहरा।त्वन्नि
योगेनचैवेयंरूपंममसमीक्षच।कामयत्यद्यमांभीरुस्तवनैषापराध्यति।अनंगेनकृतेदोषेनेमांगर्हितुम
र्हसि।मयितिष्ठतिदुष्टात्मन्नस्त्रियंहंतुमर्हसि।संगच्छस्वमयासार्द्धमेकेनैकोनराशन।अहमेवनयिष्यामि
त्वामद्ययमसादनं।अद्यमद्बलनिःपिष्टंशिरोराक्षसदीर्यतां।कुंजरस्येवपादेनविनिष्पिष्टंबलीयसः।अद्य
गात्राणितेकंकाःश्येनागोमायवस्तथा।कर्षंतुभुविसंहृष्टानिहतस्यमयामृधे।क्षणेनाद्यकरिष्येहमिदंवन
मराक्षसं।पुरायद्दूषितंनित्यंत्वयाभक्षयतानरान्।अद्यत्वांभगिनीरक्षःकृष्यमाणंमयासकृत्।द्रक्ष्यत्यद्रि
प्रतीकाशंसिंहेनेवमहाद्विपं।निराबाधास्त्वयिहतेमयाराक्षसपांसन।वनमेतच्चरिष्यंतिपुरुषावनचारिणः
॥ हिडिंबउवाच ॥गर्जितेनवृथाकिंतेकत्थितेनचमानुष।कृत्वैतत्कर्म्मणासर्वंकत्थेथामाचिरंकृथाः।बलि
नंमन्यसेयच्चाप्यात्मानंसपराक्रमं।ज्ञास्यस्यद्यसमागम्यमयात्मानंबलाधिकं।नतावदेतान्हिंसिष्येस्वपंत्वेतेय
थासुखं।एषत्वामेवदुर्बुद्धेनिहन्म्यद्याप्रियंवदं।पीत्वातवासृग्गात्रेभ्यस्ततःपश्चादिमानपि।हनिष्यामिततःप
श्चादिमांविप्रियकारिणीं॥ वैशं ॥एवमुक्त्वाततोबाहुंप्रगृह्यपुरुषादकः।अभ्यद्रवतसंक्रुद्धोभीमसेनम

आ०प०
२३५

रिंदमं।तस्याभिद्रवतस्तूर्णंभीमोभीमपराक्रमः।वेगेनप्रहितंबाहुंनिजग्राहहसन्निव।निगृह्यतंबलाद्भीमो
विस्फुरंतंचकर्षह।तस्माद्देशाद्धनूंष्यष्टौसिंहःक्षुद्रमृगंयथा।ततःसराक्षसःक्रुद्धःपांडवेनबलार्दितः।भीम
सेनंसमालिंग्यव्यनदद्भैरवंरवं।पुनर्भीमोबलादेनंविचकर्षमहाबलः।माशब्दःसुखसुप्तानांभ्रातॄणांमेभवे
दिति।अन्योन्यंतौसमासाद्यविचकर्षतुरोजसा।हिडिंबोभीमसेनश्चविक्रमंचक्रतुःपरं।बभंजतुस्तदावृक्षांल्ल
ताश्चाकर्षतुस्तदा।मत्ताविवचसंरब्धौवारणौषष्टिहायनौ।तयोःशब्देनमहताविबुद्धास्तेनरर्षभाः।सह
मात्राचददृशुर्हिडिंबामग्रतःस्थितां इत्यादिपर्वणिहिडिंबवधे १४७ वैशं प्रबुद्धास्तेहि
डिंबायारूपंदृष्ट्वातिमानुषं।विस्मिताःपुरुषव्याघ्राबभूवुःपृथयासह।ततःकुंतीसमीक्ष्यैनांविस्मिता
रूपसंपदा।उवाचमधुरंवाक्यंसांत्वपूर्वमिदंशनैः।कस्यत्वंसुरगर्भाभेकावासिवरवर्णिनि।केनका
र्येणसंप्राप्ताकुतश्चागमनंतव।यदिवास्यवनस्यत्वंदेवतायदिवाप्सराः।आचक्ष्वममतत्सर्वंकिमर्थंचे
हतिष्ठसि॥ हिडिंबोवाच ॥यदेतत्पश्यसिवनेनीलमेघनिभंमहत्।निवासोराक्षसस्यैषहिडिंब
स्यममैवच।तस्यमांराक्षसेंद्रस्यभगिनींविद्धिभाविनि।भ्रात्रासंप्रेषितांमार्यत्वांसपुत्रांजिघांसितुं।

२३५

क्रूरबुद्धेरहंतस्यवचनादागतात्विहा।अद्याहंनवहेमाभंतवपुत्रंमहावलं।ततोहंसर्वभूतानांभावेवि
चरताशुभे।चोदितातवपुत्रस्यमन्मथेनवशानुगा।ततोहृतोमयाभर्त्तातवपुत्रोमहावलः।अपनेतुं
चयतितोनचैवशकितोमया।विरायमाणांमांज्ञात्वाततःसपुरुषादकः।स्वयमेवागतोहंतुमिमा
न्सर्वान्स्तवात्मजान्।सतेनममकांतेनतवपुत्रेणधीमता।वलादितोविनिःपिष्यअपनीतोमहात्मना।
विकर्षतौमहावेगौगर्ज्जमानौपरस्परं।पश्यध्वंयुधिविक्रांतवेतौचनरराक्षसौ॥ वैशम् ॥
तस्याःश्रुत्वेवचवचनमुत्पपातयुधिष्ठिरः।अर्जुनोनकुलश्चैवसहदेवश्चवीर्यवान्।तौतेददृशुरासक्तौविक
र्षतौपरस्परं।कांक्षमाणौजयंचैवसिंहाविवबलोत्कटौ।अथान्योन्यंसमाश्लिष्यविकर्षतौपुनःपुनः।दा
वाग्निधूमसदृशंचक्रतुःपार्थिवंरजः।वसुधारेणुसंवीतौवसुधाधरसन्निभौ।विभ्राजतुर्यथाशैलौ
नीहारेणाभिसंवृतौ।राक्षसेनतदाभीमंक्लिश्यमानंनिरीक्ष्यच।उवाचेदंवचःपार्थःप्रहसंछनकैरिव।
भीममाभैर्महावाहोनत्वांवुध्यामहेवयं।समेतंभीमरूपेणराक्षसाश्रमकर्शिताः।साहाय्येस्मिंस्थि
तःपार्थपातयिष्यामिराक्षसं।नकुलःसहदेवश्चमातरंगोपयिष्यतः भीमउ .उदासीनोनिरीक्ष

स्वनकार्य्यैः संभ्रमस्त्वया। नजात्वयं पुनर्जीवेन्मद्बाकृंतरमागतः   अर्जुनउ   किमनेनचिरंभीम
जीवतापापरक्षसा। गंतव्येनचिरंस्थातुमिहशक्यमरिंदम। पुरासंरज्यतेप्राचीपुरासंध्याप्रवर्त्तते। रौ
द्रेमुहूर्त्तेरक्षांसिप्रबलानिभवंतुत। त्वरस्वभीममाक्रीडजहिरक्षोविभीषणं। पुराविकुरुतेमायांभु
जयोःसारमर्प्पय   वैशं   अर्जुनेनैवमुक्तस्तुभीमोरोषाज्ज्वलन्निवा। वलमाहारयामासयद्वायो
र्जगतःक्षये। ततस्तस्यांबुदाभस्यभीमोरोषात्तुरक्षसः। उत्क्षिप्याभ्रामयद्देहंतूर्णंशतगुणंतदा ॥
भीमउवाच   वृथामांसैर्वृथापुष्टोवृथावृद्धोवृथामतिः। वृथामरणमर्हस्त्वंवृथाचनभविष्यसि। क्षे
ममद्यकरिष्यामितथावनमकंटकं। नपुनर्मानुषान्हत्वाभक्षयिष्यसिराक्षस   अर्जुनउ
यदिवामन्यसेभारंत्वमिमंराक्षसंयुधि। करोमितवसाहाय्यंशीघ्रमेषनिपात्यतां। अथवाप्यहमेवै
नंहनिष्यामिवृकोदर। कृतकर्मापरिश्रांतःसाधुतावदुपारम   वैशं   तस्यतद्वचनंश्रुत्वाभीमसे
नोत्यमर्षणः। निष्पिष्यैनंबलाद्भूमौपशुमारममारयत्। समार्यमाणोभीमेननना दविपुलस्वनं। पूर
यंस्तद्वनंसर्वंजलार्द्रइवदुंदुभिः। बाहुभ्यांयोक्त्रयित्वातंबलवान्पांडुनंदनः। मध्येभंक्त्वामहाबाहुर्ह

र्घयामासपांडवान्॥हिडिंबंनिहतंदृष्ट्वासंहृष्टास्तेतरस्विनः॥अपूजयन्नरव्याघ्रंभीमसेनमरिंदमं॥अ
भिपूज्यमहात्मानंभीमंभीमपराक्रमं॥पुनरेवार्जुनोवाक्यमुवाचेदंवृकोदरं॥नदूरेनगरंमन्येवनादस्मा
दहंविभो॥शीघ्रंगच्छामभद्रंतेननोविद्यात्सुयोधनः॥ततःसर्वेतथेत्युक्त्वामात्रासहमहारथाः॥प्रय
युःपुरुषव्याघ्राहिडिंबाचैवराक्षसी इत्यादिपर्वणिहिडिंबवधः १४८ ॥भीमसेनउ॥ ॥
स्मरंतिवैरिरक्षांसिमायामाश्रित्यमोहिनीं॥हिडिंबेव्रजपंथानंत्वमिमंभ्रातृसेवितं॥ युधिष्ठिरउ
॥ क्रुद्धोपिपुरुषव्याघ्रभीममास्मस्त्रियंवधीः॥शरीरगुप्त्याभ्यधिकंधर्मंगोपायपांडव॥वधाभि
प्रायमायांतमवधीस्त्वंमहाबलं॥रक्षसस्तस्यभगिनीकिंनःक्रुद्धाकरिष्यति॥ वैशं हिडिंबा
तुततःकुंतीमभिवाद्यकृतांजलिः॥युधिष्ठिरंतुकौंतेयमिदंवचनमब्रवीत्॥आर्येजानासियद्दुःखमि
हस्त्रीणामनंगजं॥तदिदंमामनुप्राप्तंभीमसेनकृतंशुभे॥सोढंतत्परमंदुःखंमयाकालप्रतीक्षया॥
सोयमभ्यागतःकालोभवितामेसुखोदयः॥मयाह्युत्सृज्यसुहृदःस्वधर्मंस्वजनंतथा॥वृतोयंपुरुषव्या
घ्रस्तवपुत्रःपतिःशुभे॥वीरेणाहंतथानेनत्वयाचापियशस्विनि॥प्रत्याख्यातानजीवामिसत्यमेत

ब्रवीमिते।तदर्हसि कृपां कर्त्तुं मे त्वं वैवरवर्णिनी॥ मत्वा मूढेति तन्मां त्वं भक्ता वानुगतेति वा। भर्त्रानेनम
हाभागे संयोजय सुतेन ह। तमुपादाय गच्छेयं यथेष्ठं देवरूपिणं। पुनश्चैवानयिष्यामि विश्रंभं कुरु मे शु
भे। अहं हि मनसा ध्याता सर्वान्नेष्यामि वः सदा। वृजिनात्तारयिष्यामि दुर्गेषु विषमेषु च। पृष्ठेन वो वहिष्या
मि शीघ्रां गतिमभीप्सतः। यूयं प्रसादं कुरुत भीमसेनो भजेत मां। आपदस्तरणे प्राणान्धारयेद्येन तेन
वा। धर्ममाहृत्य कर्त्तव्यं तं धर्ममनुवर्त्तता। आपत्सु यो धारयति धर्मं धर्मविदुत्तमः। व्यसनं ह्येव धर्म
स्य धर्मिणामापदुच्यते। पुण्यं प्राणान्धारयति पुण्यं प्राणदमुच्यते। येन येनाचरेद्धर्मं तस्मिन्गर्हा न विद्य
ते युधिष्ठिर उ एवमेतद्यथात्थ त्वं हिडिंबे नात्र संशयः। स्थातव्यं तु त्वया सत्ये यथा ब्रूयाः सुमध्यमे
। स्नातं कृताह्निकं भद्रे कृतकौतुकमंगलं। भीमसेनं भजेथास्त्वं प्रागस्तगमनाद्रवेः। अहःसु विहरानेन
यथाकामं मनोजवा। अयं त्वानयितव्यस्ते भीमसेनः सदा निशि॥ वैशं ॥ तथेति तत्प्रतिज्ञाय भीम
सेनोब्रवीदिदं। शृणु राक्षसि सत्येन समयं ते वदाम्यहं। यावत्कालेन भवति पुत्रस्योत्पादनं शुभे। तावत्का
लं गमिष्यामि त्वया सह सुमध्यमे वैशं तथेति तत्प्रतिज्ञाय हिडिंबा राक्षसी तदा। भीमसेनमुपा

दायसोर्द्ध्वमाचक्रमेततः।शैलशृंगेषुरम्येषुदेवतायतनेषुच।मृगपक्षिविघुष्टेषुरमणीयेषुसर्वदा।
कृत्वाचरूपंपरमंसर्वाभरणभूषिता।संजल्पंतीसुमधुरंरमयामासपांडवं।तथैववनदुर्गेषुपुष्पित
द्रुमसानुषु।सरःसुरमणीयेषुपद्मोत्पलयुतेषुच।नदीद्वीपप्रदेशेषुवैडूर्यसिकतासुच।सुतीर्थव
नतोयासुतथागिरिनदीषुच।काननेषुविचित्रेषुपुष्पितद्रुमवल्लिषु।हिमवद्गिरिकुंजेषुगुहासुविवि
धासुच।प्रफुल्लशतपत्रेषुसरस्स्वमलवारिषु।सागरस्यप्रदेशेषुमणिहेमचितेषुच।पल्वलेषुचरम्ये
षुमहाशालवनेषुच।देवारण्येषुपुण्येषुतथापर्वतसानुषु।गुह्यकानांनिवासेषुतापसायतनेषुच।सर्व
र्तुफलरम्येषुमानसेषुसरःसुच।विभ्रतीपरमंरूपंरमयामासपांडवं।रमयंतीतथाभीमंतत्रतत्रमनोज
वा।प्रजज्ञेराक्षसीपुत्रंभीमसेनान्महाबलं।विरूपाक्षंमहावक्त्रंशंकुकर्णंविभीषणं।भीमनादंसुताम्रो
ष्ठंतीक्ष्णदंष्ट्रंमहाबलं।महेष्वासंमहावीर्यंमहासत्वंमहाभुजं।महाजवंमहाकायंमहामायमरिंदमं।
दीर्घघोणंमहोरस्कंविकटोद्बद्धपिंडिकं।अमानुषंमानुषजंभीमवेगंमहाबलं।यःपिशाचानतीत्यान्यान्
बभूवातीवराक्षसान्।बालोपियौवनंप्राप्तोमानुषेषुविशांपते।सर्वास्त्रेषुपरंवीरःप्रकर्षमगमद्बली।

सद्योहिगर्भान्राक्षस्योलभंतेप्रसवंतिच।कामरूपधराश्चैवभवंतिवहुरूपिकाः।प्रणम्यसपितुःपादौ
वगृह्णान्सपितुस्तदा।मातुश्चपरमेष्वासस्तौचनामास्यचक्रतुः।घटोहास्योत्कचइतिमातातंप्रत्य
भाषत।अब्रवीत्तेननामास्यघटोत्कचइतिस्मह।अनुरक्तश्चतानासीत्पांडवान्सघटोत्कचः।तेषां
चदयितोनित्यमात्मनित्योवभूवह।संवाससमयोजीर्णइत्याभाष्यततस्तुतान्।हिडिंवासमयंकृत्वा
~~अंतोमृगगणाच्छ्रु~~स्वांगतिंप्रत्यपद्यत।कृतकालमुपस्थास्येपितॄनितिघटोत्कचः।आमंत्र्यराक्षसा
श्रेष्ठःप्रतस्थेचोत्तरांदिशं।सहिसृष्टोमघवताशक्तिहेतोर्महात्मना।कर्णस्याप्रतिवीर्यस्यप्रतियोद्धा
महारथः इत्यादिपर्वणिघटोत्कचोत्पत्तिः १४९ वैशं तेवनेनवनंगत्वाघ्नंतोमृगगणान्ब
हून्।अपक्रम्यययूराजंस्त्वरमाणामहारथाः।मत्स्यांस्त्रिगर्तान्पांचालान्कीचकानंतरेणच।रमणीया
थनोद्देशान्प्रेक्षमाणाःसरांसिच।जटाःकृत्वात्मनःसर्वेवल्कलाजिनवाससः।सहकुंत्यामहात्मानोवि
भ्रतस्तापसंवपुः।क्वचिद्वहंतोजननींत्वरमाणामहारथाः।क्वचिच्छंदेनगच्छंतस्तेजग्मुःप्रसभंपुनः।ब्रा
ह्मंवेदमधीयानावेदांगानिचसर्वशः।नीतिशास्त्रंचधर्मज्ञाददृशुस्तेपितामहं।तेभिवाद्यमहात्मानंकृ

ष्णद्वैपायनं तदा। तस्थुः प्रांजलयः सर्वे सह मात्रा परंतपाः॥ व्यासउवाच ॥मयेदं व्यसनं पूर्वं विदि
तं भरतर्षभाः। यथा तु तैरधर्मेण धार्त्तराष्ट्रैर्विवासिताः। तद्विदित्वास्मि संप्राप्तश्चिकीर्षुः परमं हितं। न वि
षादोत्र कर्त्तव्यः सर्वमेतत्सुखाय वः। समास्ते चैव मे सर्वे यूयं चैव न संशयः। दीनतो बालतश्चैव स्नेहं कु
र्वन्ति मानवाः। तस्मादभ्यधिकः स्नेहो युष्मासु मम सांप्रतं। स्नेहपूर्वं चिकीर्षामि हितं वस्तन्निबोधत। इदं
नगरमभ्यासे रमणीयं निरामयं। वसतेह प्रतिछन्ना ममागमनकांक्षिणः वैशं एवं स तान्समा
श्वास्य व्यासः सत्यवतीसुतः। एकचक्रामभिगतः कुंतीमाश्वासयत्प्रभुः॥ व्यासउ जीवपुत्रि सुतस्तेयं
धर्मपुत्रो युधिष्ठिरः। धर्मेण पृथिवीं जित्वा महात्मा पुरुषर्षभः। पृथिव्यां पार्थिवान्सर्वान्प्रशासिष्यति धर्मरा
ट्। पृथिवीमखिलां जित्वा सर्वां सागरमेखलां। भीमसेनार्जुनबलाद्भोक्ष्यते नात्र संशयः। पुत्रास्तव च माद्र्या
श्च सर्व एव महारथाः। स्वराष्ट्रे विहरिष्यंति सुखं सुमनसः सदा। यक्ष्यंति च नरव्याघ्रा निर्जित्य पृथिवीमिमां।
राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः। अनुगृह्य सुहृद्वर्गं भोगैश्वर्यसुखेन च। पितृपैतामहं राज्यमिम
भोक्ष्यंति ते सुताः वैशं एवमुक्त्वा निवेश्यैनान्ब्राह्मणस्य निवेशने। अब्रवीत्पांडवश्रेष्ठमृषिर्द्वैपाय

नस्तदा।इहमांसंप्रतीक्षध्वमागमिष्याम्यहं पुनः।देशकालौ विदित्वैवंलप्स्यध्वंपरमांमुदं।सतैःप्रांजलिभिः
सर्वैस्तथेत्युक्तोनराधिप।जगाम भगवान्व्यासोयथागतमृषिःप्रभुः॥ इत्यादिपर्वणिएकचक्राप्र
वेशोव्याससंदर्शनम् १५० जनमेजयउ एकचक्रांगतास्तेतुकुंतीपुत्रामहारथाः।अतऊर्ध्वंद्वि
जश्रेष्ठकिमकुर्वतपांडवाः वैशंप्र एकचक्रांगतास्तेतुकुंतीपुत्रामहारथाः।ऊषुर्नातिचिरंकालंब्रा
ह्मणस्यनिवेशने।रमणीयानिपश्यंतोवनानिविविधानिच।पार्थिवानपिचोद्देशान्सरितश्चसरांसिच।चे
रुर्भैक्ष्यंतदातेतुसर्वएवविशांपते।बभूवुर्नागराणांचस्वैर्गुणैःप्रियदर्शनाः।निवेदयंतिस्मतदाकुंत्यामै
क्ष्यंसदानिशि।तयाविभक्तान्भागांस्तेभुंजतेस्मपृथक्पृथक्।अर्धंतेभुंजतेवीराःसहमात्राःपरंतपाः।अ
र्धंभैक्ष्यस्यसर्वस्यभीमोभुंक्तेमहाबलः।तथातुतेषांसर्वेषांतस्मिन्राष्ट्रेमहात्मनां।अतिचक्रामसुमहान्का
लोथभरतर्षभ।ततःकदाचिद्भैक्ष्यायगतास्तेभरतर्षभाः।संगत्याभीमसेनस्तुतत्रास्तेपृथयासह।अथार्तिजं
महाशब्दंब्राह्मणस्यनिवेशने।भृशमुत्पतितंघोरंकुंतीशुश्रावभारत।रोरूयमाणांस्तान्दृष्ट्वापरिदेवयत
श्चसा।कारुण्यात्साधुभावाच्चकुंतीराजन्नचक्षमे।मथ्यमानेवदुःखेनहृदयेनपृथातदा।उवाचभीमंक

ल्याणीकृपान्वितमिदंवचः।वसामसुसुखंपुत्रब्राह्मणस्यनिवेशने।अज्ञाताधार्त्तराष्ट्रस्यसत्कृतावीतमन्यवः।
साचिंतयेसदापुत्रब्राह्मणस्यास्यकिंन्वहं।प्रियंकुर्य्यामितिगृहेयत्कुर्युरुषिताःसुखं।एतावान्पुरुषस्तात
कृतंयस्मिन्ननश्यति।यावच्चकुर्य्यादन्योस्यकुर्यादभ्यधिकंततः।नदिदंब्राह्मणस्यास्यदुःखमापतितंध्रु
वं।तत्रास्ययदिसाहाय्यंकुर्य्यांसुपकृतंभवेत्॥ भीमसेनउ ॥ज्ञायतामस्ययद्दुःखंयतश्चैवसमु
त्थितं।विदित्वाव्यवसिष्यामियद्यपिस्यात्सुदुष्करं वैशं एवंतौकथयन्तौचभूयःशुश्रुवतुःस्वनं।
आर्त्तिजंतस्यविप्रस्यसभार्यस्यविशांपते।अन्तःपुरंततस्तस्यब्राह्मणस्यमहात्मनः।विवेशत्वरिताकुंती
बद्धवत्सेवसौरभी।ततस्तंब्राह्मणंतत्रभार्ययाचसुतेनच।दुहित्राचैवसहितंददर्शविनताननं॥ ब्राह्म
णउवाच धिगिदंजीवितंलोकेगतसारमनर्थकं।दुःखमूलंपराधीनंभृशमप्रियभागिच।जीवितेपर
मंदुःखंजीवितेपरमोज्वरः।जीवितेवर्त्तमानस्यदुःखानामागमोध्रुवः।आत्माह्येकोहिधर्मार्थौकामंचैव
निषेवते।एतैश्चविप्रयोगोपिदुःखंपरमकंमतं।आहुःकेचित्परंमोक्षंसचनास्तिकथंचनः।अर्थप्राप्तौतु
नरकःकृत्स्नएवोपपद्यते।अर्थेप्सुतापरंदुःखमर्थप्राप्तौततोधिकं।जातस्नेहस्यचार्थेषुविप्रयोगेमहत्तरं।

नहियोगं प्रपश्यामि येन मुच्येयमापदः। पुत्रदारेण वा सार्द्धं प्राड्वेयमनामयं। यतितं वै मया पूर्वं येन्छु(?)ज्ञा
लणि तत्तथा। क्षेमं यतस्ततो गंतुं त्वया तु मम नश्रुतं। इह ज्ञातानि दृष्ट्वा सि पिता चापि ममेति वै। उक्तवत्य
सि दुर्मेधे यान्ममानामया स(?)कृतं। स्वर्गतो हि पिता हृद्धस्तथा माता चिरंतव। बांधवा भूतपूर्वाश्च तत्र वासे तु
कारतिः। सोयं ते बंधुकामाया अश्रुत्वैव त्वया वचो मम। बंधुप्रणाशः संप्राप्तो भृशं दुःखकरो मम। अथवा
मद्विनाशोयं न हि शक्ष्यामि किंचन। परित्यक्तुमहं बंधुं स्वयं जीवन्नृशंसवत्। सहधर्मचरां दान्तां नित्यं मा
तृसमां मम। सखायं विहितां देवैर्नित्यं परमिकां गतिं। पित्रा मात्रा च विहितां सदा गार्हस्थ्यभागिनीं। व
रयित्वा यथान्यायं मंत्रवत्परिणीय च। कुलीनां शीलसंपन्नाम पत्यजननीमपि। त्वामहं जीवितस्या
र्थे साध्वीमनपकारिणीं। परित्यक्तुं न शक्ष्यामि भार्यां नित्यमनुव्रतां। कुत एव परित्यक्तुं सुतं शक्ष्याम्य
हं स्वयं। बालमप्राप्तवयसमजातव्यंजनाकृतिं। भर्तुरर्थाय निक्षिप्तां न्यासं धात्रा महात्मना। ययादौ
हित्रजांल्लोकान्‌शंसे पितृभिः सह। स्वयमुत्पाद्य तां बालां कथमुत्स्रष्टुमुत्सहे। मन्यंते केचिदधिकं
स्नेहं पुत्रे पितुर्नराः। कन्यायां केचिदपरे मम तुल्यावुभौ स्मृतौ। यस्मां लोकाः प्रसूतिश्च स्थितानि

स्यमतिःसुखं।अपापांतामहंवालांकथंमुत्स्रष्टुमुत्सहे।आत्मानमपिचोत्सृज्यतप्स्यामिपरलोकगः।त्य
क्त्वाह्येनेमयाक्षुद्रैर्नेहशक्यंहिजीवितुं।एषांचान्यतमत्यागोनृशंसोगर्हितोबुधैः।आत्मत्यागेकृतेचे
मेमरिष्यंतिमयाविना।सकृच्छ्रामहमापन्नोनशक्तस्तर्तुमापदं।अहोधिक्कांगतिंत्वद्यगमिष्यामिसवां
धवः।सर्वैःसहमृतंश्रेयोनचमेजीवितंक्षमं॥ इत्यादिपर्वणिवकवधे १५१ ब्राह्मण्युवाच ॥
नसंतापस्त्वयाकार्यःप्राकृतेनेवकर्हिचित्।नहिसंतापकालोयंवैद्यस्यतवविद्यते।अवश्यंनिधनंसर्वैर्ग
न्तव्यमिहमानवैः।अवश्यभाविन्यर्थेवैसंतापोनेहविद्यते।भार्यापुत्रोथदुहितासर्वमात्मार्थमिष्यते।व्य
थांजहिसुवुध्यात्वंस्वयंयास्यामितत्रचा।एतद्धिपरमंनार्याःकार्यंलोकेसनातनं।प्राणानपिपरित्यज्ययद्
भर्तृहितमाचरेत्।तच्चतत्रकृतंकर्मतवापीदंसुखावहं।भवत्यमुत्रचाक्षय्यंलोकेस्मिंश्चयशस्करं।एषचै
वगुरुर्धर्मोयंप्रवक्ष्याम्यहंतव।अर्थश्चतवधर्मश्चभूयानत्रप्रदृश्यते।यदर्थमिष्यतेभार्याप्राप्तःसोर्थस्त्व
यामयि।कन्याचैकाकुमारश्चकृताहमनृणात्वया।समर्थःपोषणेचासिसुतयोरक्षणेतथा।नत्वहंसुत
योःशक्तातथारक्षणपोषणे।ममहित्वद्विहीनायाःसर्वप्राणधनेश्वर।कथंस्यातांसुतौवालौभवेयंचकथं

त्वहं।कथंहिविधवानाथावालपुत्राविनात्वया।मिथुनंजीवयिष्यामिस्थितासाधुगतेपथि।अहंहिकृता
वलिप्तैश्चप्रार्थ्यमानामिमांसुतां।अयुक्तैस्तवसंबंधेकथंशक्ष्यामिरक्षितुं।उत्सृष्टमामिषंभूमौप्रार्थयंति
यथाखगाः।प्रार्थयंतिजनाःसर्वेपतिहीनांतथास्त्रियं।साहंविचाल्यमानावैप्रार्थ्यमानादुरात्मभिः।
स्थातुंपथिनशक्ष्यामिसज्जनेष्टेद्विजोत्तम।कथंतवकुलस्यैकामिमांवालांकृतागसं।पितृपैतामहेमा
र्गेनियोक्तुमहमुत्सहे।कथंशक्ष्यामिवालेस्मिन्गुणानाधातुमीप्सितान्।अनाथेसर्वतोलुप्तेयथात्वंधर्म
दर्शिवान्।इमामपिचतेवालामनाथांपरिभूयमाम्।अनर्हाःप्रार्थयिष्यंतिशूद्रावेदश्रुतिंयथा।तांचेदहं
नदित्सेयंत्वद्गुणैरुपबृंहितां।प्रमथ्यैनांहरेयुस्तेहविर्ध्वांक्षइवाध्वरात्।संप्रेक्षमाणापुत्रंतेनानुरूपमिवा
त्मनः।अनर्हवशमापन्नामिमांचापिसुतांतव।अवज्ञातावलोकेषुतथात्मानमजानती।अवलिप्तैर्नरैर्ब्र
ह्मन्मरिष्यामिनसंशयः।तौचहीनौमयावालौत्वयाचैवतथात्मजौ।विनश्येतांनसंदेहोमत्स्याविवजल
क्षये।त्रितयंसर्वथाप्येवंविनशिष्यत्यसंशयं।त्वयाविहीनंतस्मात्त्वंमांपरित्यक्तुमर्हसि।व्युष्टिरेषापरा
स्त्रीणांपूर्वंभर्तुःपरांगतिं।गंतुंब्रह्मन्सपुत्राणामितिधर्मविदोविदुः।परित्यक्तःसुतश्चायंदुहितेयंतथाम

२४१

याबांधवाश्चपरित्यक्तास्त्वदर्थंजीवितंचमे।यज्ञैस्तपोभिर्नियमैर्दानैश्चविविधैस्तथा।विशिष्यतेस्त्रिया
भर्तुर्नित्यंप्रियहितेस्थितिः।नदिदंयच्चिकीर्षामिधर्म्मपरमसंमतं।इष्टंचैवहितंचैवतवचैवकुलस्यच।इष्टा
निचाप्यपत्यानिद्रव्याणिसुहृदःप्रियाः।आपद्धर्मप्रमोक्षायभार्याचापिसतांमतं।आपदर्थेधनंरक्षेद्दारान्र
क्षेद्धनैरपि।आत्मानंसततंरक्षेद्दारैरपिधनैरपि।दृष्टादृष्टफलार्थंहिभार्यापुत्रोधनंगृहं।सर्वमेतद्विधात
व्यंबुधानामेषनिश्चयः।सकृत्धर्मयाकार्यंतारयात्मानमात्मना।अनुजानीहिमामार्यसुतौमेपरिपालय।
अवध्यांस्त्रियमित्याहुर्धर्मज्ञाधर्मनिश्चये।धर्मज्ञाव्राह्मसानाहुर्नहन्यात्सचमामपि।निःसंशयंवधःपुंसांस्त्री
णांसंशयितोवधः।अतोमामेवधर्मज्ञप्रस्थापयितुमर्हसि।भुक्तंप्रियाण्यवाप्तानिधर्मश्चचरितोमहान्।त्वत्प्र
सूतिःप्रियाप्राप्तानमांतप्यत्यजीवितं।जातपुत्राचवृद्धाचप्रियकामाचतेसदा।समीक्ष्यैतदहंसर्वंव्यवसायंक
रोम्यतः।उत्सृज्यापिहिमामार्यप्राप्स्यस्यन्यामपिस्त्रियं।ततःप्रतिष्ठितोधर्मोभविष्यतिपुनस्तव।नचाप्यधर्मः
कल्याणबहुपत्नीकृतांनृणां।स्त्रीणामधर्मःसुमहान्भर्तुःपूर्वस्यलंघने।एतत्सर्वंसमीक्ष्यत्वमात्मत्यागंचग
र्हितं।आत्मानंतारयाद्याशुकुलंचेमौचदारकौ वैशं एवमुक्तस्तयाभर्त्तातांसमालिंग्यभारत।मुमोच

आ०प०
२४२

वाष्पंशनकैःसभार्योभृशदुःखितः॥ ॥इत्यादिपर्वणिबकवधः॥ १५२ वैशं तयोर्दुःखितयोर्वा
क्यमतिमात्रंनिशम्यतु।ततोदुःखपरीतांगीकन्यातावभ्यभाषत।किमेवंभृशदुःखार्त्तौरोरूयेथामनाथव
त्।ममापिश्रूयतांवाक्यंश्रुत्वाचक्रियतांक्षमं।धर्मतोहंपरित्याज्यायुवयोर्नात्रसंशयः।त्यक्तव्यांमांपरि
त्यज्यत्राहिसर्वंमयैकया।इत्यर्थमिष्यतेपत्यंतारयिष्यतिमामिति।अस्मिन्नुपस्थितेकालेनरध्वंप्लववन्म
या।इहवातारयेदुर्गादुतवाप्रेत्यभारत।सर्वथातारयेत्पुत्रःपुत्रइत्युच्यतेबुधैः।आकांक्षंतेचदौहित्रान्म
यिनित्यंपितामहाः।तान्स्वयंवैपरित्रास्येरक्षंतीजीवितंपितुः।आताचममबालोयंगतेलोकममुंत्वयि
।अचिरेणैवकालेनविनश्येतनसंशयः॥ ताते पिहिगतेस्वर्गंविनष्टेचममानुजे।पिंडःपितॄणांव्युछिद्ये
ततेषांविप्रियंभवेत्।पित्रात्यक्तातथामात्राभ्रात्राचाहमसंशयं।दुःखाद्दुःखतरंप्राप्यम्रियेयमतथोचि

२४२

ता।त्वयित्वरोगेनिर्मुक्तेमाताभ्राताचमेशिशुः।संतानश्चैवपिंडश्चप्रतिष्ठास्यत्यसंशयं।आत्मापुत्रःसखा
भार्याकृच्छ्रंतुदुहिताकिल।सकृच्छ्रान्मोचयात्मानंमांचधर्मेनियोजय।अनाथाकृपणाबालायत्रक्वच
नगामिनी।भविष्यामित्वयाताతविहीनाकृपणासदा।अथवाहंकरिष्यामिकुलस्यास्यविमोचनं।फ

लसंस्थाभविष्यामिकृत्वाकर्मसुदुष्करं।अथवायास्यसेत्वत्वत्पत्न्कामांद्विजसत्तम।पीडिताहंभविष्यामित
द्वेषस्त्वमामपि।तदस्मदर्थंधर्म्मार्थंप्रसवार्थंचसत्तम।आत्मानंपरिरक्षस्वत्यक्तव्यांमांचसंसृज।अव
श्यपकरणीयेचमात्वांकालोत्यगादयं।किंत्वतःपरमंदुःखंयदहंस्वर्गतेत्वयि।याच्यमानाःपरादन्नंपरि
धावेमश्ववत्।त्वयित्वरोगनिर्मुक्तेक्लेशादस्मात्सबांधवे।अमृतेवसतीलोकेभविष्यामिसुखान्विता
।इतःप्रदानेदेवाश्चपितरश्चेतिनःश्रुतं।त्वयादत्तेननतोयेनभविष्यन्तिहितायवै वैशं एवंबहुविधं
तस्यानिशम्यपरिदेवितं।पितामाताचसाचैवकन्याप्ररुरुदुस्त्रयः।ततःप्ररुदितान्सर्वान्निशम्याथसुतस्तदा।
उत्फुल्लनयनोबालःकलमव्यक्तमब्रवीत्।इह संनिहितं बकं मापितोरुदमामातर्मास्वसस्त्वितिचाब्रवीत्।
प्रहसन्निवसर्वांस्तानेकैकमुपसर्प्पति।ततःसतृणमादायप्रहृष्टःपुनरब्रवीत्।अनेनाहंहनिष्यामिराक्षसं
पुरुषादकं।तथापितेषांदुःखेनपरीतानांनिशम्यतत्।बालस्यवाक्यमव्यक्तंहर्षःसमभवन्महान्।अयंका
लइतिज्ञात्वाकुंतीसमुपसृत्यतान्।गतासूनमृतेशौकंनेवजीवयन्तीदमब्रवीत् इत्यादिपर्व्वणिबकव
धे १५२ कुंत्युवाच कुतोमूलमिदंदुःखंज्ञातुमिच्छामितत्वतः।विदित्वाप्यपकर्षेयंशक्यंचेदप

कर्षितुं ब्राह्मणेन उपपन्नं सतामेतद्यद्ब्रवीषि तपोधने। ननु दुःखमिदं शक्यं मानुषेणापोहितुं।
समीपे नगरस्यास्य बको वसति राक्षसः ईशो जनपदस्यास्य पुरस्य च महाबलः। पुष्टो मानुषमांसेन दुर्बु
द्धिः पुरुषादकः। रक्षत्यसुरराण्नित्यमिमं जनपदं बली। नगरं चैव देशं च रक्षोबलसमन्वितं। तत्कृते परचक्राच्च
भूतेभ्यश्च न नो भयं। वेतनं तस्य विहितं शालिवाहस्य भोजनं। महिषौ पुरुषश्चैको यस्तदादाय गच्छति। एकै
कश्चापि पुरुषस्तत्प्रयच्छति भोजनं। स वारो बहुभिर्वर्षैर्भवत्यसुकरो नरैः। तद्विमोक्षाय ये केचिद्यतंति पु
रुषाः क्वचित्। सपुत्रदारांस्तान्हत्वा तद्रक्षो भक्षयत्युत। वेत्रकीयगृहे राजा नायं नयमिहास्थितः। उपायं
तं न कुरुते यत्नादपि स मंदधीः। अनामयं जनस्यास्य येन स्यादद्य शाश्वतं। एतदर्हा वयं नूनं वसामो दुर्बल
स्य ये। विषये नित्यमुद्विग्नाः कुराजानमुपाश्रिताः। ब्राह्मणाः कस्य वक्तव्याः कस्य वा छंदचारिणः। गुणैरेते हि
वत्स्यंते कामगाः पक्षिणो यथा। राजानं प्रथमं विंदेत्ततो भार्यां ततो धनं। त्रयस्य संचयेनास्य ज्ञातीन्पुत्रांश्च ता
रयेत्। विपरीतं मया चेदं त्रयं सर्वमुपार्जितं। तदिमामापदं प्राप्य भृशं तप्यामहे वयं। सोयमस्माननुप्राप्तो
वारः कुलविनाशनः। भोजनं पुरुषश्चैकः प्रदेयं वेतनं मया। न च मे विद्यते वित्तं संक्रेतुं पुरुषं क्वचित्। सु

हृज्जनंप्रदातुंचनशक्यामिकदाचन।गतिंचैवनपश्यामितस्मान्मोक्षायरक्षसः।सोहंदुःखार्णवेमग्नो
महत्यसुकरेभृशं।सहैवैतैर्गमिष्यामिबांधवैरद्यराक्षसीं।ततोनःसहितान्क्षुद्रःसर्वानेवोपभोक्ष्यति॥ ॥
इत्यादिपर्वणिबकवधे १५४ कुंत्युवाच नविषादस्त्वयाकार्योभयादस्मात्कथंचन।उपायः
परिदृष्टोत्रतस्मान्मोक्षायरक्षसः।एकस्तवसुतोबालःकन्याचैकातपस्विनी।नचैतयोस्तथापत्न्यागमनं
नवरोचये।ममपंचसुताब्रह्मंस्तेषामेकोगमिष्यति।त्वदर्थंबलिमादायतस्यपापस्यरक्षसः ब्राह्मणउ
वाच नाहमेतत्करिष्यामिजीवितार्थीकथंचन।ब्राह्मणस्यातिथेश्चैवस्वार्थेप्राणान्वियोजयन्।नत्वेत
दकुलीनासुनाधर्म्मिष्ठासुविद्यते।यद्ब्राह्मणार्थेविसृजेदात्मानमपिचात्मजं।आत्मनस्तुमयाश्रेयोबोद्ध
व्यमितिरोचये।ब्रह्मवध्यात्मवध्यावाश्रेयोनात्मवधोमम।ब्रह्मवध्यापरंपापंनिष्कृतिर्न्नात्रविद्यते।अबु
द्धिपूर्वंकृत्वापिवरमात्मवधोमम।नत्वहंवधमाकांक्षेस्वयमेवात्मनःशुभे।परैःकृतेवधेपापंनकिंचिन्म
यिविद्यते।अभिसंधिकृतेतस्मिन्ब्राह्मणस्यवधेमया।निष्कृतिंनप्रपश्यामिनृशंसंक्षुद्रमेवच।आग
तस्यगृहंत्यागस्तथैवशरणार्थिनः।याचमानस्यचवधोनृशंसोगर्हितोबुधैः।कुर्य्यान्ननिंदितंकर्म्मनर

शंसंकथंचन। इतिपूर्वैर्महात्मानआपद्धर्मविदोविदुः। श्रेयांस्तुसहदारस्यविनाशोद्यममस्वयं। ब्राह्म
णस्यवधंनाहमनुमंस्येकदाचन कुंत्युवाच ममाप्येषामतिर्ब्रह्मन्विप्रारक्ष्याइतिस्थिरा। नचा
प्यनिष्टःपुत्रोमेयदिपुत्रशतंभवेत्। नचासौराक्षसःशक्तोममपुत्रविनाशने। वीर्यवान्मंत्रसिद्धश्चतेज
स्वीचसुतोमम। राक्षसायचतत्सर्वंप्रापयिष्यतिभोजनं। मोक्षयिष्यतिचात्मानमितिमेनिश्चितामतिः। स
मागताश्चवीरेणदृष्टपूर्वाश्चराक्षसाः। बलवंतोमहाकायानिहताश्चाप्यनेकशः। नत्विदंकेषुचिद्ब्रह्मन्व्या
हर्तव्यंकथंचन। विद्यार्थिनोहिमेपुत्रान्विप्रकुर्युःकुतूहलात्। गुरुणाचाननुज्ञातोग्राहयेद्यंसुतोमम।
नसकुर्यात्तथाकार्यंविद्ययेतिसतांमतं। एवमुक्तस्तुपृथयासविप्रोभार्ययासह। हृष्टःसंपूजयामास
तद्वाक्यममृतोपमं। ततःकुंतीचविप्रश्चसहितावनिलात्मजं। तमब्रूतांकुरुष्वेतिसतथेत्यब्रवीच्चतौ ॥
इत्यादिपर्वणिबकवधे १५५ वैशं करिष्यइतिभीमेनप्रतिज्ञातेथभारत। आजग्मुस्तेततःसर्वे
भैक्षमादायपांडवाः। आकारेणैवतंज्ञात्वापांडुपुत्रोयुधिष्ठिरः। रहःसमुपविश्यैकस्ततःपप्रच्छमातरं
॥ युधिष्ठिरउ ॥ किंचिकीर्षत्ययंकर्मभीमोभीमपराक्रमः। भवत्यनुमतेकच्चित्स्वयंवाकर्तुमिच्छति

॥ कुंत्युवाच ॥ ममैव वचनादेष करिष्यति परंतपः। ब्राह्मणार्थे महत्कृत्यं मोक्षाय नगरस्य च॥ ॥
युधिष्ठिर उ॰ किमिदं साहसं तीक्ष्णं भवत्या दुष्करं कृतं। परित्यागं हि पुत्रस्य न प्रशंसंति साधवः। कथं पर
सुतस्यार्थे स्वसुतं त्यक्तुमिछति। लोकवेदविरुद्धं हि पुत्रत्यागात्कृतं त्वया। यस्य बाहू समाश्रित्य सुखं सर्वे
शयामहे। राज्यं चापहृतं क्षुद्रैराजिहीर्षामहे पुनः। यस्य दुर्योधनो वीर्यं चिंतयन्नमितौजसः। न शेते रजनीः सर्वा
दुःखाछकुनिना सह। यस्य वीरस्य वीर्येण मुक्ता जतुगृहाद्वयं। अन्येभ्यश्चैव पापेभ्यो निहतश्च पुरोचनः। यस्य वी
र्यं समाश्रित्य वसुपूर्णां वसुंधरां। इमां मन्यामहे प्राप्तां निहत्य धृतराष्ट्रजान्। तस्य व्यवसितस्त्यागो बुद्धिमास्था
य कां त्वया। कच्चिन्नु दुःखैर्बुद्धिस्ते विलुप्ता गतचेतसः॥ कुंत्युवाच ॥ युधिष्ठिर न संतापस्त्वया कार्यो वृको
दरं। न चायं बुद्धिदौर्बल्याद्व्यवसायः कृतो मया। इह विप्रस्य भवने वयं पुत्र सुखोषिताः। अज्ञाता धार्तराष्ट्रा
णां सत्कृता वीतमन्यवः। तस्य प्रतिक्रिया पार्थ मयेयं प्रसमीक्षिता। एतावानेव पुरुषः कृतं यस्मिन्न नश्यति। या
वच्च कुर्यादन्योस्य कुर्याद्बहुगुणं ततः। दृष्ट्वा भीमस्य विक्रांतं तदा जतुगृहे महत्। हिडिंबस्य वधाच्चैव विश्वासो
मे वृकोदरे। बाह्वोर्बलं हि भीमस्य नागायुतसमं महत्। येन यूयं गजप्रख्या निर्व्यूढा वारणावतात्। वृकोदरे

णास[illegible]दृशोबलेनान्योनविद्यते।योव्यतीयाद्युधिश्रेष्ठमपिवज्रधरंस्वयं।जातमात्रःपुराचैषममांकात्पति
तोगिरौ।शरीरगौरवादस्यशिलागात्रैर्विचूर्णिता।नदहंप्रज्ञयाज्ञात्वाबलंभीमस्यपांडव।प्रतिकार्येचविप्रस्य
ततःकृतवतीमतिं।नेदंलोभान्नचाज्ञानान्नचमोहाद्विनिश्चितं।बुद्धिपूर्वंतुधर्मस्यव्यवसायःकृतोमया।अर्थौ
द्वावपिनिष्पन्नौयुधिष्ठिरभविष्यतः।प्रतीकारश्चवासस्यधर्मश्चचरितोमहान्।योब्राह्मणस्यसाहाय्यंकुर्या
दर्थेषुकर्हिचित।क्षत्रियःसशुभांल्लोकानाप्नुयादितिमेमतिः।क्षत्रियस्यैवकुर्वाणःक्षत्रियोवधमोक्षणं।
विपुलांकीर्त्तिमाप्नोतिलोकेस्मिंश्चपरत्रच।वैश्यस्यार्थेचसाहाय्यंकुर्वाणःक्षत्रियोभुवि।ससर्वेष्वपिलोकेषुप्र
जारंजयतेध्रुवं।शूद्रंतुमोचयेद्राजाशरणार्थिनमागतं।प्राप्नोतीहकुलेजन्मसद्द्रव्येराजपूजिते।एवंमांभग
वान्व्यासःपुरापौरवनंदन।प्रोवाचासुकरप्रज्ञस्तस्मादेवंचिकीर्षितं इत्यादिपर्वणिपकचक्रायांबक
वधे १५६ युधिष्ठिरउ उपपन्नमिदंमातस्त्वयायद्बुद्धिपूर्वकं।आर्त्तस्यब्राह्मणस्यैतदनुक्रोशादिदं
कृतं।ध्रुवमेष्यतिभीमोयंनिहत्यपुरुषादकं।सर्वथाब्राह्मणस्यार्थेयदनुक्रोशवत्यसि।यथात्विदंनविंदेयुः
र्नरानगरवासिनः।तथायंब्राह्मणोवाच्यःपरिग्राह्यश्चयत्नतः॥ वैशं ॥ततोरात्र्यांव्यतीतायांमन्नमादा

ययौपांडवः।भीमसेनोययौतत्रयत्रासौपुरुषादकः।आसाद्यतुवनंतस्यरक्षसःपांडवोबली।आजुहावततोना
म्नातदन्नमुपपादयन्।ततःसराक्षसःक्रुद्धोभीमस्यवचनात्तदा।आजगामसुसंक्रुद्धोयत्रभीमोव्यवस्थितः
महाकायोमहावेगोदारयन्निवमेदिनी।लोहिताक्षःकरालश्चलोहितश्मश्रुमूर्द्धजः।आकर्णाद्भिन्नवक्त्रश्च
शंकुकर्णोविभीषणः।त्रिशिखांभ्रुकुटींकृत्वासंदश्यदशनच्छदं।भुंजानमन्नंतंदृष्ट्वाभीमसेनंसराक्षसः।विवृ
त्यनयनेक्रुद्धइदंवचनमब्रवीत्।कोयमन्नमिदंभुंक्तेमदर्थमुपकल्पितं।पश्यतोममदुर्बुद्धिर्यियासुर्यमसा
दनं।भीमसेनस्तुतःश्रुत्वाप्रहसन्निवभारत।राक्षसंतमनादृत्यभुंक्तएवपराङ्मुखः।रवंभैरवंकृत्वासमुद्य
म्यकरावुभौ।अभ्यद्रवद्भीमसेनंजिघांसुःपुरुषादकः।तथापिपरिभूयैनंप्रेक्षमाणोवृकोदरः।राक्षसंभुंक्त
एवान्नंपांडवःपरवीरहा।अमर्षेणतुसंपूर्णःकुंतीपुत्रंवृकोदरं।जघानपृष्ठेपाणिभ्यामुभाभ्यांपृष्ठतःस्थितः।
तथाबलवताभीमःपाणिभ्यांभृशमाहतः।नैवावलोकयामासराक्षसंभुंक्तएवसः।ततःसभूयःसंक्रुद्धोवृक्ष
मादायराक्षसः।ताडयिष्यंस्तदाभीमंपुनरभ्यद्रवद्बली।ततोभीमःशनैर्भुक्त्वातदन्नंपुरुषर्षभः।वार्युपस्पृश्य
संहृष्टस्तस्थौयुधिमहाबलः।क्षिप्तंक्रुद्धेनतंवृक्षंप्रतिजग्राहवीर्यवान्।सव्येनपाणिनाभीमःप्रहसन्निवभारत॥

ततःसपुनरुद्यम्यवृक्षान्बहुविधान्बली।प्राहिणोद्भीमसेनायतस्मैभीमश्चपांडवः।तद्वृक्षयुद्धमभवन्महीरुह
विनाशनं।घोररूपंमहाराजनरराक्षसराजयोः।नामविश्राव्यतुबकःसमभिद्रुत्यपांडवं।भुजाभ्यांपरिजग्राहर
भीमसेनंमहाबलं।भीमसेनोपितद्रक्षःपरिरभ्यमहाभुजः।विस्फुरंतंमहाबाहुर्विचकर्षबलाद्बली।सकृष्यमाणो
भीमेनकर्षमाणश्चपांडवं।समयुज्यततीव्रेणक्लमेनपुरुषादकः।तयोर्वेगेनमहतापृथिवीसमकंपत।पादपांश्च
महाकायांश्चूर्णयामासतुस्तदा।हीयमानंतुतद्रक्षःसमीक्ष्यपुरुषादकं।निक्षिप्यभूमौजानुभ्यांसमाजघ्नेवृको
दरः।ततोस्यजानुनापृष्ठमवपीड्यबलादिव।बाहुनापरिजग्राहदक्षिणेनशिरोधरां।सव्येनचकटीदेशेगृह्यवा
ससिपांडवः।तद्रक्षोद्विगुणंचक्रेरवंतंभैरवंरवं।ततोस्यरुधिरंवक्त्रात्प्रादुरासीद्विशांपते।भज्यमानस्यभीमेनतस्य
स्यघोरस्यरक्षसः॥ इत्यादिपर्वणिवकवधे १५७ वैशं ततःसभग्नपार्श्वांगोनदित्वाभैरवंरवं।शै
लराजप्रतीकाशोगतासुरभवद्बकः।तेनशब्देनवित्रस्तोजनस्तस्याथरक्षसः।निष्पपातगृहाद्राजन्सहैवपरिचारि
भिः।तान्भीतान्विगतज्ञानान्भीमःप्रहरतांवरः।सांत्वयामासबलवान्समयेचन्यवेशयत्।नहिंस्यामानुषाभूयो
युष्माभिरितिकर्हिचित्।हिंसतांहिवधःशीघ्रमेवमेवभवेदिति।तस्यतद्वचनंश्रुत्वातानिरक्षांसिभारत।एवमस्त्वि

तितंप्राकुःजगृहुःसमयंचनं।ततःप्रभृतिरक्षांसितत्रसौम्यानिभारत।नगरेपुरुषंदृष्ट्वापतनैर्नगरवासिभिः।ततोभी
मस्तमादायगतासुंपुरुषादकं।द्वारदेशेविनिक्षिप्यजगामानुपलक्षितः।दृष्ट्वाभीमबलोद्धूतंबकंविनिहतंतदा।
ज्ञातयोस्यभयोद्विग्नाःप्रतिजग्मुस्ततस्ततः।ततःसभीमस्तंहत्वागत्वाब्राह्मणवेश्मतत्।आचचक्षेयथावृत्तंरा
ज्ञःसर्वमशेषतः।ततोनराविनिष्क्रांतानगरात्कल्यमेवतु।ददृशुर्निहतंभीमंराक्षसंरुधिरोक्षितं।तमद्रिकूट
सदृशंविनिकीर्णंभयानकं।दृष्ट्वासंहृष्टरोमाणोबभूवुस्तत्रनागराः।एकचक्रांततोगत्वाप्रवृत्तिंप्रददुःपुरे।त
तःसहस्रशोराजन्नरानगरवासिनः।तत्राजग्मुर्बकंद्रष्टुंसस्त्रीवृद्धकुमारकाः।ततस्तेविस्मिताःसर्वेकर्मदृष्ट्वा
तिमानुषं।देवतान्यर्चयांचक्रुःसर्वएवविशांपते।ततःप्रगणयामासुःकस्यवारोद्यभोजने।ज्ञात्वाचागम्यतं
विप्रंपप्रच्छुःसर्वएवते।एवंपृष्टःसबहुशोरक्षमाणश्चपांडवान्।उवाचनागरान्सर्वानिदंविप्रर्षभस्तदा।आ
ज्ञापितंमामशनेरुदितंसहबंधुभिः।ददर्शब्राह्मणःकश्चिन्मंत्रसिद्धोमहामनाः॥८॥परिपृच्छ्यसमांपूर्वंपरि
क्लेशंपुरस्यच।अब्रवीद्ब्राह्मणःश्रेष्ठोविश्वास्यप्रहसन्निव।प्रापयिष्याम्यहंतस्माअन्नमेतद्दुरात्मने।मन्नि
मित्तंभयंचापिनकार्यमितिचाब्रवीत्।सतदन्नमुपादायगतोबकवनंप्रति।तेननूनंभवेदेतत्कर्मलोकहि

तं कृतं। ततस्ते ब्राह्मणाः सर्वे क्षत्रियाश्च सुविस्मिताः। वैश्याः शूद्राश्च मुदिताश्चक्रुर्ब्रह्ममहं तदा। ततो जानप
दाः सर्वे आजग्मुर्नगरं प्रति। तदद्भुततमं दृष्ट्वा पार्थास्तत्रैव चावसन् इत्यादिपर्वणि बकवधः समाप्तः
॥ १५८ जनमेजय उ ॥ ते तथा पुरुषव्याघ्रा निहत्य बकराक्षसं। अत ऊर्ध्वं ततो ब्रह्मन्किमकुर्वंत पां
डवाः॥ वैशं ॥ तत्रैव न्यवसन्राजन्निहत्य बकराक्षसं। अधीयानाः परं ब्रह्म ब्राह्मणस्य निवेशने। ततः क
तिपयाहस्य ब्राह्मणः शंसितव्रतः। प्रतिश्रयार्थी तद्वेश्म ब्राह्मणस्याजगाम ह। स सम्यक्पूजयित्वा तं विप्रं
विप्रर्षभस्तदा। ददौ प्रतिश्रयं तस्मै सदा सर्वातिथिव्रतः। ततस्ते पांडवाः सर्वे सह कुंत्या नरर्षभाः। उपासां
चक्रिरे विप्रं कथयंतं कथां शुभां। कथयामास देशांश्च तीर्थानि सरितस्तथा। राज्ञश्च विविधाश्चर्यान्देशां
श्चैव पुराणि च। स तत्राकथयद्विप्रः कथांते जनमेजय। पांचालेष्वद्भुताकारं याज्ञसेन्याः स्वयंवरं। धृष्टद्युम्नस्य
चोत्पत्तिमुत्पत्तिं च शिखंडिनः। अयोनिजत्वं कृष्णाया द्रुपदस्य महामखे। तदद्भुततमं श्रुत्वा लोके तस्य महा
त्मनः। विस्तरेणैव पप्रच्छुः कथांते पुरुषर्षभाः॥ पांडवा ऊचुः ॥ कथं द्रुपदपुत्रस्य धृष्टद्युम्नस्य पावका
त्। वेदिमध्याच्च कृष्णायाः संभवः कथमद्भुतः। कथं द्रोणान्महेष्वासात्सर्वाण्यस्त्राण्युपशिक्षिता। कथं विप्रस

खायौ तौ भिन्नौ कस्यकृतेन वा वैशं एवं तैश्चोदितो राजन्स विप्रः पुरुषर्षभैः। कथयामास तत्सर्वं द्रौ
पदीसंभवं तदा॥ इत्यादिपर्वणि संभवे १५८ ब्राह्मण उ गंगाद्वारं प्रति महान्बभूवर्षिर्महातपाः
।भरद्वाजो महाप्राज्ञः सततं शंसितव्रतः। सोऽभिषेक्तुं गतो गंगां पूर्वमेवागतां सतीं। ददर्शाप्सरसं तत्र घृताची
माप्लुतामृषिः। तस्या वायुर्नदीतीरे वसनं व्यहरत्तदा। अपकृष्टांबरां दृष्ट्वा तामृषिश्चकमे तदा। तस्यां संसक्तम
नसः कौमारब्रह्मचारिणः। चिरसारेतश्चस्कंद तदृषिर्द्रोण आदधे। ततः समभवद्द्रोणः कुमारस्तस्य धीमतः
।अध्यगीष्ट स वेदांश्च वेदांगानि च सर्वशः। भरद्वाजस्य तु सखा। पृषतो नाम पार्थिवः। तस्यापि द्रुपदो नाम
तदा समभवत्सुतः। स नित्यमाश्रमं गत्वा द्रोणेन सह पार्षतः। चिक्रीडाध्ययनं चैव चकार क्षत्रियर्षभः। तत
स्तु पृषतेतीते स राजा द्रुपदोभवत्। द्रोणोपि रामं शुश्राव दित्संतं वसु सर्वशः। वनं तु प्रस्थितं रामं भरद्वाज
सुतोब्रवीत्। आगतं वित्तकामं मां विद्धि द्रोणं द्विजोत्तमं राम उवाच शरीरमात्रमेवाद्य मया सम
वशेषितं। अस्त्राणि वा शरीरं वा ब्रह्मन्नेकतमं वृणु द्रोण उ अस्त्राणि चैव सर्वाणि तेषां संहारमेव च
।प्रयोगं चैव सर्वेषां दातुमर्हति मे भवान् ब्राह्मण उ तथेत्युक्त्वा ततस्तस्मै प्रददौ भृगुनंदनः। प्रतिगृ

ष्टतदाद्रोणः कृतकृत्योभवत्तदा।संप्रहृष्टमनाद्रोणोरामात्परमसंमते।ब्रह्मास्त्रंसमनुप्राप्यनरेष्वभ्य
धिकोभवत्।ततोद्रुपदमासाद्यभारद्वाजःप्रतापवान्।अब्रवीत्पुरुषव्याघ्रःसखायंविद्धिमामिति
द्रुपदउ नाश्रोत्रियःश्रोत्रियस्यनारथीरथिनःसखा।नाराजापार्थिवस्यापिसखिपूर्वंकिमिष्यते
ब्राह्मणउ सविनिश्चित्यमनसापांचाल्यंप्रतिबुद्धिमान्।जगामकुरुमुख्यानांनगरंनागसाह्वयं।तस्मै
पौत्रान्समादायवसूनिविविधानिच।प्राप्तायप्रददौभीष्मःशिष्यान्द्रोणायधीमते।द्रोणःशिष्यांस्ततःस
र्वानिदंवचनमब्रवीत्।समानीयतुतांछिष्यान्द्रुपदस्यासुखायवै।आचार्यवेतनंकिंचिद्धृदियद्वर्त्ततेम
माकृतास्त्रैस्तत्प्रदेयंस्यात्तदृतंवदतानघाः।सोर्जुनप्रमुखैरुक्तस्तथास्त्वितिगुरुस्तदा।यदाचपांडवाः
सर्वेकृतास्त्राःकृतनिश्चयाः।ततोद्रोणोब्रवीद्भूयोवेतनार्थमिदंवचः।पार्षतोद्रुपदोनामछत्रवत्यांनरे
श्वरः।तस्मादाकृष्यतद्राज्यंममशीघ्रंप्रदीयतां।ततःपांडुसुताःपंचनिर्जित्यद्रुपदंयुधि।द्रोणायदर्शया
मासुर्बद्ध्वाससचिवंतदा॥ द्रोणउवाच ॥प्रार्थयामित्वयासख्यंपुनरेवनराधिप।अराजाकिलनो
राज्ञःसखाभवितुमर्हति।अतःप्रयतितंराज्येयज्ञसेनत्वयासह।राजासिदक्षिणेकूलेभागीरथ्याह

मुत्तरे ब्राह्मणउ एवमुक्तो हि पांचाल्यो भारद्वाजेन धीमता। उवाचास्त्रविदां श्रेष्ठं द्रोणं ब्राह्मणसत्तमं
।एवं भवतु भद्रं ते भारद्वाज महामते। सख्यं तदेव भवतु शाश्वद्यदभिमन्यसे। एवमन्योन्यमुक्त्वा तौ कृत्वा सख्य
मनुत्तमं। जग्मतुर्द्रोणपांचाल्यौ यथागतमरिंदमौ। असत्कारः स तु महान्मुहूर्त्तमपि तस्य तु। नापैति हृद
याद्राज्ञो दुर्म्मनाः स कृशोभवत् इत्यादिपर्वणि द्रौपदिसंभवे ५६ ब्राह्मणउ अमर्षी द्रुपदो
राजा कर्मसिद्धान्द्विजर्षभान्। अन्विछन्परिचक्राम ब्राह्मणावसथान्बहून्। पुत्रजन्म परीप्सन्वै शोकोपहत
चेतनः। नास्ति श्रेष्ठमपत्यं मे इति नित्यमचिन्तयत्। जातान्पुत्रान्स निर्वेदाद्धिग्बंधूनिति चाब्रवीत्। निःश्वासप
रमश्चासीद्द्रोणं प्रति चिकीर्षया। प्रभावं विनयं शिक्षां द्रोणस्य चरितानि च। क्षात्रेण च बलेनास्य चिंतयन्नाध्य
गच्छत। प्रतिकर्त्तुं नृपश्रेष्ठो यतमानोपि भारत। अभितः शोथ कल्माषी गंगाकूले परिभ्रमन्। ब्राह्मणावस
थं पुण्यमाससाद महीपतिः। तत्र नास्नातकः कश्चिन्नचासीदव्रती द्विजः। तथैव नामहाभागः सोपश्यत्संशिस
तव्रतौ। याजोपयाजौ ब्रह्मर्षी शाम्यंतौ परमेष्ठिनौ। संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ। तारणेयाउ
कतरूपौ ब्राह्मणावृषिसत्तमौ। स तावामंत्रयामास सर्वकामैरतंद्रितः। बुध्वा बलं तयोस्तत्र कनीयांसमुपह्वरे।

उपेदेछंदयन्कामैरुपयाजंधृतव्रतं।पादशुश्रूषणेयुक्तःप्रियवाक्सर्वकामदः॥अर्चयित्वायथान्यायमु
पयाजमुवाचसः॥येनमेकर्मणाब्रह्मन्पुत्रःस्याद्द्रोणमृत्यवे।उपयाजकृतेतस्मिन्गवांदातास्मितेर्बुदं।य
द्वातेन्यद्द्विजश्रेष्ठमनसःसुप्रियंभवेत्।सर्वंतत्तेप्रदाताहंनहिमेनास्तिसंशयः॥इत्युक्तोनाहमित्येवंतमृषिः
प्रत्यभाषत।आराधयिष्यन्द्रुपदःसतंपर्यचरत्पुनः।ततःसंवत्सरस्यांतेद्रुपदंसद्विजोत्तमः।उपयाजोब्र
वीत्कालेराजन्मधुरयागिरा।ज्येष्ठोभ्राताममागृह्णाद्विचरन्गहनेवने।अपरिज्ञातशौचायांभूमौनिपतितं
फलं।तदपश्यमहंभ्रातुरसांप्रतमनुव्रजन्।विमर्षंसंकरादानेनायंकुर्यात्कदाचन।दृष्ट्वाफलस्यनापश्य
द्दोषान्पापानुबंधकान्।विविनक्तिनशौचंयःसोन्यत्रापिकथंभवेत्।संहिताध्ययनंकुर्वन्वसन्गुरुकुलेच
यः।भैक्षमुत्सृष्टमन्येषांभुंक्तेस्मचयदातदा।कीर्तयन्गुणमन्नानामघृणीचपुनःपुनः।तंवैफलार्थिनंम
न्येभ्रातरंतर्कचक्षुषा।तंवैगच्छस्वनृपतेसत्वांसंयाजयिष्यति।जुगुप्समानोनृपतिर्मनसेदंविचिंतयन्।उप
याजवचःश्रुत्वायाजस्याश्रममभ्यगात्।अभिसंपूज्यपूजार्हमथयाजमुवाचह।अयुतानिददाम्यष्टौगवांया
जयमांविभो।द्रोणवैराभिसंतप्तंप्रह्लादयितुमर्हसि।सहिब्रह्मविदांश्रेष्ठोब्रह्मास्त्रेचाप्यनुत्तमः।तस्माद्द्रोणः

पुराऽध्येष्ठमां वै स सखिविग्रहे। क्षत्रियो नास्ति तस्यास्यां पृथिव्यां कश्चिदग्रणीः। कौरवाचार्यमुख्यस्य भार
द्वाजस्य धीमतः। द्रोणस्य शरजालानि प्राणिदेहहराणि च। षडरत्नि धनुश्चास्य दृश्यते परमं महत्। स हि ब्रा
ह्मणवेशेन क्षात्रं वेगमसंशयं। प्रतिहंति महेष्वासो भारद्वाजो महामनाः। क्षत्रोच्छेदाय विहितो जामदग्न्य इवो
त्थितः। तस्य ह्यस्त्रबलं घोरमप्रधृष्यं नरैर्भुवि। ब्राह्मं संधारयंस्तेजो हुताहुतिरिवानलः। समेत्यसमदहसाजौ
क्षात्रं धर्मपुरःसरः। ब्रह्मक्षत्रे च विहिते ब्राह्मं तेजो विशिष्यते। सोहं क्षात्राद्बलाद्धीनो ब्राह्मं तेजः प्रपेदिवान्। द्रोणा
द्विशिष्टमासाद्य भवंतं ब्रह्मवित्तमं। द्रोणांतकमहं पुत्रं लभेयं युधि दुर्जयं। तत्कर्म्म कुरु मे याज वितराम्यर्बुदं
गवां। तथेत्युक्त्वा तु तं याजो याज्यार्थमुपकल्पयत्। गुर्वर्थ इति वाकाममुपयाजमचोदयत्। याजो द्रोणवि
नाशाय प्रतिजज्ञे तथा च सः। ततस्तस्य नरेंद्रस्य उपयाजो महातपाः। आचख्यौ कर्म्म वैतानं तदा पुत्रफलाय वै
। स च पुत्रो महावीर्यो महातेजा महाबलः। इष्यते यद्विधो राजन् भविता ते तथाविधः। भारद्वाजस्य हंतारं सोभिसं
धाय भूपतिः। आजह्रे तत्तथा सर्वं द्रुपदः कर्मसिद्धये। याजस्तु हवनस्यांते देवीमाज्ञापयत्तदा। प्रैहि मां राज्ञि पृ
षति मिथुनं त्वामुपस्थितं॥ राज्ञ्युवाच ॥ अवलिप्तं मुखं ब्रह्मन् दिव्यान्गंधान्बिभर्मि वै। सुतार्थेनोपल

व्यास्मितिष्ठयाज्ञमममप्रिये याजउवाच याजेनश्रपितंहव्यमुपयाजाभिमंत्रितं।कथंकामंनसंदध्या
त्मात्वंविप्रेहितिष्ठवा ब्राह्मणउ एवमुक्तातुयाजेनहुतेहविषिसंस्कृते।उत्तस्थौपावकात्तस्मात्कुमा
रोदेवसन्निभः।ज्वालावर्णोघोररूपःकिरीटीवर्मचोत्तमं।बिभ्रत्सखड्गःसशरोधनुष्मान्विनदन्मुहुः।सोध्या
रोहद्रथवरंतेनचप्रययौतदा।ततःप्रणेदुःपांचालाःप्रहृष्टाःसाधुसाध्विति।हर्षाविष्टांस्ततश्चैनान्नेयंसेहे
वसुंधरा।भयापहोराजपुत्रःपांचालानांयशस्करः।राज्ञःशोकापहोजातएषद्रोणवधायवै।इत्युवाचमह
द्भूतमदृश्यंखेचरंतदा।कुमारीचापिपांचालीवेदीमध्यात्समुत्थिता।सुभगादर्शनीयांगीस्वसितायतलो
चना।श्यामापद्मपलाशाक्षीनीलकुंचितमूर्द्धजा।ताम्रतुंगनखीसुभ्रूश्चारुपीनपयोधरा।मानुषंविग्र
हंकृत्वासाक्षादमरवर्णिनी।नीलोत्पलसमोगंधोयस्याःक्रोशात्प्रधावति।याबिभर्तिपरंरूपंयस्यानास्त्यु
पमाभुवि।देवदानवयक्षाणामीप्सितांदेवरूपिणीं।तांचापिजातांसुश्रोणींवागुवाचाशरीरिणी।सर्वयोषि
द्वराकृष्णानिनीषुःक्षत्रियान्क्षयं।सुरकार्यमियंकालेकरिष्यतिसुमध्यमा।अस्याहेतोःकौरवाणांमहदु
त्पत्स्यतेभयं।तच्छ्रुत्वासर्वपांचालाःप्रणेदुःसिंहसंघवत्।नचैतान्हर्षसंपूर्णानियंसेहेवसुंधरा।तोह

ष्ट्वायार्थनीयाजंप्रपेदेवैसुतार्थिनी।नचैमद्विधांजननींजानीयातामिमामिति।तथेत्युवाचतंयाजोराज्ञःप्रि
यचिकीर्षया।नयोश्चनामनीचक्रुर्द्विजाःसंपूर्णमानसाः।धृष्टत्वादतिधृष्टत्वाद्धुम्नाद्युत्संभवादपि।धृष्ट
द्युम्नःकुमारोयंद्रुपदस्यभवत्विति।कृष्णेत्येवाब्रुवन्कृष्णांकृष्णाभूत्साहिवर्णतः।तथातन्मिथुनंजज्ञेद्रुपद
स्यमहामखे।धृष्टद्युम्नंतुपांचाल्यमानीयस्वनिवेशनं।उपाकरोदस्त्रहेतोर्भारद्वाजःप्रतापवान्।अमोक्षणी
यंदैवंहिभाविमत्वामहामतिः।तथातत्कृतवान्द्रोणआत्मकीर्त्यानुरक्षणात् इत्यादिपर्वणिद्रौपदीसंभ
वे १६१ वैशंपा एतच्छ्रुत्वातुकौंतेयाःशल्यविद्धाइवाभवन्।सर्वेचास्वस्थमनसोबभूवुस्तेमहा
बलाः।ततःकुंतीसुतान्दृष्ट्वासर्वास्तद्गतचेतसः।युधिष्ठिरमुवाचेदंवचनंसत्यवादिनी॥ कुंत्युवाच॥
चिररात्रोषिताःस्मेहब्राह्मणस्यनिवेशने।रममाणाःपुरेरम्येलब्धभैक्षामहात्मनः।यानीहरमणीयानिवना
न्युपवनानिच।सर्वाणितानिदृष्टानिपुनःपुनररिंदमः।पुनर्दृष्टानितानीहप्रीणयंतिमनस्तथा।भैक्षंचनतथा
वीरलभ्यतेकुरुनंदन।तेवयंसाधुपांचालान्गच्छामयदिमन्यसे।अपूर्वदर्शनंवीररमणीयंभविष्यति।सुभिक्षा
श्चैवपांचालाःश्रूयंतेशत्रुकर्शन।यज्ञसेनश्चराजासौब्रह्मण्यइतिशुश्रुम।एकत्रचिरवासश्चक्षमोनचमतो

ममातेतत्रसाधुगच्छामोयदित्वंपुत्रमन्यसे युधिष्ठिर उ० भवत्यायन्मतंकार्यंतदस्माकंपरंहितं।अ
नुज्ञांस्तुनजानामिगच्छेयुर्नेतिवापुनः वैशं० ततःकुंतीभीमसेनमर्जुनंयमजौतथा।उवाचगमनंतेच
तथेत्येवाब्रुवंस्तदा।ततआमंत्र्यतंविप्रंकुंतीराजसुतैःसह।प्रतस्थेनगरींरम्यांद्रुपदस्यमहात्मनः॥ ॥
इत्यादिपर्वणिद्रौपदीसंभवे १६२ वैशं० वसत्सुतेषुप्रच्छन्नंपांडवेषुमहात्मसु।आजगामाथतान्द्रष्टुं
व्यासःसत्यवतीसुतः।तमागतमभिप्रेक्ष्यप्रत्युद्गम्यपरंतपाः।प्रणिपत्याभिवाद्यैनंतस्थुःप्रांजलयस्तदा।स
मनुज्ञाप्यतान्सर्वानासीनान्मुनिरब्रवीत्।प्रच्छन्नंपूजितःपार्थैःप्रीतिपूर्वमिदंवचः।अपिधर्मेणवर्त्तध्वंशास्त्रेण
चपरंतपाः।अपिविप्रेषुपूजावःपूजार्हेषुनहीयते।अथधर्मार्थवद्वाक्यमुक्त्वासभगवानृषिः।विचित्राश्चक
थास्तास्ताःपुनरेवेदमब्रवीत् व्यास उ० आसीत्तपोवनेकाचिदृषेःकन्यामहात्मनः।विलग्नमध्यासुश्रो
णीसुभ्रूःसर्वगुणान्विता।।कर्मभिःस्वकृतैःसातुदुर्भगासमपद्यत।नाध्यगच्छत्पतिंसातुकन्यारूपवतीसती।।
तपस्तप्तुमथारेभेपत्यर्थमसुखाततः।तोषयामासतपसासाकिलोग्रेणशंकरं।तस्याःसभगवांस्तुष्टस्ता
मुवाचयशस्विनीं।वरंवरयभद्रंतेवरदोस्मीतिशंकरः।अथेश्वरमुवाचेदमात्मनःसावचोहितं।पतिंसर्वगुणो

पेतमिछामीतिपुनःपुनः।तामथप्रत्युवाचेदमीशानोवदतांवरः।पंचतेपतयोभद्रेभविष्यंतीतिभारताः।
एवमुक्तात्ततःकन्यादेवंवरदमब्रवीत्।एकमिछाम्यहंदेवत्वत्प्रसादात्पतिंप्रभो।पुनरेवाब्रवीद्देवइदंवचन
मुत्तमं।पंचकृत्वस्त्वयाप्युक्तःपतिंदेहीत्यहंपुनः।देहमन्यंगतायास्तेयथोक्तंतद्भविष्यति।द्रुपदस्यकुलेयज्ञे
कन्यासादेवरूपिणी।निर्दिष्टाभवतांपत्नीकृष्णापार्षत्यनिंदिता।पंचालनगरेतस्मान्निवसध्वंमहाबलाः।सु
खिनस्तामनुप्राप्यभविष्यथनसंशयः।एवमुक्त्वामहाभागःपांडवानस्पितामहः।पार्थानामंत्र्यकुंतींचप्रा
तिष्ठतमहातपाः॥ इत्यादिपर्वणि १६३ वैशंप गतेभगवतिव्यासेपांडवाहृष्टमानसाः।ते
प्रतस्थुःपुरस्कृत्यमातरंपुरुषर्षभाः।समैरुदङ्मुखामार्गैर्यथोद्दिष्टंपरंतपाः।तेत्वगच्छन्नहोरात्रात्तीर्थं
सोमाश्रयायणं।आसेदुःपुरुषव्याघ्रागंगायांपांडुनंदनाः।उल्मुकंतुसमुद्यम्यतेषामग्रेधनंजयः।प्रका
शार्थंययौतत्ररक्षार्थंचमहारथः।तत्रगंगाजलेरम्येविविक्तेक्रीडयन्स्त्रियः।ईर्षुर्गंधर्वराजोवैजलक्रीड
मुपागतः।शब्दंतेषांसशुश्रावनदींसमुपसर्पतां।तेनशब्देनचाविष्टश्चुक्रोधबलवद्बली।सदृष्ट्वापांडवांस्त
त्रसहमात्रापरंतपान्।विस्फारयन्धनुर्घोरमिदंवचनमब्रवीत्।संध्यासंरज्यतेघोरापूर्वरात्रागमेषुच।अशी

तिभिर्लवैर्हीनंतन्मुहूर्त्तंप्रचक्षते।विहितंकामचाराणांयक्षगंधर्वरक्षसां।शेषमन्यन्मनुष्याणांकर्मचा
रमिहवैस्मृतं।लोभात्प्रचारंचरतस्तासुवेलासुवैनरान्।उपक्रांतान्निगृह्णीमोराक्षसैःसहबालिशान्।अतोरा
त्रौप्राप्नुवंतोजलंब्रह्मविदोजनाः।गर्हयंतिनरान्सर्वान्बलस्थान्नृपतीनपि।आरात्तिष्ठतमामह्यंसमीपमुप
सर्पत।कस्मान्मांनाभिजानीतप्राप्तंभागीरथीजलं।अंगारपर्णंगंधर्वंवित्तमांस्वबलाश्रयं।अहंहिमानीचे
र्ष्युश्चकुवेरस्यप्रियःसखा।अंगारपर्णमित्येवंख्यातंचेदंवनंमम।अनुगंगांचवासंचचित्रंयत्ररमाम्यहं।न
कौणपाःशृंगिणोवानदेवानचमानुषाः।इदंसमुपसर्पंतितत्किंसमनुसर्पथ अर्जुनउ समुद्रेहिम
वत्पार्श्वेनघामस्यांचदुर्मते।रात्रावहनिसंध्यायांकस्यक्लृप्तःपरिग्रहः।भुक्तोवाप्यथवाभुक्तोरात्रावहनिखेच
रानकालनियमोह्यस्तिगंगांप्राप्यसरिद्वरां।वयंचशक्तिसंपन्नाअकालेत्वामधृष्णवः।अशक्तोहिरणेक्रूरयु
ष्मानर्चंतिमानवाः।पुराहिमवतश्चैषाहेमशृंगाद्विनिःसृता।गंगागत्वासमुद्रांतःसप्तधासमपद्यत।गंगांचयमु
नांचैवप्लक्षजातांसरस्वतीं।रथस्थांशरयूंचैवगोमतींगंडकींतथा।अपर्युषितपापास्तेनदीःसप्तपिबंतिये।
इयंभूत्वाचैकवप्राशुचिराकाशगापुनः।देवेषुगंगागंधर्वप्राप्नोत्यलकनंदतां।तथापितॄंस्त्वैतरणीदुस्तरापा

पकर्मभिः।गंगाभवतिवैप्राप्यकृष्णद्वैपायनोब्रवीत्।असंबाधादेवनदीस्वर्गसंपादनीशुभा।कथमिछसितांरो
द्धुंनैषधर्म्मःसनातनः।अनिवार्य्यमसंबाधंतववाचाकथंवयं।नस्पृशेमयथाकामंपुण्यंभागीरथीजलं ॥
वैशंप अंगारपर्णस्तछ्रुत्वाक्रुद्धआयम्यकार्मुकं।मुमोचबाणान्निशितानहीनाशीविषानिव।उल्मुकंआ
मयंस्तूर्णंपांडवश्चर्म्मचोत्तमं।अपोहतशरांस्तस्यसर्वानेवधनंजयः अर्ज्जुनउ बिभीषिकावैगंधर्वना
स्त्रज्ञेषुप्रयुज्यते।अस्त्रज्ञेषुप्रयुक्तेयंफेनवत्प्रविलीयते।मानुषानतिगंधर्वान्सर्वान्गंधर्वलक्षये।तस्मादस्त्रेणदि
व्येनयोत्स्येहंनतुमायया।पुरास्त्रमिदमाग्नेयंप्रादात्किलबृहस्पतिः।भरद्वाजायगंधर्वगुरुर्मान्यःशतक्रतोः।भर
द्वाजादग्निवेश्यअग्निवेश्याद्गुरुर्मम।साध्विदंमह्यमददद्द्रोणोब्राह्मणसत्तमः वैशंप इत्युक्त्वापांडवः
क्रुद्धोगंधर्वायमुमोचह।प्रदीप्तमस्त्रमाग्नेयंददाहास्यरथंतुतत्।विरथंविप्लुतंतंतुसगंधर्वंमहाबलः।अस्त्रते
जःप्रमूढंचप्रपतंतमवाङ्मुखं।शिरोरुहेषुजग्राहमाल्यवत्सुधनंजयः।भ्रातृन्प्रतिचकर्षाथसोस्त्रपातादचेतसं।
युधिष्ठिरंतस्यभार्याप्रपेदेशरणार्थिनी।नाम्नाकुंभीनसीनामपतित्राणमभीप्सती गंधर्व्युवाच त्राय
स्वमांमहाभागपतिंचेमंविमुंचमे।गंधर्वीशरणंप्राप्तांनाम्नाकुंभीनसींप्रभो युधिष्ठिरउ युद्धेजितंयशोही

नंस्त्रीनाथमपराक्रमं।कोनिहन्याद्रिपुंतातमुंचेमंरिपुसूदन अर्जुन उ जीवितंप्रतिपद्यस्वगच्छगंध
र्वमाशुचः।प्रदिशत्वभयंतेद्यकुरुराजोयुधिष्ठिरः गंधर्व उ जितोहंपूर्वकंनाममुंचाम्यंगारपर्णतां।न
चश्लाघेबलेनांगननाम्नाजनसंसदि।साध्विमंलब्धवांल्लाभंयोहंदिव्यास्त्रधारिणं।गंधर्व्यामायेयेच्छामि
संयोजयितुमर्जुनं।अस्त्राग्निनाविचित्रोयंदग्धोमेरथउत्तमः।सोहंचित्ररथोभूत्वानाम्नादग्धरथोभवं।संभृ
ताचैवविद्येयंतपसेहमयापुरा।निवेदयिष्येतामद्यप्राणदायमहात्मने।संस्तंभयित्वातरसाजितंशरणमा
गतं।योरिपुंयोजयेत्प्राणैः कल्याणैः किन्नसोर्हति।चक्षुषीनामविद्येयंयांसोमायददौमनुः।ददौसविश्वा
वसवेममविश्वावसुर्ददौ।सेयंकापुरुषंप्राप्तागुरुदत्ताप्रणश्यति।आगमोस्यामयाप्रोक्तोवीर्यंप्रतिनिबो
ध्मे।यच्चक्षुषाद्रष्टुमिच्छेत्रिषुलोकेषुकिंचन।तत्पश्येद्यादृशंचेच्छेत्तादृशंद्रष्टुमर्हति।एकपादेनषण्मासा
न्स्थितोविद्यांलभेदिमां।अनुनेष्याम्यहंविद्यांस्वयंतुभ्यंव्रतेकृते।विद्ययाह्यनयाराजन्वयंनृभ्योविशेषिताः।
अविशिष्टाश्चदेवानामनुभावप्रदर्शिनः।गंधर्वजानामश्वानामहंपुरुषसत्तम।आतृभ्यस्तवतुभ्यंचपृथग्दा
ताशतंशतं।देवगंधर्ववाहास्तेदिव्यवर्णामनोजवाः।क्षीणाःक्षीणाभवंत्येतेनहीयंतेश्चरंहसः।पुराकृतंम
च

हेन्द्रस्यवज्रंवृत्रनिवर्हणं।दधीचस्याथितथाचैवतच्छीर्णंवृत्रमूर्द्धनि।ततोभागीकृतोदेवैर्वज्रभागउपास्यते।
लोकेयशोधनंकिंचित्सावैवज्रतनुःस्मृता।वज्रपाणिर्ब्राह्मणःस्यात्क्षत्रंवज्ररथंस्मृतं।वैश्यावैदानवज्राश्च
कर्मवज्रायवीयसः।क्षत्रवज्रस्यभागेनअवध्यावाजिनःस्मृताः।रथांगंवडवासूतेशूराश्चाश्वेषुयेमताः।का
मवर्णाःकामजवाःकामतःसमुपस्थिताः।इतिगंधर्वजाःकामंपूरयिष्यंतितेहयाः अर्जुन उ यदि
प्रीतेनमेदत्तंसंशयेजीवितस्यवा।विद्याधनंश्रुतंवापिनतद्गंधर्वरोचये गंधर्व उ संयोगोवैप्रीतिक
रोमहत्सुप्रतिदृश्यते।जीवितस्यप्रदानेनप्रीतोविद्यांददामिते।त्वत्तोप्यहंग्रहीष्यामिअस्त्रमाग्नेयमुत्तमं।त
थैवसख्यंबीभत्सोचिरायभरतर्षभ अर्जुन उ त्वत्तोस्त्रेणवृणोम्यश्वान्संयोगःशाश्वतोस्तुनौ।सखेतत्
ब्रूहिगंधर्वयुष्मभ्योयद्भयंत्यजेत्।कारणंब्रूहिगंधर्वकिंतद्येनस्मधर्षिताः।यांतोवेदविदःसर्वेसंतोरात्राव
रिंदम॥ गंधर्व उ ॥अनग्नयोनाहुतयोनचविप्रपुरस्कृताः।यूयंततोधर्षिताःस्थमयावैपांडुनंद
नाः।यक्षराक्षसगंधर्वाःपिशाचोरगदानवाः।विस्तरंकुरुवंशस्यधीमंतःकथयंतिते।नारदप्रभृतीनांचदे
वर्षीणांमयाश्रुतं।गुणान्कथयतांवीरपूर्वेषांतवधीमतां।स्वयंचापिमयादृष्टश्चरतासागरांवरां।इमां

वसुमतीकृत्स्नांप्रभावःसुकुलस्यते ।वेदेधनुषिविद्याचार्यमभिजानामितेऽर्जुन।विश्रुतंत्रिषुलोकेषुभार
द्वाजंयशस्विनं।धर्मंवाय्वंचशक्रंचविजानाम्यश्विनौतथा।पांडुंचकुरुशार्दूलषडेतान्कुरुवर्द्धनान्।पि
तॄनेतानहंपार्थदेवमानुषसत्तमान्।दिव्यात्मानोमहात्मानःसर्वशस्त्रभृतांवराः।भवंतोभ्रातरःशूराःस
र्वेसुचरितव्रताः।उत्तमांचमनोबुद्धिंभवतांभावितात्मनां।जानन्नपिचवःपार्थकृतवानिहधर्षणं।स्त्री
सकाशेचकौरव्यनपुमान्क्षंतुमर्हति।धर्षणमात्मनःपश्यन्बाहुद्रविणमाश्रितः।नक्तंचबलमस्माकं
भूयएवाभिवर्द्धते।यतस्ततोमांकौंतेयसदारमन्युराविशत्।सोहंत्वयेहविजितःसंख्येतापत्यवर्द्धन।
येनतेनेहविधिनाकीर्त्यमानंनिबोधमे।ब्रह्मचर्यपरोधर्मःसचापिनियतस्त्वयि।यस्मात्तस्मादहंपार्थ
रणेस्मिन्विजितस्त्वया।यस्तुस्यात्क्षत्रियःकश्चित्कामवृत्तःपरंतपः।नक्तंचयुधियुध्येतनसजीवेत्कथं
चन।यस्तुस्यात्कामवृत्तोपिपार्थब्रह्मपुरस्कृतः।जयेन्नक्तंचरान्सर्वान्सपुरोहितधूर्गतः।तस्मात्तापत्यय
त्किंचिन्नृणांश्रेयइहेप्सितं।तस्मिन्कर्मणियोक्तव्यादांतात्मानःपुरोहिताः।वेदेषडंगेनिरताःशुचयःस
त्यवादिनः।धर्म्मात्मानःकृतात्मानःस्युर्नृपाणांपुरोहिताः।जयश्चनियतोराज्ञःस्वर्गश्चतदनंतरं।य

स्यस्याद्धर्मविद्वाग्मीशुरोधाःशीलवांछुचिः।लाभंलब्धुमलब्धंवालब्धंचपरिरक्षितुं।पुरोहितंप्रकुर्वीत
राजागुणसमन्वितं।पुरोहितमतेतिष्ठेद्यइच्छेद्भूतिमात्मनः।प्राप्तुंवसुमतींसर्वांसर्वशःसागरांबरां।नहिके
वलंशौर्येणतापत्याभिजनेनवाजयेद्ब्राह्मणःकश्चिद्भूमिंभूमिपतिःक्वचित्।तस्मादेवंविजानीहिकुरूणांवं
शवर्द्धन।ब्राह्मणप्रमुखंराज्यंशक्यंपालयितुंचिरं इत्यादिपर्वणितापत्ये १६५ अर्जुनउ ॥
तापत्यइतियद्वाक्यमुक्तवानसिमामिह।तदहंज्ञातुमिच्छामितापत्यार्थंविनिश्चितं।तपतीनामकाचैषाता
पत्यायत्कृतेवयं।कौंतेयाहिवयंसाधोतत्त्वमिच्छामिवेदितुं वैशंप एवमुक्तःसगंधर्वःकुंतीपु
त्रंधनंजयं।विश्रुतांत्रिषुलोकेषुश्रावयामासवैकथां गंधर्वउ हंततेकथयिष्यामिकथामेतां
मनोरमां।यथावदखिलांपार्थसर्वबुद्धिमतांवरं।उक्तवानस्मियेनत्वांतापत्यइतितद्वचः।तत्तेहंक
थयिष्यामिशृणुष्वैकमनाभव।यएषदिविधिष्ण्येननाकंव्याप्नोतितेजसा।एतस्यतपतीनामबभूवस
दृशीसुता।विवस्वतोवैकौंतेयसावित्र्यावरजाविभो।विश्रुतात्रिषुलोकेषुतपतीतपसायुता।नदेवीनासु
रीचैवनयक्षीनचराक्षसी।नाप्सरानचगंधर्वीतथारूपेणकाचन।सुविभक्तानवद्यांगीस्वसितायत

आ०प०
२५५

लोचना।स्वाचारा चैव साध्वी च सुवेशा चैव भामिनी।न तस्याः सदृशं कंचित्रिषु लोकेषु भारत।भर्त्तारं
सविता मेने रूपशीलगुणश्रुतैः।संप्राप्तयौवनां पश्यन्देयां दुहितरं तु तां।नोपलेभे ततः शान्तिं संप्रदानं
विचिन्तयन्।अथर्क्षपुत्रः कौन्तेय कुरूणामृषभो वली।सूर्यमाराधयामास नृपः संवरणस्तदा।अर्घ्यमा
ल्योपहाराद्यैर्गंधैश्च नियतः शुचिः।नियमैरुपवासैश्च तपोभिर्विविधैरपि।शुश्रूषुरनहंवादी शुचिः पौ
रवनंदनः।अंशुमंतं समुद्यंतं पूजयामास भक्तिमान्।ततः कृतज्ञं धर्मज्ञं रूपेणासदृशं भुवि।तपत्याः स
दृशं मेने सूर्यः संवरणं पतिं।दातुमैछत्ततः कन्यां तस्मै संवरणाय तां।नृपोत्तमाय कौरव्य विश्रुताभिज
नाय च।यथा हि दिवि दीप्तांशुः प्रभासयति तेजसा।तथा भुवि महीपालो दीप्त्या संवरणो भवत्।यथार्चयं
ति चादित्यमुद्यंतं ब्रह्मवादिनः।तथा संवरणं पार्थ ब्राह्मणावरजाः प्रजाः।स सोममति कांतत्वादादित्यम
ति तेजसा।वभूव नृपतिः श्रीमान्सुहृदां दुर्हृदामपि।एवंगुणस्य नृपतेस्तथावृत्तस्य कौरव।तस्मै दातुं मन

२५५

श्चक्रे तपतीं तपनः स्वयं।स कदाचिदथो राजा श्रीमानमितविक्रमः।चचार मृगयां पार्थ पर्वतोपवने कि
ल।चरतो मृगयां तस्य क्षुत्पिपासासमन्वितः।ममार राज्ञः कौंतेय गिरावप्रतिमो हयः।स मृताश्वश्चरन्पा

र्थंपद्मामेरुगिरौनृपः।ददर्शासदृशींलोकेकन्यामायतलोचनां।सएकएकामासाद्यकन्यांपरवलार्दनः
।तस्थौनृपतिशार्दूलपश्यन्नविचलेक्षणः।सहितांतर्कयामासरूपतोनृपतिःश्रियं।पुनःसंतर्कयामासर
वेर्भ्रष्टामिवप्रभां।वपुषावर्चसाचैवशिखाग्रामिवविभावसोः।प्रसन्नत्वेचकांत्याचचंद्ररेखामिवामलां।गि
रिपृष्टेतुसायस्मिन्स्थितास्वसितलोचना।विभ्राजमानाशुशुभेमूर्तिमेवहिरण्मयी।तस्याद्रूपेणसगिरिर्वे
शेनचविशेषतः।ससवृक्षक्षुपलतोहिरण्मयइवाभवत्।अवमेनेचतांदृष्ट्वासर्वप्राणभृतांवपुः।अवाप्तंवा
त्मनोमेनेसराजाचक्षुषःफलं।जन्मप्रभृतियत्किंचिद्दृष्टवान्समहीपतिः।रूपंनसदृशंतस्यास्तर्कयामास
किंचन।तयावद्धमनश्चक्षुःपाशैर्गुणमयैस्तदा।नचचालततोदेशाद्बुबुधेनचकिंचन।अस्यानूनंविश्व
न्नाद्रूपाःसदेवासुरमानुषां।लोकंनिर्मथ्यधात्रेदंरूपमाविष्कृतंकृतं।एवंसंतर्कयामासरूपद्रविणसंपदा
।कन्यामसदृशींलोकेनृपःसंवरणस्तदा।तांचदृष्ट्वैवकल्याणींकल्याणाभिजनोनृपः।जगाममनसाचिं
तांकामवाणेनपीडितः।दह्यमानःसतीव्रेणनृपतिर्मन्मथाग्निना।अप्रगल्भांप्रगल्भस्तांतदोवाचमनोह
रां।कासिकस्यासिरंभोरुकिमर्थंचेहतिष्ठसि।कथंचनिर्जनेरण्येचरस्येकाशुचिस्मिते।त्वंहिसर्वानवद्यां

गीसर्वाभरणभूषिता। विभूषणमिवैतेषां भूषणानामभीप्सितं। न देवीं नासुरीं चैव न यक्षीं न च राक्षसीं।
न च भोगवतीमन्येन गंधर्वीं न मानुषीं। याहि दृष्टा मया काश्चिच्छ्रुता वापि वरांगनाः। न तासां न सदृशीमन्ये
त्वामहं मत्तकाशिनि। दृष्ट्वैव चारुवदने चंद्रात्कांततरं तव। वदनं पद्मपत्राक्षि मां मथ्नातीव मन्मथः। एवं
तां स महीपालो बभाषे न तु सा तदा। कामार्त्तं निर्जने रण्ये प्रत्यभाषत किंचन। ततो लालप्यमानस्य पार्थि
वस्यायतेक्षणा। सौदामिनीव चाभ्रेषु तत्रैवांतरधीयत। तामन्वेष्टुं स नृपतिः परिचक्राम सर्वतः। वनं वन
जपत्राक्षीं भ्रमन्नुन्मत्तवत्तदा। अपश्यमानः स तु तां बहु तत्र विलप्य च। निश्चेष्टः पार्थिवश्रेष्ठो मुहूर्त्तं स व्य
तिष्ठत   इत्यादिपर्वणि तापत्ये   १६५   गंधर्व्वेत   अथ तस्यामदृश्यायां नृपतिः काममोहितः
।पातनः शत्रुसंघानां पपात धरणीतले। तस्मिन्निपतिते भूमावथ सा चारुहासिनी। पुनः पीनायतश्रोणी
दर्शयामास तं नृपं। अथाबभाषे कल्याणी वाचा मधुरया नृपं। तं कुरूणां कुलकरं कामाभिहतचेतसं। उ
वाच मधुरं वाक्यं तपती प्रहसन्निव। उत्तिष्ठोत्तिष्ठ भद्रं ते न त्वमर्हस्यरिंदम। मोहं नृपतिशार्दूल गंतुमर्हस्य
रिंदम। एवमुक्तोथ नृपतिर्वाचा मधुरया तदा। ददर्श विपुलश्रोणीं तामेवाभिमुखे स्थितां। अथ तामसितां

पांगीमावभाषेसपार्थिवः।मन्मथाग्निपरीतात्मासंदिग्धाक्षरयागिरा।साधुत्वमसितापांगिकामार्त्तम
त्तकाशिनि।भजस्वभजमानंमांप्राणाहिप्रजहंतिमां।त्वदर्थेहिविशालाक्षिमामयंनिशितैःशरैः।का
मःकमलगर्भाभेप्रतिविध्यन्नशाम्यति।दृष्टमेवमनाकेंदेभद्रेकाममहाहिना।सात्वंपीनायतश्रोणीमा
माप्नुहिवरानने।त्वदधीनाहिमेप्राणाःकिंनरोद्गीतभाषिणि।चारुसर्वानवद्यांगिपद्मेंदुप्रतिमानने।नह्य
हंत्वदृतेभीरुराशासाभिरवल्गुजीवितुं।कामःकमलपत्राक्षिप्रतिविध्यतिमामयं।तस्मात्कुरुविशालाक्षिमय्य
नुक्रोशमंगने।भक्तंमामसितापांगिनपरित्यक्तुमर्हसि।त्वंहिमांप्रीतियोगेनत्रातुमर्हसिभाविनि।त्वद्दर्शन
कृतस्नेहंमनश्चलतिमेभृशं।नत्वांदृष्ट्वापुनरन्यांद्रष्टुंकल्याणिरोचते।प्रसीदवशगोहंतेभक्तंमांभजभावि
नि।गांधर्वेणविवाहेनमामुपेहिवरांगने।विवाहानांहिरंभोरुगांधर्वःश्रेष्ठउच्यते॥ तपत्युवाच ॥
नाहमीशात्मनोराजेकन्यापितृमतीह्यहं।मयिचेदस्तितेप्रीतिर्याचस्वपितरंमम।यथाहितेमयाप्राणाःसं
गृहीतानरेश्वर।दर्शनादेवभूयस्त्वंतथाप्राणान्ममाहर।नचाहमीशादेहस्यतस्मान्नृपतिसत्तम।समीपंनो
पगच्छामिनस्वतंत्राहियोषितः।काहिसर्वेषुलोकेषुविश्रुताभिजनंनृपं।कन्यानाभिलषेन्नाथंभर्त्तारंभ

क्तवत्सलं। तस्मादेवं गते काले याचस्व पितरं मम। आदित्यं प्रणिपातेन तपसा नियमेन च। स चेत्काम
यते दातुं तव मामरिसूदन। भविष्याम्यद्य ते राजन्सततं वशवर्त्तिनी। अहं हि तपती नाम सावित्र्यवरजा शु
भा। अस्य लोकप्रदीपस्य सवितुः क्षत्रियर्षभ॥ इत्यादिपर्वणि तापत्ये १६६ गंधर्वईग ॥
एवमुक्त्वा ततस्तूर्णं जगामोर्ध्वमनिंदिता। स तु राजा पुनर्भूमौ तत्रैव निपपात ह। अन्वेषमाणः सबलस्तं राजा
नं नृपोत्तमं। अमात्यः सानुयात्रश्च तं ददर्श महावने। क्षितौ निपतितं काले शक्रध्वजमिवोच्छ्रितं। तं हि दृष्ट्वा
महेष्वासं निरस्तं पतितं भुवि। बभूव सोस्य सचिवः संप्रदीप्त इवाग्निना। त्वरया चोपसंगम्य स्नेहादागत
संभ्रमः। तं समुत्थापयामास नृपतिं काममोहितं। भूतलाद्भूमिपालेशं पितेव पतितं सुतं। प्रज्ञया वयसा
चैव वृद्धः कीर्त्या नयेन च। अमात्यस्तं समुत्थाप्य बभूव विगतज्वरः। उवाच चैनं कल्याण्या वाचा मधुरयो
त्थितं। मा भैर्मनुजशार्दूल भद्रमस्तु तवानघ। क्षुत्पिपासापरिश्रांतं तर्कयामास वै नृपं। पतितं पातनं सं
ख्ये शात्रवाणां महीतले। वारिणा च सुशीतेन शिरस्तस्याभ्यषेचयत्। अस्पृशन्मुकुटं राज्ञः पुंडरीकसु
गंधिना। ततः प्रत्यागतप्राणस्तद्बलं बलवान्नृपः। सर्वं विसर्जयामास तमेकं सचिवं विना। ततस्तस्या

क्षयाराज्ञोविप्रस्तस्थेमहद्बलं।सतुराजागिरिप्रस्थेतस्मिन्पुनरुपाविशत्।ततस्तस्मिन्गिरिवरेशुचिर्भूत्वा
कृतांजलिः।आरिराधयिषुःसूर्यंतस्थावूर्ध्वभुजःक्षितौ।जगाममनसाचैववसिष्ठमृषिसत्तमं।पुरोहित
ममित्रघ्नंतदासंवरणोनृपः।नक्तंदिनमथैकत्रस्थितेतस्मिन्जनाधिपे।अथाजगामविप्रर्षिस्तदाद्वाद
शमेहनि।सविदित्वैवनृपतिंतपत्याहृतमानसं।दिव्येनविधिनाज्ञात्वाभावितात्मामहानृषिः।तथातुनिय
तात्मानंतंनृपंमुनिसत्तमः।आबभाषेसधर्मात्मातस्यैवार्थचिकीर्षया।सतस्यमनुजेंद्रस्यपश्यतोभगवा
नृषिः।ऊर्ध्वमाचक्रमेद्रष्टुंभास्करंभास्करद्युतिः।सहस्रांशुंततोविप्रःकृतांजलिरुपस्थितः।वसिष्ठोह
मितिप्रीत्यासचात्मानंन्यवेदयत्।तमुवाचमहातेजाविवस्वान्मुनिसत्तमं।महर्षेस्वागतंतेस्तुकथय
स्वयथेप्सितं।यदिच्छसिमहाभागमत्तःप्रवदतांवर।तत्तेदद्यामभिप्रेतंयद्यपिस्यात्सुदुष्करं।एवमुक्तःस
तेनर्षिर्वसिष्ठःप्रत्यभाषत।प्रणिपत्यविवस्वंतंभानुमंतंमहातपाः वसिष्ठउ येषातेतपतीना
मसावित्र्यवरजासुता।तांत्वांसंवरणस्यार्थेवरयामिविभावसो।सहिराजाबृहत्कीर्तिर्धर्मार्थविदुदारधीः।
युक्तःसंवरणोभर्तादुहितुस्तेविहंगम।इत्युक्तःसतदातेनददानीत्येवनिश्चितः।प्रत्यभाषततंविप्रंप्रति

नेंद्रदिवाकरः।वरःसंवरणोराज्ञांत्वमृषीणांवरोमुने।तपतीयोषितांश्रेष्ठाकिमन्यद्दपवर्ज्जनात्।ततःसर्वा
नवद्यांगींतपतींतपनःस्वयं।ददौसंवरणस्यार्थेवसिष्ठायमहात्मने।प्रतिजग्राहतांकन्यांमहर्षिस्तपतीं
तदा।वसिष्ठोथविसृष्टस्तुपुनरेवाजगाममहा।यत्रविख्यातकीर्त्तिःसकुरूणामृषभोभवत्।सराजामन्मथा
विष्टस्तद्गतेनांतरात्मना।दृष्ट्वादेवकन्यांतांतपतींचारुहासिनीं।वसिष्ठेनसहायांतींसंहृष्टोभ्यधिकंव
भौ।रुरुचेसाधिकंसुभ्रूरापतंतीनभस्तलात्।सौदामिनीवविभ्रष्टाद्योतयंतीदिशस्त्विषा।कृच्छ्राद्द्वादशरा
त्रेतुतस्यराज्ञःसमाहिते।आजगामविशुद्धात्मावसिष्ठोभगवानृषिः।तपसाराध्यवरदंदेवंगोपतिमीश्वरं
लेभेसंवरणोभार्य्यांवसिष्ठस्यैवतेजसा।ततस्तस्मिन्गिरिश्रेष्ठेदेवगंधर्वसेविते।जग्राहविधिवत्पाणिंतप
त्याःसनरर्षभः।वसिष्ठेनाभ्यनुज्ञातस्तस्मिन्नेवधराधरे।सोऽकामयतराजर्षिर्विहर्त्तुंसहभार्यया।ततःपु
रेवराष्ट्रेचवनेषूपवनेषुच।आदिदेशमहीपालसदेवसचिवंतदा।नृपतिंत्वभ्यनुज्ञाप्यवसिष्ठोथापचक्रमे।
सोथराजागिरौतस्मिन्समाद्वादशसत्रमा।नववर्षसहस्राक्षोराष्ट्रेचैवास्यभारत।ततस्तस्यामनावृष्ट्याप्रवृ
त्तायामरिंदम।प्रजाःक्षयमुपाजग्मुःसर्वाःसस्थाणुजंगमाः।तस्मिंस्तथाविधेकालेवर्त्तमानेसुदारुणे।

नावश्यायःपपाततोर्व्यांततस्तस्यानिनारुहन्।ततोविभ्रांतमनसोजनाःक्षुद्भयपीडिताः।गृहाणिसंपरित्यज्य
वभ्रमुःप्रदिशोदिशः४ततस्तस्मिन्पुरेराष्ट्रेत्यक्तदानपरिग्रहाः।परस्परममर्यादाःक्षुधार्त्ताःजघ्निरेजनाः।
तत्क्षुधार्तैर्निराहारैःशवभूतैस्तथानरैः।अभवत्प्रेतराजस्यपुरंप्रेतैरिवावृतं।ततस्तंतादृशंदृष्ट्वासएवभ
गवानृषिः।अभ्यवर्षतधर्मात्मावसिष्ठोमुनिसत्तमः।तंचपार्थिवशार्दूलमानयामासतत्पुरं।तपत्यासहितं
राजन्नुषितंशाश्वतीःसमाः।ततःप्रवृष्टस्तत्रासीद्यथापूर्वंसुरारिहा।तस्मिन्नृपतिशार्दूलेप्रविष्टेनगरंपुनः।
प्रववर्षसहस्राक्षःशस्यानिजनयन्प्रभुः।ततःसराष्ट्रंमुमुदेतत्पुरंपरयामुदा।तेनपार्थिवमुख्येनभावितंभा
वितात्मना।ततोद्वादशवर्षाणिपुनरीजेनराधिपः।तपत्यासहितःपत्न्यायथाशच्यामरुत्पतिः॥ गंधर्वउ
वाच एवमासीन्महाभागातपतीनामपौर्विकी।तववैवस्वतीपार्थतापत्यस्त्वंययामतः।तस्यांसंजन
यामासकुरुंसंवरणोनृपः।तपत्यांतपतश्रेष्ठतापत्यस्त्वंययामतः॥ इत्यादिपर्वणितापत्यंसमाप्तं ॥
॥ १६७ ॥वैशं॥ ॥सगंधर्ववचःश्रुत्वातत्तदाभरतर्षभ।अर्जुनःपरयाभक्त्यापूर्णचंद्रइवावभौ।
उवाचचमहेष्वासोगंधर्वंकुरुसत्तमः।जातकौतूहलोतीववसिष्ठस्यतपोवलात्।वसिष्ठइतियस्यैतदृषे

त्रीमत्वयेरितं। एतदिछाम्यहं श्रोतुं यथावत्तद्वदस्व मे। यएष गंधर्वपते पूर्वेषां नः पुरोहितः। आसीदेतन्म
माचक्ष्व क एष भगवानृषिः॥ गंधर्वउ० ॥ब्रह्मणो मानसः पुत्रो वसिष्ठोरुंधतीपतिः। तपसा निर्जि
तौ शश्वदजेयावमरैरपि। कामक्रोधावुभौ यस्य चरणौ संववाहतुः। यस्तु नोछेदनं चक्रे कुशिकानामुदार
धीः। विश्वामित्रापराधेन धारयन्मन्युमुत्तमं। पुत्रव्यसनसंतप्तः शक्तिमानप्यशक्तवत्। विश्वामित्रविना
शायन चक्रे कर्म दारुणं। मृतांश्च पुनराहर्तुं यः स पुत्रान्यमक्षयात्। कृतांतं नातिचक्राम वेलामिव महो
दधिः। यं प्राप्य विजितात्मानं महात्मानं नराधिपाः। इक्ष्वाकवो महीपाला लेभिरे पृथिवीमिमां। पुरोहित
मिमं प्राप्य वसिष्ठमृषिसत्तमं। ईजिरे क्रतुभिश्चैव नृपास्ते कुरुनंदन। स हि तान्याजयामास सर्वान्नृप
तिसत्तमान्। ब्रह्मर्षिः पांडवश्रेष्ठ बृहस्पतिरिवामरान्। तस्माद्धर्मप्रधानात्मा वेदधर्मविदीप्सितः। ब्राह्मण

णो गुणवान्कश्चित्पुरोधाः प्रतिदृश्यतां। क्षत्रियेणाभिजातेन पृथिवीं जेतुमिछता। पूर्वं पुरोहितः कार्यः पा
र्थ राज्याभिवृद्धये। महीं जिगीषता राज्ञा ब्रह्म कार्यं पुरःसरं। तस्मात्पुरोहितः कश्चिद्गुणवान्विजितेंद्रियः
। विद्वान्भवतु वो विप्रो धर्मकामार्थतत्त्ववित् इत्यादिपर्वणि १६९ अर्जुनउवाच ॥

किंनिमित्तमभूद्वैरंविश्वामित्रवसिष्टयोः।वसतोराश्रमेदिव्येशंसनःसर्वमेवतत्॥ गंधर्वउ ॥
इदंवासिष्ठमाख्यानंपुराणंपरिचक्षते।पार्थसर्वेषुलोकेषुयथावत्तन्निबोधमे।कन्यकुब्जेमहानासी
त्पार्थिवोभरतर्षभः।गाधीतिविश्रुतोलोकेकुशिकस्यात्मसंभवः।तस्यधर्मात्मनःपुत्रःसमृद्धबलवा
हनः।विश्वामित्रइतिख्यातोबभूवरिपुमर्द्दनः।सचचारसहामात्योमृगयांगहनेवने।मृगान्विध्यन्वराहां
श्चरम्येषुमरुधन्वसु।व्यायामकर्शितःसोथमृगलिप्सुःपिपासितः।आजगामनरश्रेष्ठवसिष्ठस्याश्र
मंप्रति।तमागतमभिप्रेक्ष्यवसिष्ठःश्रेष्ठभागृषिः।विश्वामित्रंनरश्रेष्ठंप्रतिजग्राहपूजया।पाद्यार्घ्याच
मनीयेनस्वागतेनचभारत।तथैवपरिजग्राहवन्येनहविषातथा।तस्याथकामधुग्धेनुर्वसिष्ठस्यम
हात्मनः।उक्ताकामान्प्रयच्छेतिसाकामान्दुदुहेसदा।ग्राम्यारण्याओषधीश्चदुदुहेपयएववा।षड्रसंचा
मृतनिभंरसायनमनुत्तमं।भोजनीयानिपेयानिभक्ष्याणिविविधानिच।लेह्यान्यमृतकल्पानिचोष्याणि
चतथार्जुन।रत्नानिचमहार्हाणिवासांसिविविधानिच।तैःकामैःसर्वसंपूर्णैःपूजितश्चमहीपतिः।सामा
त्यःसबलश्चैवतुतोषसभृशंतदा।षडुन्नतांसुपार्श्वोरुंपृथुपंचसमावृतां।मंडूकनेत्रांस्वाकारांपीनोध

समनिंदितां।सुवालधिं शंकुकर्णीं चारुशृंगां मनोरमां।पुष्टायतशिरोग्रीवां विस्मितः सोभिवीक्ष्य तां।
अभिनंद्य स तां राजन्नंदिनीं गाधिनंदनः।अब्रवीच्च भृशं तुष्टः स राजा तमृषिं तदा।अर्बुदेन गवां ब्रह्मन्मम
राज्येन वा पुनः।नंदिनीं संप्रयच्छस्व भुंक्ष्व राज्यं महामुने वसिष्ठ उ देवतातिथिपित्रर्थमाज्यार्थं च
पयस्विनी।अदेया नंदिनीयं वै राज्येनापि तवानघ विश्वामित्र उ क्षत्रियोहं भवान्विप्रस्तपःस्वाध्या
यसाधकः।ब्राह्मणेषु कुतो वीर्यं प्रशांतेषु धृतात्मसु।अर्बुदेन गवां यस्त्वं न ददासि ममेप्सितं।स्वधर्मं न
प्रहास्यामि नेष्यामि च बलेन गां वसिष्ठ उ बलस्थश्चासि राजा च बाहुवीर्यश्च क्षत्रियः।यथेच्छ
सि तथा क्षिप्रं कुरु मा त्वं विचारय गंधर्व उ एवमुक्तस्तदा पार्थ विश्वामित्रो बलादिव।हंसचंद्रप्रतीका
शां नंदिनीं तां जहार गां।कशादंडप्रणुदितां काल्यमानामितस्ततः।हंभायमाना कल्याणी वसिष्ठस्याथ
नंदिनी।आगम्याभिमुखी पार्थ तस्थौ भगवदुन्मुखी।भृशं च ताड्यमाना वै न जगामाश्रमात्तत वसिष्ठ
उवाच शृणोमि ते रवं भद्रे विनदंत्याः पुनः पुनः।किं कर्तव्यं मया तत्र क्षमावान्ब्राह्मणो ह्यहं॥ ॥
गंधर्व उ सा भयान्नंदिनी तेषां बलानां भरतर्षभ।विश्वामित्रभयोद्विग्ना वसिष्ठं समुपागमत्॥ ॥

गौरुवाच कषाग्रदंडाभिहतांक्रोशंतीमामनाथवत्। विश्वामित्रवलैर्घोरैर्भगवत्किमुपेक्षसे ॥
गंधर्व उ नंदिन्यामेवमुक्तंतस्यांधर्षितायांमहामुनिः। नचुक्षुभेनतद्धैर्यान्नचचालदृढव्रतः व
सिष्ठ उ क्षत्रियाणांवलंतेजोब्राह्मणानांक्षमावलं। क्षमामांभजतेतस्माद्गम्यतांयदिरोचते नंदि
न्युवाच किंनुत्यक्तास्मिभगवन्यदेवंत्वंप्रभाषसे। अत्यक्ताहंत्वयाब्रह्मन्नेतुंशक्यानवैवलात्॥ ॥
वसिष्ठ उ नत्वांत्यजामिकल्याणिस्थीयतांयदिशक्यते। दृढेनदाम्नावध्वैषवत्सस्तेह्रियतेवलात्
गंधर्व उ स्थीयतामितितच्छ्रुत्वावसिष्ठस्यपयस्विनी। ऊर्ध्वांचितशिरोग्रीवाप्रवभौरौद्रदर्शना। क्रोध
रक्तेक्षणासागौर्हंभारवघनस्वना। विश्वामित्रस्यतत्सैन्यंव्यद्रावयतसर्वशः। कषाग्रदंडाभिहताका
ल्यमानाततस्ततः। क्रोधरक्तेक्षणाक्रोधंभूयएवसमादधे। आदित्यइवमध्याह्नेक्रोधदीप्तवपुर्वभौ। अं
गारवर्षंमुंचंतीसुकुवालधितोमहत्। असृजत्पह्लवान्पुच्छात्प्रस्रवाद्द्राविडाञ्छकान्। मूत्रतश्चासृजत्कांची
न्शवरांश्चैवपार्श्वतः। पौंड्रान्किरातान्यवनान्सिंहलान्वर्वरान्खसान्। चिवुकांश्चपुलिंदांश्चनीचान्हूण
न्सकेरलान्। ससर्जफेनतःसागौर्म्लेच्छान्हूणान्विधानपि। तैर्विसिष्टैर्महासैन्यंनानाम्लेच्छगणैस्तदा। नानाव

रणसंछन्नैर्नानायुधधरैस्तथा।अवाकीर्यत संरब्धैर्विश्वामित्रस्य पश्यतः।एकैकश्च तदा योधः पंचभिः स
प्तभिर्वृतः।अस्त्रवर्षेण महता वध्यमानं वलं तदा।प्रभग्नं सर्वतस्त्रस्तं विश्वामित्रस्य पश्यतः।नच प्राणैर्वि
युज्यंते के चित्तत्रापि सैनिकाः।विश्वामित्रस्य संक्रुद्धैर्वासिष्ठैर्भरतर्षभ।सा गौः तत्सकलं सैन्यं कालयामा
स दूरतः।विश्वामित्रस्य तत्सैन्यं कालमानं त्रियोजनं।क्रोशमानं भयोद्विग्नं त्रातारं नाध्यगच्छत।दृष्ट्वा तन्म
हदाश्चर्यं ब्रह्मतेजोभवं तदा।विश्वामित्रः क्षत्रभावान्निर्विण्णो वाक्यमब्रवीत्।धिग्वलं क्षत्रियवलं ब्रह्म
तेजोवलं वलं।वलावलं विनिश्चित्य तप एव परं वलं।स राज्यं स्फीतमुत्सृज्य तां च दीप्तां नृपश्रियं।भोगां
श्च पृष्ठतः कृत्वा तपस्येव मनो दधे।स गत्वा तपसा सिद्धिं लोकान्विष्टभ्य तेजसा।तताप सर्वान्दीप्तौजा ब्रा
ह्मणत्वमवाप्तवान्।अपिबच्च ततः सोममिंद्रेण सह कौशिकः॥ इत्यादिपर्वणि वासिष्ठे १६९

गंधर्व उ० कल्माषपाद इत्येवँ लोके राजा वभूव ह।इक्ष्वाकुवंशजः पार्थ तेजसासदृशो भुवि।स कदाचिद्व
नं राजा मृगयां निर्ययौ पुरात्।मृगान्विध्यन्वराहांश्च चचार रिपुमर्दनः।तस्मिन्वने महाघोरे खड्गांश्च व
हुशो हनत्।हत्वा च सुचिरं श्रांतो राजा निववृते ततः।अकामयत्तं याज्यार्थे विश्वामित्रः प्रतापवान्।स तु रा

जामहात्मानं वासिष्टमृषिसत्तमं । तस्मार्त्तेश्यक्रधार्त्तश्च एकायनगतः पथि । अपश्यदजितः संख्ये मुनिं
प्रतिमुखागतं । सत्किंनाम महाभागं वसिष्टकुलवर्द्धनं । ज्येष्टं पुत्रं पुत्रशतात् वसिष्ठस्य महात्मनः । अप
गच्छ पथोस्माकमित्येवं पार्थिवो ब्रवीत् । न थाक्रषिरुवाचैनं सांत्वयन् श्लक्ष्णया गिरा । मम पंथा महारा
ज धर्म एष सनातनः । सर्व्वेषु धर्मेषु देयः पंथा द्विजातये । एवं परस्परं तौ तु पथोर्थं वाक्यमूचतुः ।
अपसर्प्पोपसर्प्पेति वाग्युत्तरमकुर्वतां । ऋषिस्तु नापचक्राम तस्मिन्धर्मपथे स्थितः । नापि राजा मुनेर्मा
नात्क्रोधाच्चाथ जगाम ह । अमुंचंतं तु पंथानं तमृषिं नृपसत्तम ॥ जघान कषया मोहात्तदा राक्षसव
न्मुनिं । कषाप्रहाराभिहतस्ततः स मुनिसत्तमः । तं शशाप नृपश्रेष्ठं वासिष्टः क्रोधमूर्छितः । हंसि राक्ष
सवद्यस्माद्राजापसद तापसं । तस्मात्त्वमद्यप्रभृति पुरुषादो भविष्यति । मनुष्यपिशिते सक्तश्चरिष्य
सि महीमिमां । गच्छ राजाधमेत्युक्तः शक्तिणा वीर्यशक्तिना । ततो याज्यनिमित्तं तु विश्वामित्रवसिष्ठयोः
। वैरमासीत्तदा तं तु विश्वामित्रोन्वपद्यत । तयोर्विवदतोरेवं समीपमुपचक्रमे । ऋषिरुग्रतपाः पार्थ वि
श्वामित्रः प्रतापवान् । ततः स बुबुधे पश्चात्तमृषिं नृपसत्तमः । ऋषेः पुत्रं वसिष्ठस्य वासिष्टमिव तेजसा ।

अंतर्द्धीयत ततोत्मानं विश्वामित्रोपि भारत। नावुभाव तिचक्राम चिकीर्षन्नात्मनः प्रियं। स तु शप्तस्तदा ते
न शक्त्रिणा वै नृपोत्तमः। जगाम शरणं शक्तिं प्रसादयितुमर्हयन्। तस्य भावं विदित्वा स नृपतेः कुरुसत्त
म। विश्वामित्रस्ततो रक्षः आदिदेश नृपं प्रति। शापात्तस्य तु विप्रर्षेर्विश्वामित्रस्य चाज्ञया। राक्षसः किंकरो ना
म विवेश नृपतिं तदा। रक्षसा तं गृहीतं तु विदित्वा मुनिसत्तमः। विश्वामित्रोप्यपक्रामत्तस्माद्देशादरिंद
म। ततः स नृपतिस्तेन रक्षसांतर्गतेन वै। बलवत्पीडितः पार्थ नान्वबुध्यत किंचन। ददर्शाथ द्विजः कश्चि
द्राजानं प्रस्थितं वनं। अयाचत क्षुधापन्नः समांसं भोजनं तदा। तमुवाचाथ राजर्षिर्द्विजं मित्रसहस्तदा।
आस्व ब्रह्मंस्त्वमत्रैव मुहूर्त्तं प्रतिपालयन्। निवृत्तः प्रतिदास्यामि भोजनं ते यथेप्सितं। इत्युक्त्वा प्रययौ
राजा तस्थौ च द्विजसत्तमः। ततो राजा परिक्रम्य यथाकामं यथासुखं। निवृत्तोंतःपुरं पार्थ प्रविवेश म
हामनाः। ततोर्द्धरात्र उत्थाय सूदमानाय्य सत्वरं। उवाच राजा संश्रुत्य ब्राह्मणस्य प्रतिश्रुतं। गच्छामुष्मि
न्वनोद्देशे ब्राह्मणो मां प्रतीक्षते। अन्नार्थी तं त्वमन्नेन समांसेनोपपादय गं ४४ ठ एवमुक्तस्त
तः सूदः सोनासाद्यामिषं क्वचित्। निवेदयामास तदा तस्मै राज्ञे व्यथान्वितः। राजा तु रक्षसाविष्टः सू

दमाहगतव्यथः।अप्येनंनरमांसेनसूदयेतिपुनःपुनः।तथेत्युक्त्वाततःसूदःसंस्थानंवध्यघातिनां।
गत्वाजहारत्वरितोनरमांसमपेतभीः।सतत्संस्कृत्यविधिवदन्नोपहितमाशुवै।तस्मैप्रादाद्ब्राह्मणायक्षु
धितायतपस्विने।ससिद्धचक्षुषादृष्ट्वातदन्नंद्विजसत्तमः।अभोज्यमिदमित्याहक्रोधपर्याकुलेक्षणः।
ब्राह्मणउ यस्मादभोज्यमन्नंतेददातिसनृपाधमः।तस्मात्तस्यैवमूढस्यभविष्यत्यत्रलोलुपा।स
क्तोमानुषमांसेषुयथोक्तःशक्तिनापुरा।उद्वेजनीयोभूतानांचरिष्यतिमहीमिमां।द्विरनुव्याहृतेराज्ञः
सशापोबलवानभूत्।रक्षोबलसमाविष्टोविसंज्ञश्चाभवन्नृपः।ततःसनृपतिश्रेष्ठोरक्षसापहृतेन्द्रियः।
उवाचशक्तिंतंदृष्ट्वानचिरादिवभारत।यस्मादसदृशःशापःप्रयुक्तोयंमयित्वया।तस्मात्त्वत्तःप्रवर्तिष्ये
खादितुंमानुषानहं।एवमुक्त्वाततःसद्यस्तंप्राणैर्विप्रयुज्यच।शक्तिणंभक्षयामासव्याघ्रःपशुमिवेप्सि
तं।शक्तिणंतुमृतंदृष्ट्वाविश्वामित्रःपुनःपुनः।वसिष्ठस्यैवपुत्रेषुतद्रक्षःसंदिदेशह।सतान्शक्त्यवरान्सु
त्रान्वसिष्ठस्यमहात्मनः।भक्षयामाससंक्रुद्धःसिंहःक्षुद्रमृगानिव।वसिष्ठोघातितान्श्रुत्वाविश्वामित्रेण
तान्सुतान्।धारयामासतंशोकंमहाद्रिरिवमेदिनीं।चक्रेचात्मविनाशायबुद्धिंसमुनिसत्तमः।नत्वेवकौशि

कोष्ठेदंमेनेमतिमतांवरः।समेरुकूटादात्मानंमुमोचभगवानृषिः।गिरेस्तस्यशिलायांचतूलराशा
विवापततः।नममारचपातेनसयदातेनपांडव।तदाग्निमिद्धंभगवान्संविवेशमहावने।तंतदासुसमि
द्धोपिनददा कुताशनः।दीप्यमानोममित्रघ्न शीतोग्निरभवत्ततः।ससमुद्रमभिप्रेक्ष्यशोकाविष्टोम
हामुनिः।बद्ध्वाकंठेशिलांगुर्वीनिपपाततदांभसि।ससमुद्रोर्मिवेगेनस्थलेन्यस्तोमहामुनिः।जगामस
ततःखिन्नःपुनरेवाश्रमंप्रति इत्यादिपर्वणिवासिष्ठे १७· गंधर्वे ७ ततोदृष्ट्वाश्रमप
दंरहितंतैःसुतैर्मुनिः।निर्जगामसुदुःखार्तःपुनरप्याश्रमात्ततः।सोपश्यत्सरितंपूर्णांप्रावृट्कालेननवां
भसा।वृक्षान्बहुविधान्पार्थहरंतींतीरजान्बहून्।अथचिंतांसमापेदेपुनःकौरवनंदन।अंभस्यस्यानिम
ज्जेयमितिदुःखसमन्वितः।ततःपाशैस्तदात्मानंगाढंबद्ध्वामहामुनिः।तस्याजलेमहानद्यानिममज्जसु
दुःखितः।अथछित्वानदीपाशांस्तस्यारिबलसूदन।स्थलस्थंतमृषिंकृत्वाविपाशंसमवासृजत्।उत्तता
रततःपाशैर्विमुक्तःसमहानृषिः।विपाशेतिचनामास्यानद्याश्चक्रेमहानृषिः।शोकेबुद्धिंतदाचक्रेनचैक
त्रव्यतिष्ठत।सोगच्छत्पर्वतांश्चैवसरितश्चसरांसिच।दृष्ट्वासपुनरेवर्षिर्नदींहैमवतींतदा।चंडग्राहवतींभी

मांतस्याः स्रोतस्यपातयत्। सातमग्निसमंविप्रमनुचिंत्यसरिद्वरा। शतधाविद्रुता यस्माच्छतद्रु रितिविश्रु
ता। ततः स्थलगतं दृष्ट्वा तत्राप्यात्मानमात्मना। मर्त्तुंनशक्यमित्युक्त्वापुनरेवाश्रमंययौ। सगत्वाविविधांश्शै
लान्देशान्बहुविधांस्तथा। अदृश्यंत्याश्वश्र्वायावद्ध्याश्रमेनुसृतोभवत्। अथसुश्रावसंगत्यावेदाध्ययन
निस्वनं। पृष्ठतः परिपूर्णार्थंषड्भिरंगैरलंकृतं। अनुव्रजतिकोन्वेषमामित्येवाथसोऽब्रवीत्। अहमिस्यदृशं
तीमंसास्नुषाप्रसभाषत। शक्तेर्भार्यामहाभागातपोयुक्तातपस्विनी॥ वसिष्ठउ ॥पुत्रिकस्यैषसां
गस्यवेदस्याध्ययनस्वनः। पुरासांगस्यवेदस्यशक्तेरिवमयाश्रुतः अदृश्यंत्युवाच अयंकुक्षौ
समुत्पन्नः शक्तेर्गर्भः सुतस्यते। समाद्वादशतस्येहवेदानभ्यस्यतोमुने गंधर्वउ एवमुक्तस्तयाहृष्टोव
सिष्ठः श्रेष्ठभागृषिः। अस्तिसंतानमित्युक्त्वामृत्योः पार्थन्यवर्त्तत। ततः प्रतिनिवृत्तः सतयावध्वासहानघ। कल्मा
षपादमासीनंददर्शविजनेवने। सतुदृष्ट्वैवतंराजाक्रुद्धउत्थायभारत। आविष्टोरक्षसाउग्रेणइयेषात्तुंतदामुनिं।
अदृश्यंतीतुतंदृष्ट्वाक्रूरकर्म्माणमग्रतः। भयसंविग्नयावाचावसिष्ठमिदमब्रवीत्। असौमृत्युमिवोग्रेणदंडेन
भगवन्नितः। प्रगृहीतेनकाष्ठेनराक्षसोभ्येतिदारुणः। तंनिवारयितुंशक्तोनान्योस्तिभुविकश्चन। त्वदृतेह्यम

हाभागसर्व्ववेदविदांवरः।पाहिमांभगवन्पापादस्माद्दारुणदर्शनात।राक्षसोयमिहायातुवैनूनमावांसमीह
ते॥ वसिष्ठउ ॥माभैःपुत्रिनभेतव्यंराक्षसात्तुकथंचन।नैतद्रक्षोभयंयस्मात्पश्यसित्वमुपस्थितं।रा
जाकल्माषपादोयंवीर्यवान्प्रथितोभुवि।सएषोस्मिन्वनोद्देशेनिवसत्यतिभीषणः गंधर्वउ तमाप
ततंसंप्रेक्ष्यवसिष्ठोभगवानृषिः।वारयामासतेजस्वीहुंकारेणैवभारत।मंत्रपूतेनचपुनःसतमभ्युक्ष्यवारिणा
।मोक्षयामासवैशापात्तस्माद्योगान्नराधिपं।सहिद्वादशवर्षाणिवसिष्ठस्यैवतेजसा।ग्रस्तआसीद्गृहेणेवपर्व
कालेदिवाकरः।रक्षसाविप्रमुक्तोथसनृपस्तद्वनंमहत्।तेजसारंजयामाससंध्याभ्रमिवभास्करः।प्रतिल
भ्यततःसंज्ञामभिवाद्यकृतांजलिः।उवाचनृपतिःकालेवसिष्ठमृषिसत्तमं।सौदासोहंमहाभागयाज्यस्तेमु
निसत्तम।अस्मिन्कालेयदिष्टंतेब्रूहिकिंकरवाणिते वसिष्ठउ वृत्तमेतद्यथाकालंगच्छराज्यंप्रशाधि
वै।ब्राह्मणांस्तुमनुष्येंद्रमावमंस्थाःकदाचन राजोवाच नावमंस्येमहाभागकदाचिद्ब्राह्मणर्षभान्।त्व
न्निदेशेस्थितःसम्यक्पूजयिष्याम्यहंद्विजान्।इक्ष्वाकूणांचयेनाहमनृणःस्यांद्विजोत्तम।तत्त्वत्तःप्राप्तुमि
च्छामिसर्व्ववेदविदांवर।अपत्यमीप्सितंमह्यंदातुमर्हसिसत्तम।शीलरूपगुणोपेतमिक्ष्वाकुकुलवृद्धये॥

गंधर्वउ इदानीसेवतंतत्रराजानंप्रत्युवाचह।वसिष्ठःपरमेष्वासंसत्यसंधोद्विजोत्तमः।ततःप्रतिगतेका
लेवसिष्ठःसहितेनवै।ख्यातांपुरीमिमांलोकेष्वयोध्यांमनुजेश्वर।तंप्रजाःप्रतिमोदंत्यःसर्वाःप्रत्युद्गताःस
दा।विपाप्मानंमहात्मानंदिवौकसइवेश्वरं।सुचिरायमनुष्येंद्रोनगरींपुण्यलक्षणां।विवेशसहितस्तेनव
सिष्ठेनमहर्षिणा।ददृशुस्तंमहीपालमयोध्यावासिनोजनाः।पुरोहितेनसहितंदिवाकरमिवोदितं।सचतां
पूरयामासलक्ष्यालक्ष्मीवतांवरः।अयोध्यांव्योमशीतांशुःशरत्कालइवोदितः।संसिक्तमृष्टपंथानंपता
काध्वजशोभितं।मनःप्रह्लादयामासतस्यतत्पुरमुत्तमं।तुष्टपुष्टजनाकीर्णासापुरीकुरुनंदन।अशोभ
ततदातेनशक्रेणेवामरावती।ततःप्रविष्टेराजर्षौतस्मिंस्तत्पुरमुत्तमं।राज्ञस्तस्याज्ञयादेवीवसिष्ठमुप
चक्रमे।महर्षिःसंविदंकृत्वासंबभूवतयासह।देव्यादिव्येनविधिनावसिष्ठःश्रेष्ठभागृषिः।ततस्तस्यां
समुत्पन्नेगर्भेसमुनिसत्तमः।राज्ञाभिवादितस्तेनजगाममुनिराश्रमं।दीर्घकालेनसागर्भंसुषुवेनतुतं
यदा।तदादेव्यश्मनाकुक्षिंनिर्बिभेदयशस्विनी।ततोपिद्वादशेचवर्षेसयज्ञेपुरुषर्षभः।अश्मकोनामरा
जर्षिःपौदन्यंयोन्यवेशयत् इत्यादिपर्वणिवासिष्ठे १७१ गंधर्वउ आश्रमस्थानतःपु

त्रमदृश्यंतीव्यजायत। शक्तेः कुलकरं राजन्द्वितीयमिव शक्तिनं। जातकर्मादिकस्तस्य क्रियाः स मुनिस
त्तमः। पौत्रस्य भरतश्रेष्ठ चकार भगवान्स्वयं। परासुः स यतस्तेन वसिष्ठः स्थापितो मुनिः। गर्भस्थेन त
तो लोके पराशर इति स्मृतः। अमन्यत स धर्मात्मा वसिष्ठं पितरं मुनिः। जन्मप्रभृति तस्मिंस्तु पितरीव्या
व्यवर्त्तत। स तात इति विप्रर्षिं वसिष्ठं प्रत्यभाषत। मातुः समक्षं कौंतेय अदृश्यंत्याः परंतप। तातेति परिपू
र्णार्थं तस्य तन्मधुरं वचः। अदृश्यंत्यश्रुपूर्णाक्षी शृण्वंती तमुवाच ह। मा तात तात तातेति ब्रूह्येनं पितरं पि
तुः। रक्षसा भक्षितस्तात तव तातो वनांतरे। मन्यसे यं तु तातेति नैष तातस्तवानघ। आर्यो ह्येष पिता तातस्य न
पितुस्तव यशस्विनः। स एवमुक्तो दुःखार्त्तः सत्यवागृषिसत्तमः। सर्वलोकविनाशाय मतिं चक्रे महात्म
नाः। तं तथा निश्चितात्मानं स महात्मा महातपाः। ऋषिर्ब्रह्मविदां श्रेष्ठो मैत्रावरुणिरन्यधीः। वसिष्ठो वा
रयामास हेतुना येन तच्छृणु वसिष्ठ उ कृतवीर्य इति ख्यातो बभूव पृथिवीपतिः। याज्यो वेदवि
दां लोके भृगूणां पार्थिवर्षभः। स तानग्रभुजस्तात धान्येन च धनेन च। सोमांते तर्पयामास विपुलेन
विशांपते। तस्मिंन्नृपतिशार्दूले स्वर्यातेथ कथंचन। बभूव तत्कुलेयानां द्रव्यकार्यमुपस्थितं। भृगूणां तु

धनंज्ञात्वाराजानःसर्वएवते।याचिष्णवोभिजग्मुस्तांस्ततोभार्गवसत्तमान्।भूमौतुनिदधुःकेचिद्भृगूणांवि
त्तंयथेप्सितं।क्षत्रियाणांतदातातकारणांतरदर्शनात्।ततोमहीतलंतातक्षत्रियेणयदृच्छया।खनता
धिगतंवित्तंकेनचिद्भृगुवेश्मनि।तद्वित्तंददृशुःसर्वेसमेताःक्षत्रियर्षभाः।अवमन्यततःक्रोधाद्भृगूंस्तां
छरणागतान्।निजघ्नुःपरमेष्वासाःसर्वांस्तान्निशितैःशरैः।आगर्भादवकृंतंतश्चेरुःसर्वांवसुंधरां।
ततउच्छिद्यमानेषुभृगुष्वेवंभयात्तदा।भृगुपत्न्योगिरिंदुर्गंहिमवंतंप्रपेदिरे।तासामन्यतमागर्भंभया
द्दध्रेमहौजसं।ऊरुणैकेनवामोरूर्भर्तुःकुलविवृद्धये।तद्गर्भमुपलभ्याशुब्राह्मणीयाभयार्दिता।गत्वैक
कथयामासक्षत्रियाणामुपह्वरे।ततस्तेक्षत्रियाजग्मुस्तंगर्भंहंतुमुद्यताः।ददृशुर्ब्राह्मणींतेथदीप्यमानां
स्वतेजसा।अथगर्भःसभित्वोरुंब्राह्मण्यानिर्जगामह।मुष्णन्दृष्टीःक्षत्रियाणांमध्याह्नइवभास्करः।त
तश्चक्षुर्विहीनास्तेगिरिदुर्गेषुबभ्रमुः।ततस्तेमोहमापन्नाराजानोनष्टदृष्टयः।ब्राह्मणींशरणंजग्मुर्दृष्ट्य
र्थंतामनिंदितां।ऊचुश्चैनांमहाभागांक्षत्रियास्तेविचेतसः।ज्योतिःप्रहीणादुःखार्ताःशांतार्चिषइवाग्नयः।
भगवत्याःप्रसादेनगच्छेत्क्षत्रंसचक्षुषं।उपारम्यचगच्छेमसहिताःपापकर्मिणः।सपुत्रात्वंप्रसादंनःकर्तु

आ०प०
२६६

मर्हसि शोभने। पुनर्दृष्टिप्रसादेन राज्ञः संत्रातुमर्हसि ॥ इत्यादिपर्वणि और्वे १७२ ब्राह्मण्युवा
च ॥ नाहं गृह्णामि वस्तात दृष्टीर्नास्मि रुषान्विता। अयं तु भार्गवो नूनमूरुजः कुपितोद्य वः। तेन चक्षूं
षि वस्तात व्यक्तं कोपान्महात्मना। स्मरता निहतान्बंधूनादत्तानि न संशयः। गर्भानपि यदा यूयं भृगूणां
घ्नत पुत्रकाः। तदायमूरुणा गर्भो मया वर्षशतं धृतः। षडंगश्चाखिलो वेद इमं गर्भस्थमेव ह। विवेश भृ
गुवंशस्य भूयः प्रियचिकीर्षया। सोयं पितृवधाद्व्यक्तं क्रोधाद्वो हंतुमिच्छति। तेजसा तस्य दिव्येन चक्षूंषि
मुषितानि वः। तमिमं तात याचध्वमौर्वं मम सुतोत्तमं। अयं वः प्रणिपातेन तुष्टो दृष्टीः प्रमोक्ष्यति ॥ व
सिष्ठ उवाच ॥ एवमुक्तास्ततः सर्वे राजानस्ते तमूरुजं। ऊचुः प्रसीदेति तदा प्रसादं च चकार सः। अनेनैव
च विख्यातो नाम्ना लोकेषु सत्तमः। स और्व इति विप्रर्षिरूरुं भित्वा व्यजायत। चक्षूंषि प्रतिलभ्याथ प्रति
जग्मुस्ततो नृपाः। भार्गवस्तु मुनिर्मेने सर्वलोकपराभवं। स चक्रे तात लोकानां विनाशाय महामनाः। स
र्वेषामेव कार्त्स्न्येन मनः प्रवणमात्मनः। इच्छन्नपचितिं कर्तुं भृगूणां भृगुनंदनः। सर्वलोकविनाशाय तपसा
महतैधितः। तापयामास ताँल्लोकान्सदेवासुरमानुषान्। तपसोग्रेण महता नंदयिष्यन्पितामहान्। त

२६६

नस्तंपितरस्तातविज्ञायकुरुनंदनं।पितृलोकादुपागम्यसर्व्वऊचुरिदंवचः पितरऊचुः और्व्वदृ
ष्टःप्रभावस्तेतपसोग्रस्यपुत्रक।प्रसादंकुरुलोकानांनियछक्रोधमात्मनः।नानीशैर्हितदातातभृगुभि
र्भावितात्मभिः।वधोह्युपेक्षितःसर्व्वैःक्षत्रियाणांविहिंसतां।आयुषाविप्रकृष्टेनयदानःखेदआविशत्।त
दास्माभिर्वधस्तातक्षत्रियैरीप्सितःस्वयं।निखातंयच्चवैवित्तंकेनचिद्भृगुवेश्मनि।वैरायैवतदान्यस्तंक्ष
त्रियान्कोपयिष्णुभिः।किंहिवित्तेननःकार्यंस्वर्गेप्सूनांद्विजोत्तम।यदस्माकंधनाध्यक्षःप्रभूतंधनमाहर
त्।यदातुमृत्युरादातुंननःशक्नोतिसर्व्वशः।तदास्माभिरयंदृष्टउपायस्तातसंमतः।आत्महाचपुमांस्ता
तनलोकांल्लभतेशुभान्।ततोस्माभिःसमीक्ष्यैवंनात्मनात्मानिपातितः।नचैतन्नःप्रियंतातयदिदंक
र्त्तुमिछसि।नियछेदंमनःपापात्सर्व्वलोकपराभवात्।नहिनःक्षत्रियांस्तातनलोकास्सप्तपुत्रक।दूषयं
तिनतस्तेजःक्रोधमुत्पतितंजहि इत्यादिपर्व्वणिऔर्व्वे १७२ और्व्वउ उक्तवानस्मियंक्रो
धात्प्रतिज्ञांपितरस्तदा।सर्व्वलोकविनाशायनसामेवितथाभवेत्।वृथारोषप्रतिज्ञोवैनाहंभवितुमुत्सहे।
अनिस्तीर्णोहिमांरोषोदहेदग्निरिवारणिं।योहिकारणतःक्रोधंसंजातंक्षंतुमर्हति।नालंसमनुजःस

श्रा०प०
२६७

स्य रुत्त्रिवर्गं परिरक्षितुं । असिष्टानां नियंता हि शिष्टानां परिरक्षिता । स्थाने रोषः प्रयुक्तः स्यान्नृपैः स
र्वैर्जिगीषुभिः । अश्रोषमहमूरुस्थो गर्भशय्यागतस्तदा । आरावं मातृवर्गस्य भृगूणां क्षत्रियैर्वधे सं
हारो हि यदा लोके भृगूणां क्षत्रियाधमैः । आगर्भोच्छेदनाक्रांतस्तदा मामन्युराविशत् । संपूर्णकोशाः
किल मे मातरः पितरस्तथा । भयात्सर्वेषु लोकेषु नाधिजग्मुः परायणं । तान्भृगूणां यदा दारान्कश्चि
न्नाभ्युपपद्यत । माता तदा दधारेयमूरुणैकेन मां शुभा । प्रतिषेद्धा हि पापस्य यदा लोकेषु विद्यते । तदा
सर्वेषु लोकेषु पापकृन्नोपपद्यते । यदा तु प्रतिषेद्धारं पापो न लभते क्वचित् । तिष्ठंति वहवो लोके तदा
पापेषु कर्मसु । यान न्नपि च यः पापं शक्तिमान्न नियच्छति । ईशः सन्सोपि तेनैव कर्मणा संप्रयुज्यते
। राजभिश्चेश्वरैश्चैव यदि वै पितरो मम । शक्तैर्न्न शक्तिता त्रातुमिष्टं मत्वेह जीवितं । अत एषामहं क्रुद्धो
लोकानामीश्वरो ह्यहं । भवतां च वचो नालमहं समभिवर्त्तितुं । ममापि च भवेदेवमीश्वरस्य सतो महत् ।
उपेक्षमाणस्य पुनर्ल्लोकानां किल्विषाद्भयं । यश्चायं मन्युजो मेग्निर्ल्लोकानादातुमिच्छति । दहदेष च्चमा
मेव निगृहीतः स्वतेजसा । भवतां च विजानामि सर्वलोकहितेप्सुतां । तस्माद्विधध्वं यच्छ्रेयो लोकानां म

२६७

चेत्पुराः पितरऊचुः यएषमन्युजस्तेग्निर्लोकानादातुमिच्छति। अप्सुतंमुंचभद्रंतेलोका
ह्यप्सुप्रतिष्ठिताः। आपोमयाःसर्वरसाःसर्वमापोमयंजगत्। तस्मादप्सुविमुंचेमंक्रोधाग्निंद्विजसत्त
म। अयंतिष्ठतुतेविप्रयदीच्छसिमहोदधौ। मन्युजोग्निर्दहन्नापोलोकाह्यापोमयाःस्मृताः। एवंसत्यप्र
तिज्ञेयंनवानघभविष्यति। नचैवंसामरालोकागमिष्यंतिपराभवं वसिष्ठउ ततस्तंक्रोधजं
तातऔर्वोग्निंवरुणालये। उत्ससर्जसचैवापउपयुंक्तेमहोदधौ। तस्मात्त्वमपिभद्रंतेनलोकान्हंतुम
र्हसि। पराशरपरांल्लोकानजाननज्ञानवतांवरः इत्यादिपर्वणि १७४ गंधर्वउ
एवमुक्तःसविप्रर्षिर्वसिष्ठेनमहात्मना। न्ययच्छदात्मनःक्रोधंसर्वलोकपराभवात्। ईजेवसमहातेजाः
सर्ववेदविदांवरः। ऋषीराक्षससत्रेणशाक्तेयोथपराशरः। ततोवृद्धांश्चबालांश्चराक्षसान्समहामु
निः। ददाहवितत्तेयज्ञेशक्तेर्वधमनुस्मरन्। नहितंवारयामासवसिष्ठोरक्षसांवधात्। द्वितीयामस्यमा
भूत्प्रतिज्ञामितिनिश्चयात्। त्रयाणांपावकानांचसत्रेतस्मिन्महामुनिः। आसीत्पुरस्ताद्दीप्तानांचतु
र्थइवपावकः। तेनयज्ञेनशुभ्रेणहूयमानेनशक्तितः। तद्विदीपितमाकाशंसूर्येणेवघनात्यये। तंव

आ०प०
२६८

सिष्ठादयः सर्वे मुनयस्तत्र मेनिरे। तेजसा दीप्यमानं वै द्वितीयमिव भास्करं। ततः परमदुर्धर्षो मैत्रेको षि

रुदारधीः। समासिषेविषुः सत्रं तमत्रिः समुपागमत्। तथा पुलस्त्यः पुलहः क्रतुश्चैव महाक्रतुः। तत्राजग्मु

रमित्रघ्न रक्षसां जीविते प्सया। पुलस्त्यस्तु वधात्तेषां रक्षसां भरतर्षभ। उवाचेदं वचः पार्थ पराशरमरिंद

मं। कच्चित्तातापविघ्नं ते कच्चिन्नंदसि पुत्रक। अजानतामदोषाणां सर्वेषां रक्षसां वधात्। प्रजोच्छेदमिमं म

द्यं न हि कर्त्तुं त्वमर्हसि। नैष तात न द्विजातीनां धर्मो दृष्टस्तपस्विनां। शम एव परो धर्मस्तमाचर पराशर। शक्ति

वा पि हि धर्मज्ञं नातिक्रांतुमिहार्हसि। प्रजायाश्च ममोच्छेदं न चैवं कर्त्तुमर्हसि। शापाद्धि शक्तेर्वासिष्ठ तदा

तदुपपादितं। आत्मजेन स दोषेण शक्तिर्नीतस्ततो दिवं। न हि तं राक्षसः कश्चिच्छक्तो भक्षयितुं मुने। आत्मनै

वात्मनस्तेन सृष्टो मृत्युस्तदा भवत्। निमित्तमात्रस्तत्रासीद्विश्वामित्रः पराशर। राजा कल्माषपादश्च दिव

मारुह्य मोदते। ये च शक्त्यवराः पुत्रा वसिष्ठस्य महामुनेः। ते च सर्वे मुदा युक्ता मोदंते सहिताः सुरैः। सर्वमे

तद्वसिष्ठस्य विदितं वै महामुने। रक्षसां च समुच्छेद एष तात तपस्विनां। निमित्तभूतस्त्वं चात्र क्रतौ वासि

ष्ठनंदन। स सत्रं मुंच भद्रं ते समाप्तमिव मस्तु ते गंधर्व उ एवमुक्तः पुलस्त्येन वसिष्ठेन च धीमता।

२६८

तदासमापयामाससमत्रंशाक्तोमहामुनिः। सर्व्वराक्षससत्रायसंभृतंपावकंतदा। उत्तरेहिमवत्पार्श्वेउत्स
सर्ज्जमहावने। सतत्राद्यापिरक्षांसिवृक्षानश्मनएवच। भक्षयन्दृश्यतेवह्निःसदापर्व्वणिपर्व्वणि ६
त्यादिपर्व्वणिपौर्व्वसमाप्तम् १७५ अर्जुनउ राज्ञाकल्माषपादेनगुरौब्रह्मविदांवरे। कार
णंकिंपुरस्कृत्यभार्यावैसंनियोजिता। जानतावैपरंधर्म्मंवसिष्ठेनमहात्मना। अगम्यागमनंकस्मात्कृतं
तेनमहर्षिणा। अधर्म्मिष्ठंवसिष्ठेनकृतंचापिपुरासखे। एतन्मेसंशयंसर्व्वंछेत्तुमर्हसिपृच्छतः॥ गंध
र्व्वउवाच धनंजयनिबोधेदंयन्मांत्वंपरिपृच्छसि। वसिष्ठंप्रतिदुर्द्धर्षतथामित्रसहंनृपं। कथितंतेमया
सर्व्वंयथाशप्तःसपार्थिवः। शक्तिणाभरतश्रेष्ठवासिष्ठेनमहात्मना। सतुशापवशंप्राप्तःक्रोधपर्य्याकुले
क्षणः। निर्ज्जगामपुराद्राजासहदारःपरंतपः। अरण्यंनिर्ज्जनंगत्वासदारःपरिचक्रमे। नानामृगगणाकीर्णं
नानासत्वसमाकुलं। नानागुल्मलताछन्नंनानाद्रुमसमावृतं। अरण्यंघोरसन्नादंशापग्रस्तःपरिभ्रमन्। स
कदाचित्क्षुधाविष्टोमृगयन्भक्ष्यमात्मनः। ददर्शसुपरिक्लिष्टःकस्मिंश्चिद्वननिर्झरे। ब्राह्मणंब्राह्मणींचैव
मिथुनायोपसंगतौ। तौतंवीक्ष्यसुवित्रस्तावकृतार्थौप्रधावितौ। तयोःप्रद्रवतोर्विप्रंजग्राहनृपतिर्बला

तांदृष्ट्वागृहीतंभर्त्तारमथब्राह्मण्यभाषत।शृणुराजन्ममवचोयत्त्वांवक्ष्यामिसुव्रत।आदित्यवंशप्र
भवस्त्वंहिलोकेपरिश्रुतः।अप्रमत्तःस्थितोधर्मेगुरुशुश्रूषणेरतः।शापोपहतदुर्द्धर्षनपापंकर्त्तुम
र्हसि।ऋतुकालेतुसंप्राप्तेभर्त्रास्म्यद्यसमागता।अकृतार्थाह्यहंभर्त्राप्रसवार्थंसमागता।प्रसीदनृप
तिश्रेष्ठभर्त्तायंमेविसृज्यतां।एवंविक्रोशमानायास्तस्यास्तुसनृशंसवत्।भर्त्तारंभक्षयामासव्याघ्रोमृ
गमिवेप्सितं।तस्याःक्रोधाभिभूतायायान्यश्रूण्यपतन्भुवि।सोग्निःसमभवद्दीप्तस्तंचदेशंप्रदीपयत्
।ततःसाशोकसंतप्ताभर्त्तृव्यसनकर्षिता।कल्माषपादंराजर्षिमशपद्ब्राह्मणीरुषा।यस्मान्ममाकृ
तार्थायास्त्वयाक्षुद्रनृशंसवत्।प्रेक्षंत्याभक्षितोमेद्यप्रियोभर्त्तामहायशाः।तस्मात्त्वमपिदुर्बुद्धेम
च्छापपरिविक्षतः।पत्नीमृतावनुप्राप्यसद्यस्त्यक्ष्यसिजीवितं।यस्यचर्षेर्वसिष्ठस्यत्वयापुत्राविनाशिताः २६९
।तेनसंगम्यतेभार्यातनयंजनयिष्यति।सतेवंशकरःपुत्रोभविष्यतिनृपाधम।एवंशप्त्वातुराजानंसा
तमांगिरसीशुभा।तस्यैवसन्निधौदीप्तंप्रविवेशहुताशनं।वसिष्ठश्चमहाभागःसर्वमेतदवैक्षतज्ञा
नयोगेनमहतातपसाचपरंतप।मुक्तशापश्चराजर्षिःकालेनमहताततः।ऋतुकालेपिपतितोम

दयंत्सा निवारितः। नहि सस्मार स नृपस्तं शापं काममोहितः। देव्याः सोथ वचः श्रुत्वा संभ्रांतो नृपस
त्तमः। तं शापमनुसंस्मृत्य पर्यतप्यद्भृशं तदा। एतस्मात्कारणाद्राजा वसिष्ठं सन्न्ययोजयत्। स्वदारे
पुनरश्रेष्ठ शापदोषसमन्वितः इति महाभारते आदिपर्वणि वासिष्ठं समाप्तम् १७६
अर्जुन उ॰ अस्माकमनुरूपो वै यः स्याद्गंधर्व वेदवित्। पुरोहितस्तमाचक्ष्व सर्वं हि विदितं तव ॥
गंधर्व उ॰ यवीयान्देवलस्यैष वने भ्राता तपस्यति। धौम्य उत्कोचके तीर्थे तं वृणुध्वं यदीच्छथ वैशं
॥ ततोर्जुनोस्त्रमाग्नेयं प्रददौ तद्यथाविधि। गंधर्वाय तदा प्रीतो वचनं चेदमब्रवीत्। त्वय्येव ताव
त्तिष्ठंतु हया गंधर्वसत्तम। कार्यकाले ग्रहीष्यामः स्वस्ति तेस्त्विति चाब्रवीत्। तेन्योन्यमभिसंपूज्य
गंधर्वः पांडवाश्च ह। रम्याद्भागीरथीतीराद्यथाकामं प्रतस्थिरे। तत उत्कोचकं तीर्थं गत्वा धौम्याश्रमं तु
ते। तं वव्रुः पांडवा धौम्यं पौरोहित्याय भारत। तान्धौम्यः प्रतिजग्राह सर्ववेदविदां वरः। वन्येन फलमूलेन पौ
रोहित्येन चैव ह। ते समाशंसिरे लब्धां श्रियं राज्यं च पांडवाः। ब्राह्मणं तं पुरस्कृत्य पांचालीं च स्वयंवरे। पुरोहितेन
तेनाथ गुरुणा संगतास्तदा। नाथवंतमिवात्मानं मेनिरे भरतर्षभाः। स हि वेदार्थतत्वज्ञस्तेषां गुरुरुदारधीः

तेनधर्मविदापार्थोयाज्याधर्मविदाकृताः।वीरांस्तुसहितान्मेनेप्राप्नराज्यान्स्वधर्मतः।बुद्धिवीर्यवलोत्साहैर्यु
क्तान्देवानिवद्विजः।कृतस्त्वस्ययनास्तितेनततस्तेमनुजाधिपाः।मेनिरेसहितागंतुंपांचाल्यास्तंस्वयंवरं॥
इत्यादिपर्वणिस्वयंवरे १७७ वैशम् ततस्तेनरशार्दूलभ्रातरःपंचपांडवाः।प्रययुर्द्रोपदींद्रष्टुं
तंचदेशंमहोत्सवं।तेप्रयातानरव्याघ्राःसहमात्रापरंतपाः।ब्राह्मणान्ददृशुर्मार्गेगच्छतःसंगतान्बहू
न्।तानूचुर्ब्राह्मणाराजन्पांडवान्ब्रह्मचारिणः।सर्वंतमैवैविजानंतु क्वभवंतोगमिष्यंतिकुतोवाभ्यागताइह
॥ युधिष्ठिरउ आगतानेकचक्रायाःसोदर्यानेकचारिणः।भवंतोवैविजानंतुसहमात्राद्विजर्षभाः॥
ब्राह्मणाऊचुः गच्छताद्यैवपांचालान्द्रुपदस्यनिवेशने।स्वयंवरोमहांस्तत्रभविताशुमहाधनः।एकसा
र्थप्रयाताःस्मवयंतत्रैवगामिनः।तत्रह्यद्भुतसंकाशोभवितासुमहोत्सवः।यज्ञसेनस्यदुहिताद्रुपदस्यमहा
त्मनः।वेदीमध्यात्समुत्पन्नापद्मपत्रनिभेक्षणा।दर्शनीयानवद्यांगीसुकुमारीयशस्विनी।धृष्टद्युम्नस्यभ
गिनीद्रोणशत्रोःप्रतापिनः।योजातःकवचीखड्गीसशरःसशरासनः।सुसमिद्धेमहावाहुःपावकेपावकोप
मः।स्वसातस्यानवद्यांगीद्रोपदीतनुमध्यमा।नीलोत्पलसमोगंधोयस्याःक्रोशात्प्रवातिवै।यज्ञसेनस्यच

सुतांस्वयंवरकृतलक्षणां।गच्छामचैवयंद्रष्टुंतंचदिव्यंमहोत्सवं।राजानोराजपुत्राश्चयज्वानोभूरिदक्षिणाः।
स्वाध्यायवंतःशुचयोमहात्मानोयतव्रताः।तरुणादर्शनीयाश्चनानादेशसमागताः।महारथाःकृतास्त्राश्च
समुपैष्यंतिभूमिपाः।तेतत्रविविधान्दायान्विजयार्थेनरेश्वराः।प्रदास्यंतिधनंगाश्चभक्ष्यंभोज्यंचसर्वशः।प्र
तिगृह्यचतत्सर्वंदृष्ट्वाचैवस्वयंवरं।अनुभूयोत्सवंचैवगमिष्यामोयथेप्सितं।नटावैतालिकास्तत्रनर्तकाःसू
तमागधाः।नियोधकाश्चदेशेभ्यःसमेष्यंतिमहाबलाः।एवंकौतूहलंकृत्वादृष्ट्वाचप्रतिगृह्यच।सहास्माभिर्म
हात्मानःपुनःप्रतिनिवर्त्स्यथ।दर्शनीयाश्चवःसर्वेदेवरूपानवस्थितान्।समीक्ष्यकृष्णावरयेत्संगत्यैकत
मंवरं।अयंभ्राताचवश्रीमान्दर्शनीयोमहाभुजः।नियुज्यमानोविजयेत्संगत्याद्रविणंबहु॥ युधिष्ठि
रउवाच परमंभोगमिष्यामोद्रष्टुंश्चैवमहोत्सवं।भवद्भिःसहिताःसर्वेकन्यायास्तस्वयंवरं॥ ॥
इत्यादिपर्वणिद्रौपदीस्वयंवरे १७८ वैशं एवमुक्ताःप्रयातास्तेपांडवाजनमेजय।राज्ञांदक्षि
णपांचालान्द्रुपदेनाभिरक्षितान्।ततस्तेतुमहात्मानंशुद्धात्मानमकल्मषं।ददृशुःपांडवावीरामुनिंद्वैपा
यनंतदा।तस्मैयथावत्सत्कारंकृत्वातेनचसत्कृताः।कथांतेचाभ्यनुज्ञाताःप्रययुर्द्रुपदक्षयं।पश्यंतोर

मणीयानिवनानिचसरांसिच।तत्रतत्रवसंतश्चशनैर्जग्मुर्महारथाः॥स्वाध्यायवंतःशुचयोमधुराःप्रि
यवादिनः।आनुपूर्वेणसंप्राप्ताःपांचालान्पांडुनंदनाः॥तेतुदृष्ट्वापुरंतच्चस्कंधावारंचपांडवाः।कुभकार
स्यशालायांनिवासंचक्रिरेतदा।तत्रभैक्षंसमाजह्रुर्ब्राह्मणींवृत्तिमाश्रिताः॥तान्संप्राप्तांस्तथावीरान्ज
ज्ञिरेननराःक्वचित्।यज्ञसेनस्यकामस्तुपांडवायकिरीटिने।कृष्णांदद्यामितिसदानचैतद्विवृणोतिसः॥सो
न्वेषमाणःकौंतेयान्पांचाल्योजनमेजय।दृढंधनुरनानम्यंकारयामासभारत।यंत्रंवैहायसंचापिकारया
मासकृत्रिमं।तेनयंत्रेणसमितंराजालक्ष्यंचकारसः॥ द्रुपदउ ॥इदंसज्यंधनुःकृत्वासज्जैरेभिश्च
सायकैः।अतीत्यलक्ष्यंयोवेद्धासलब्धामत्सुतामिति॥ वैशंप॰ इतिसद्रुपदोराजास्वयंवरमघोषय
त्।तच्छ्रुत्वापार्थिवाःसर्वेसमीयुस्तत्रभारत।ऋषयश्चमहात्मानःस्वयंवरदिदृक्षवः॥दुर्योधनपुरोगा
श्चसकर्णाःकुरवोनृपाः।ब्राह्मणाश्चमहाभागादेशेभ्यःसमुपागमन्॥तेर्चिताराजगणाद्रुपदेनमहा
त्मना।उपोपविष्टामंचेषुद्रष्टुकामाःस्वयंवरं।ततःपौरजनाःसर्वेसागरोद्धूतनिस्वनाः॥शिशुमारशिरः
प्राप्यन्यविशंस्तेस्मपार्थिवाः।प्रागुत्तरेणनगराद्भूमिभागेसमेशुभे।समाजवाटःशुशुभेभरनैःसर्वतो

वृतः॥प्राकारपरिखोपेतोद्वारतोरणमंडितः।वितानेनविचित्रेणसर्वतःसमलंकृतः।तूर्य्यौघशतसंकी
र्णःपरार्घ्यागुरुधूपितः।चंदनोदकसिक्तश्चमाल्यदामोपशोभितः।केलाशशिखरप्रख्यैर्न्नभस्थलवि
लेखिभिः।सर्वतःसंवृतःशुभ्रैःप्रासादैःसुकृतोच्छ्रयैः।सुवर्णजालसंवीतैर्म्मणिकुट्टिमभूषितैः।सुखा
रोहणसोपानैर्म्महासनपरिच्छदैः।अग्राम्यसमवच्छन्नैरगुरूत्तमवासितैः।हंसांशुवर्णैर्बहुभिरायोजन
सुगंधिभिः।असंबाधशतद्वारैःशयनासनशोभितैः।बहुधातुपिनद्धांगैर्हिमवच्छिखरैरिव।तत्रनाना
प्रकारेषुविमानेषुस्वलंकृताः।स्पर्द्धमानास्तदान्योन्यंनिषेदुःसर्वपार्थिवाः।तत्रोपविष्टान्ददृशुर्म्म
हासत्वपराक्रमान्॥राजसिंहान्महाभागान्कृष्णागुरुविभूषितान्॥महाप्रसादान्ब्राह्मण्यान्स्वराष्ट्रपरि
रक्षिणः।प्रियान्सर्वस्यलोकस्यसुकृतैःकर्म्मभिःशुभैः।मंचेषुचपरार्द्ध्येषुपौरजानपदाजनाः।कृष्णादर्श
नसिद्ध्यर्थंसर्वतःसमुपाविशन्॥ब्राह्मणैस्तेचसहिताःपांडवाःसमुपाविशन्॥ऋद्धिंपांचालराजस्यपश्यं
तस्तामनुत्तमां।ततःसमाजोववृधेसराजन्दिवसान्बहून्॥रत्नप्रवालबहुलःशोभितोनटनर्त्तकैः।वर्त्त
मानेसमाजेतुरमणीयेह्निषोडशे।आप्लुतांगीसुवसनासर्वाभरणभूषिता।मालांचसमुपादायकांच

आ०प०
२७२

नींस्समलंकृताः।अवतीर्णाततोरंगंद्रौपदीभरतर्षभ।पुरोहितःसोमकानांमंत्रविद्ब्राह्मणःशुचिः।प
रिस्तीर्य्यजुहावाग्निमाज्येनविधिवत्तदा।सतर्प्पयित्वाज्वलनंब्राह्मणान्स्वस्तिवाच्यच।वारयामासस
र्व्वाणिवादित्राणिसमंततः।निःशब्देतुकृतेतस्मिन्धृष्टद्युम्नोविशांपते।रंगमध्यंगतस्तत्रमेघगंभीर
यागिरा।वाक्यमुच्चैर्जगादेदंश्लक्ष्णमर्थवदुत्तमम्।इदंधनुर्लक्ष्यमिमेचवाणाः।शृण्वंतुमेभूपतयः
समेताः।छिद्रेणयंत्रस्यसमर्प्पयध्वंशरैःशितैर्व्योमचरैर्दशार्द्धैः।एतन्महत्कर्म्मकरोतियोवैकुले
नरूपेणवलेनयुक्तः।तस्याद्यभार्य्याभगिनीममेयंकृष्णाभवित्रीनमृषाब्रवीमि।तानेवमुक्त्वाद्रुपद
स्यपुत्रःपश्चादिदंतांभगिनीमुवाच।नाम्नाचगोत्रेणचकर्म्मणाचसंकीर्त्तयन्भूमिपतीन्समेतान्॥
इतिमहाभारतेआदिपर्व्वणि १७९ धृष्टद्युम्नउ दुर्य्योधनोदुर्व्विषहोदुर्मुखोदुष्प्रधर्ष
णः।विविंशतिर्व्विकर्णश्चसहोदुःशासनस्तथा।युयुत्सुर्व्वायुवेगश्चभीमवेगरवस्तथा।उग्रायुधोवला
कीचकरकायुर्व्विरोचनः।कुंडकश्चित्रसेनश्चसुवर्च्चाःकनकध्वजः।नंदकोवाहुशालीचसुकुंडोविकट
स्तथा।एतेचान्येचवहवोधार्त्तराष्ट्रामहावलाः।कर्णेनसहितावीरास्त्वदर्थंसमुपागताः।असंख्याता

२७२

महात्मानः पार्थिवाः क्षत्रियर्षभाः। शकुनिः सौवलश्चैव वृषकोथ महद्वलः। एते गांधारराजस्य सुताः
सर्वे समागताः। अश्वत्थामा च भोजश्च सर्वशस्त्रभृतां वरौ। समवेतौ महात्मानौ त्वदर्थे समलंकृतौ। बृहं
तो महिमांश्चैव दंडधारश्च पार्थिवः। सहदेव जयत्सेनौ मेघसंधिश्च पार्थिवः। विराटः सहपुत्राभ्यां शंखेनै
वोत्तरेण च। वार्द्धक्षेमिः सुशर्मा च सेनाविंदुश्च पार्थिवः। सुकेतुः सहपुत्रेण सुनाम्ना च सुवर्चसा। सुचित्रः
सुकुमारश्च वृकः सत्यधृतिस्तथा। सूर्यध्वजो रोचमानो नीलः चित्रायुधस्तथा। अंशुमांश्चेकितानश्च श्रेणि
मांश्च महावलः। समुद्रसेनपुत्रश्च चंद्रसेनः प्रतापवान्। जलसंधः पिता पुत्रौ विदंडो दंड एव च। पौंड्रको वा
सुदेवश्च भगदत्तश्च वीर्यवान्। कलिंगस्ताम्रलिप्तश्च पत्तनाधिपतिस्तथा। मद्रराजस्तथा शल्यः सह
पुत्रो महारथः। रुक्मांगदेन वीरेण तथा रुक्मरथेन च। कौरव्यः सोमदत्तश्च पुत्राश्चास्य महारथाः। सम
वेतास्त्रयः शूरा भूरिर्भूरिश्रवाः शलः। सुदक्षिणश्च कांवोजो दृढधन्वा च पौरवः। बृहद्वलः सुषेणश्च शिवि
रौशीनरस्तथा। पटच्चरनिहंता च कारुषाधिपतिस्तथा। संकर्षणो वासुदेवो रौक्मिणेयश्च वीर्यवान्। शां
वश्च चारुदेष्णश्च प्राद्युम्निः सगदस्तथा। अक्रूरः सात्यकिश्चैव उद्धवश्च महामतिः। कृतवर्मा च हार्दिक्यः

आ०प०
२७२

पृथुर्विपृथुरेव च। विडूरथश्च कंकश्च शंकुश्च सगवेषणः। आशावहो निरुद्धश्च समीकः सारिमेजयः। वीरो वातपतिश्चैव झल्ली पिंडारकस्तथा। उशीनरश्च विक्रान्तो वृष्णयस्ते प्रकीर्त्तिताः। भगीरथो बृहत्क्षत्रः सैंधवश्च जयद्रथः। बृहद्रथो वाह्लिकश्च श्रुतायुश्च महारथः। उलूकः कैतवो राजा चित्रांगदशुभांगदौ। वत्सराजश्च मतिमान् कोशलाधिपतिस्तथा। शिशुपालश्च विक्रान्तो जरासंधस्तथैव च। एते चान्ये च बहवो नानाजनपदेश्वराः। त्वदर्थमागता भद्रे क्षत्रियाः प्रथिता भुवि। एते भेत्स्यन्ति विक्रान्तास्त्वदर्थे लक्ष्यमुत्तमं॥ विध्येत य इदं लक्ष्यं वरयेथाः शुभे द्यतं इति महाभारते आदिपर्वणि १७८ वैशम्॥ तेऽलंकृताः कुंडलिनो युवानः परस्परं स्पर्द्धमाना नरेंद्राः। अस्त्रं बलं चात्मनि मन्यमानाः सर्वे समुत्पेतुरुदायुधास्ते। रूपेण वीर्येण कुलेन चैव शीलेन वित्तेन च यौवनेन। समिद्धदर्प्पा मदवेगभिन्ना मत्ता यथा हैमवता गजेंद्राः। परस्परं स्पर्द्धया प्रेक्षमाणाः संकल्पजेनाभिपरिप्लुतांगाः। कृष्णा ममैवेत्यभिभाषमाणा नृपासनेभ्यः सहसोदतिष्ठन्। ते क्षत्रियाः रंगगताः समेता जिगीषमाणा द्रुपदात्मजां तां। चक्रिरे पर्वतराजकन्यामुमां यथा देवगणाः समेता। कंदर्प्पबाणाभिनिपीडितांगाः कृष्णागते स्ते हृदये

२७२

र्वरेंद्राःरंगावतीर्णाद्रुपदात्मजार्थेद्रष्टुंप्रचक्रुःसुहृदोपितत्र।अथाययुर्देवगणाविमानैरुद्रादित्या
वसवोथाश्विनौच।साध्याश्चसर्वेमरुतस्तथैवयमंपुरस्कृत्यधनेश्वरंच।दैत्याःसुपर्णाश्चमहोरगाश्च
देवर्षयोगुह्यकाश्चारणाश्च।विश्वावसुर्नारदपर्वतौचगंधर्वमुख्याःसहसाप्सरोभिः।हलायुधस्त
त्रजनार्दनश्चवृष्ण्यंधकाश्चैवयथाप्रधानं।प्रेक्षांस्मचक्रुर्यदुपुंगवास्तेस्थिताश्चकृष्णस्यमतेमहांतः
दृष्ट्वानुतान्मत्तगजेंद्ररूपान्सर्वानपिपद्मानिववारणेंद्रान्।भस्मावृतांगानिवहव्यवाहान्कृष्णःप्रदध्यौय
दुवीरमुख्यः।[illegible]शार्ङ्गंसरामाययुधिष्ठिरंसभीमंचजिष्णुंचयमौचवीरौ।शनैःशनैस्तान्प्रशमीक्ष्यरामो
जनार्दनंप्रीतमनाददर्श।अन्येतुवीरानृपपुत्रपौत्राःकृष्णागतैर्नेत्रमनःस्वभावैः।व्यापद्यमानाददृशुर्नितां
न्वैसंदष्टनेत्रच्छदताम्रनेत्राः।तथैवपार्थाःपृथुबाहवस्तेवीरौयमौचैवमहानुभावौ।तांद्रौपदींप्रेक्ष्यतदास्म
सर्वेकंदर्पवाणाभिहताबभूवुः।देवर्षिगंधर्वसमाकुलंतत्सुपर्णनागासुरसिद्धजुष्टं।दिव्येनगंधेनसमाकुलं
चदिव्यैश्चपुष्पैरवकीर्यमाणं।महास्वनैर्दुंदुभिनादितैश्चबभूवतत्संकुलमंतरिक्षं।विमानसंबाधमभूत्समं
तात्सवेणुवीणापणवानुनादं।ततस्तुतेराजगणाःक्रमेणकृष्णानिमित्तंकृतविक्रमाश्च।सकर्णदुर्योधनर

शाल्वशल्याद्रौणायनिक्राथसुनीथवक्राः।कलिंगवंगाधिपपांड्यपौंड्राविदेहराजोयवनाधिपश्चा
न्येचनानानृपपुत्रपौत्राराष्ट्राधिपाःपंकजपत्रनेत्राः।किरीटहारांगदचक्रवालैर्विभूषितांगाःपृथुवाहु
वस्ते।अनुक्रमंविक्रमसत्वयुक्तावलेनवीर्य्येणचनर्दमानाः।तत्कार्मुकंसंहननोपपन्नंसज्यंनशेकुर्म
नसापिकर्त्तुं।तेविक्रमंतःस्फुरताहृढेननिःक्षिप्यमाणाधनुषानरेंद्राः।विचेष्टमानाधरणीतलस्थायथा
वलंशेक्ष्यगुणक्रमाश्च।गतौजसःस्रस्तकिरीटहाराविनिश्वसंतःशमयांवभूवुः।हाहाकृतंतद्धनुषादृढे
नविस्रस्तहारांगदचक्रवालं।कृष्णानिमित्तंविनिवृत्तकामंराज्ञांतदामंडलमार्त्तमासीत्।सर्व्वान्नृपांस्ता
न्प्रसमीक्ष्यकर्णोधनुर्द्धराणांप्रवरोजगाम।उद्धृत्यतूर्णंधनुरुद्यतंतत्सज्यंचकाराशुयुयोजवाणान्।दृष्ट्वा
सूतंमेनिरेपांडुपुत्राभित्वानीतंलक्ष्यवरंधरायां।धनुर्द्धरारागकृतप्रतिज्ञमत्यग्निसोमार्कमथार्कपुत्रं।
दृष्ट्वातुतंद्रौपदीवाक्यमुच्चैर्जगादनाहंवरयामिसूतं।सामर्कहासंप्रसमीक्ष्यसूर्यंतत्याजकर्णःस्फुटितंध
नुस्तत्।।एवंतेषुनिवृत्तेषुक्षत्रियेषुसमंततः।वेदीनामतकोवीरोवलवानंतकोपमः।दमघोषसुतोधी
रःशिशुपालोमहामतिः।धनुरादायमानस्तुजानुभ्यामगमन्महीं।ततोराजामहावीर्योजरासंधोमह

बलः॥ धनुषोभ्यासमागत्य तस्थौ गिरिरिवाचलः॥ धनुषा पीड्यमानस्तु जानुभ्यामगमन्महीं॥ ततस्तथा
यराजा स स्वराष्ट्राण्यभिजग्मिवान्॥ ततः शाल्यो महावीर्यो मद्रराजो महाबलः॥ तदप्यारोप्यमाणस्तु जानुभ्या
मगमन्महीं॥ तस्मिंस्तु संभ्रांतजने समाजे निक्षिप्तवादेषु जनाधिपेषु॥ कुंतीसुतो जिष्णुरियेष कर्तुं सज्यं धनु
स्तत्सशरं प्रवीरः॥ इत्यादिपर्वणि द्रौपदीस्वयंवरे १८८ वैशं॰ यदा निवृत्ता राजानो धनु
षः सज्यकर्मणि॥ अथोदतिष्ठद्विप्राणां मध्याज्जिष्णुरुदारधीः॥ उदक्रोशन् विप्रमुख्या विधुन्वंतोऽजिनानि च॥
दृष्ट्वा संप्रस्थितं पार्थमिंद्रकेतुसमप्रभं॥ केचिदासन्विमनसः केचिदासन्मुदान्विताः॥ आहुः परस्परं केचि
न्निपुणा बुद्धिजीविनः॥ यत्कर्णशल्यप्रमुखैः क्षत्रियैर्लोकविश्रुतैः॥ नानतं बलवद्भिर्हि धनुर्वेदपरायणैः॥
ए तत्कथं त्वकृतास्त्रेण प्राणतो दुर्बलीयसा॥ बटुमात्रेण शक्यं हि सज्यं कर्तुं धनुर्द्विजाः॥ अवहास्या भविष्यंति
ब्राह्मणाः सर्वराजसु॥ कर्मण्यस्मिन्नसंसिद्धे चापलादपरीक्षिते॥ यद्येष दर्पाद्धर्षाद्वाप्यथ ब्राह्मणचापलात्॥
प्रस्थितो धनुरायन्तुं वार्यतां साधु मा गमत्॥ ब्राह्मणा ऊचुः॥ नावहास्या भविष्यामो न च लाघव
मास्थिताः॥ न च विद्विष्टतां लोके गमिष्यामो महीक्षितां॥ केचिदाहुर्युवा श्रीमान्नागराजकरोपमः॥ पीनस्कं

धोरुवाज्ञुश्च धैर्येण हिमवानिव। सिंहखेलगतिः श्रीमान्मत्तनागेंद्रविक्रमः। संभाव्यमस्मिन्कर्मेदमुत्सा
हाद्यानुमीयते। शक्तिरस्य महोत्साहान्नह्यशक्तः स्वयं व्रजेत्। न्न च तद्विद्यते किंचित्कर्म लोकेषु यद्भवेत्
ब्राह्मणानामसाध्यं च त्रिषु संस्थानचारिषु। अब्भक्षा वायुभक्षाश्च फलाहारा दृढव्रताः। दुर्बला अपि वि
प्रा हि बलीयांसः स्वतेजसा। ब्राह्मणो नावमंतव्यः सद्वासद्वा समाचरन्। सुखं दुःखं महद्ध्रस्वं कर्म यत्समु
पागतं। जामदग्न्येन रामेण निर्जिताः क्षत्रिया युधि। पीतः समुद्रोऽगस्त्येन अगाधो ब्रह्मतेजसा। तस्माद्ब्रु
वंतु सर्वेऽत्र वटुरेष धनुर्महान्। आरोपयतु शीघ्रं वै तथेत्यब्रुवन्द्विजर्षभाः। एवं तेषां विलपतां विप्राणां वि
विधा गिरः। अर्जुनो धनुषोऽभ्यासे तस्थौ गिरिरिवाचलः। स तद्धनुः परिक्रम्य प्रदक्षिणमथाकरोत्। प्रण
म्य शिरसा देवमीशानं वरदं प्रभुं। कृष्णं च मनसा कृत्वा जगृहे चार्जुनो धनुः। यत्पार्थिवै रुक्मिसुनीथवक्र
राधेयदुर्योधनशाल्वशाल्यैः। तदा धनुर्वेदपरैर्नृसिंहैः कृतं न सज्यं महतोपि यत्नात्। तदर्जुनो वीर्यवतां
सदर्पस्तदैंद्रिरिंद्रावरजप्रभावः। सज्यं च चक्रे निमिषांतरेण शरांश्च जग्राह दशार्धसंख्यान्। विव्याध ल
क्षं निपपात तच्च छिद्रेण भूमौ सहसाभिविद्धं। ततोंतरिक्षे च बभूव नादः समाजमध्ये च महान्निनादः। पु

वर्ष

ष्पाणिवर्षाणिनिव[illegible]देवः।पार्थस्यमूर्ध्निद्विषतांनिहंतुः।विलक्षितास्तनश्चक्रुहाहाकारंश्चसर्वशः।न्प
पतंश्चात्रनभसःसमंतात्पुष्पवृष्टयः।शतांगानिचतूर्याणिवादकाःसमवादयन्।सूतमागधसंघा
श्चाप्यस्तुवंस्तत्रसुस्वराः।तद्दृष्ट्वाद्रुपदःप्रीतोबभूवरिपुसूदनः।सहसैन्यश्चपार्थस्यसाहाय्यार्थमिहे
षसः।तस्मिंस्तुशब्देमहतिप्रवृद्धेयुधिष्ठिरोधर्मभृतांवरिष्ठः।आवासमेवोपजगामशीघ्रंसार्द्धंयमा
भ्यांपुरुषोत्तमाभ्यां।विद्धंतुलक्ष्यंप्रसमीक्ष्यकृष्णापार्थंचशक्रप्रतिमंनिरीक्ष्य।आदायशुक्लंवरमाल्य
दामजगामकुंतीसुतमुत्स्मयंती।सतामुपादायविजित्यरंगेद्विजातिभिस्तैरभिपूज्यमानः।रंगान्निर
क्रामदचिंत्यकर्मापत्न्यातयाचाप्यनुगम्यमानः ॥ इत्यादिपर्वणिस्वयंवरे १८० वैशं
तस्मैदित्सतिकन्यांतुब्राह्मणायतदानृपाः।कोपआसीन्महीपानामालोक्यान्योन्यमंतिकात्।अस्मान
यमतिक्रम्यतृणीकृत्यचसंगतान्।दातुमिच्छतिविप्रायद्रौपदींयोषितांवरां।अवरोप्येहवृक्षंतुफल
कालेनिपात्यते।निहन्मैनंदुरात्मानंयोयमस्मान्नमन्यते।नह्यर्हत्येषसंमानंनापिवृद्धक्रमंगुणैः।ह
न्मैनंसहपुत्रेणदुराचारंनृपद्विषं।अयंहिसर्वानाहूयसत्कृत्यचनराधिपान्।गुणवद्भोजयित्वान्नं

ततःपश्चान्नमन्यते।अस्मिन्राजसमावाये देवानामिवसन्नये।किमयंसदृशंकंचिन्नृपतिंनैवदृष्टवान्
।नचविप्रेष्वधीकारोविद्यतेवरणंप्रति।स्वयंवरःक्षत्रियाणामितीयंप्रथिताःश्रुतिः।अथवायदिकन्ये
यंनचकिंचिद्बुभूषति।अग्नावेनांपरिक्षिप्ययामराष्ट्राणिपार्थिवाः।ब्राह्मणोयदिवाबाल्याल्लोभाद्वाकृत
वानिदं।विप्रियंपार्थिवेंद्राणांनैषवध्यःकथंचन।ब्राह्मणार्थंहिनोराज्यंजीवितंचवसूनिच।पुत्रपौत्रं
चयच्चान्यदस्माकंविद्यतेधनं।अवमानभयाच्चैवस्वधर्मस्यचरक्षणात्।स्वयंवराणामन्येषांमाभूदे
वंविधागतिः।इत्युक्त्वाराजशार्दूलाहृष्टापरिघबाहवः।द्रुपदंतुजिघांसंतःसायुधाःसमुपाद्रवन्।तान्
गृहीतशरावापान्क्रुद्धानापततोबहून्।द्रुपदोवीक्ष्यसंत्रासाद्ब्राह्मणांश्शरणंगतः।वेगेनापततस्तांस्तु
प्रभिन्नानिववारणान्।पांडुपुत्रौमहेष्वासौप्रतियातावरिंदमौ।ततःसमुत्पेतुरुदायुधास्तेमहीक्षितोब
द्धतलांगुलित्राः।जिघांसमानाःकुरुराजपुत्रावमर्षयंतोर्जुनभीमसेनौ।ततस्तुभीमोद्भुतभीमकर्म्माम
हाबलोवज्रसमानसारः।उत्पाट्यदोर्भ्यांद्रुममेकवीरोनिष्पत्रयामासयथागजेंद्रः।तंवृक्षमादायरिपुप्र
माथीदंडीवदंडंपितृराजमुग्रं।तस्थौसमीपेपुरुषर्षभस्यपार्थस्यपार्थःपृथुदीर्घबाहुः।तस्यैतत्कर्म्मातिम

नुष्यबुद्धिर्जिष्णुःसहिभ्रातुरचिंत्यकर्म्मा।विस्मियेचापिभयंविहायतस्थौधनुर्गृह्यमहेंद्रकर्मा।तत्प्रेक्ष्य
कर्म्मातिमनुष्यबुद्धिर्जिष्णोःसहभ्रातुरचिंत्यकर्म्मा।दामोदरोभ्रातरमुग्रवीर्यंहलायुधंवाक्यमिदंबभा
षे।यएषसिंहर्षभखेलगामीमहद्धनुःकर्षतितालमात्रं।एषोर्जुनोनात्रविचार्य्यमस्तियद्यस्मिसंकर्ष
णोवासुदेवः।यस्त्वेषवृक्षंतरसाविभज्यराज्ञोनिकारेसहसाप्रवृत्तः।वृकोदरान्नान्यइहैतदद्यकर्त्तुंसम
र्थःसमरेपृथिव्यां।योसौपुरस्तात्कमलायताक्षस्तनुर्महासिंहगतिर्विनीतः।गौरःप्रलंबोज्वलचारुघो
णोविनिःसृतःसोच्युतधर्मपुत्रः।यौतौकुमाराविवकार्त्तिकेयौद्वावश्विनेयावितिमेवितर्कः।मुक्ताहि
तस्माज्जतुवेश्मदाहान्मयाश्रुताःपांडुसुताःपृथाच।तमब्रवीन्निर्जलतोयदाभोहलायुधोनंतरजंप्रतीतः
।प्रीतोस्मिदिष्ट्याहिपितृष्वसारंपृथांविमुक्तांसहकौरवाग्र्यैः इत्यादिपर्वणिद्रौपदीस्वयंवरे ॥
॥ १८२ ॥वैशं॥ अजिनानिविधुन्वंतःकरकांश्चद्विजर्षभाः।ऊचुस्तेभीर्नकर्त्तव्यावयंयोत्स्यामहे
परान्।तानेवंवदतोविप्रानर्जुनःप्रहसन्निव।उवाचप्रेक्षकाभूत्वायूयंतिष्ठथपार्श्वतः।अहमेनानऽ
जिह्माग्रैःशतशोविकिरंछरैः।वारयिष्यामिसंक्रुद्धान्मंत्रैराशीविषानिव।इतितद्धनुरादायशुल्कावा

श्री०प०
२११

प्लैमहाबलः।भ्राताभीमेनसहितस्तस्थौ।गिरिरिवाचलः।ततःकर्णमुखान्दृष्ट्वाक्षत्रियान्युद्धदुर्म्म
दान्।संचेरतुरभीतौतौगजौप्रतिगजानिव।ऊचुश्चवाचःपरुषास्तेराजानोयुयुत्सवः।आहवेहिद्विज
स्यापिवधोदृष्टोयुयुत्सतः।इत्येवमुक्त्वाराजानःसहसादुद्रुवुर्द्विजान्।ततःकर्णोमहातेजाजिष्णुंप्र
तियियौरणे।युद्धार्थीवासिताहेतोर्गजःप्रतिगजंयथा।भीमसेनंययौशल्योमद्राणामीश्वरोबली।दु
र्योधनादयःसर्वेब्राह्मणैःसहसंगताः।मृदुपूर्वमयत्नेनप्रत्ययुध्यंस्तदाहवे।ततोर्जुनःप्रत्यविध्यदा
पतंतंत्रिभिःशरैः।कर्णंवैकर्तनंश्रीमान्विकृष्यबलवद्धनुः।तेषांशराणांवेगेनशितानांतिग्मतेज
सां।विमुह्यमानोराधेयोयत्नात्तमनुधावति।तावुभावप्यनिर्देश्यौलाघवाज्जयतांवरौ।अयुध्येतांसु
संरब्धावन्योन्यविजिगीषिणौ।कृतेप्रतिकृतंपश्यपश्यबाहुबलंचमे।इतिशूरार्थवचनैरभाषेतांपर
स्परं।ततोर्जुनस्यभुजयोर्वीर्यमप्रतिमंभुवि।ज्ञात्वावैकर्तनःकर्णःसंरब्धःसमयोधयत्।अर्जुनेनप्र
युक्तांस्तान्बाणान्वेगवतस्तदा।प्रतिहत्यननादोच्चैःसैन्यानितदपूजयन् कर्णउ तुष्यामितेवि
प्रमुख्यभुजवीर्यस्यसंयुगे।अविषादस्यचैवास्यशस्त्रास्त्रविजयस्यच।किंत्वंसाक्षाद्धनुर्वेदोरामो

२११

वाविश्रसत्तमा।अथसाक्षाद्धरिहयः साक्षाद्वाविष्णुरच्युतः॥आत्मप्रच्छादनार्थंवैवाकुवीर्यमयाश्रितः॥
विप्ररूपंविधायेदंमन्येमांप्रतियुध्यसे।नहिमामाहवेक्रुद्धमन्यः साक्षाच्छचीपतेः॥पुमान्योधयितुंशक्तः
पांडवाद्वाकिरीटिनः॥तमेवंवादिनंतत्रफाल्गुनःप्रत्यभाषत॥नास्मिकर्णधनुर्वेदोनास्मिरामःप्रताप
वान्॥ब्राह्मणोस्मियुधांश्रेष्ठः सर्वशस्त्रभृतांवरः॥ब्राह्मेपौरंदरेचास्त्रेनिष्ठितोगुरुशासनात्॥स्थितो१
स्म्यद्यरणेजेतुंत्वांवैवीरस्थिरोभव वैशं एवमुक्तस्तुराधेयोयुद्धात्कर्णोन्यवर्त्तत॥ब्राह्मंतेजस्तद१
थाजय्यमन्यमानोमहारथः॥अपरस्मिन्रणोद्देशेवीरौशल्यवृकोदरौ।वलिनौयुद्धसंपन्नौविद्ययाचवले
नच।अन्योन्यमाह्वयंतौतुमत्ताविवमहागजौ।मुष्टिभिर्जानुभिश्चैवनिघ्नंतावितरेतरं।प्रकर्षणाकर्ष
णाभ्यामभ्याकर्षविकर्षणैः॥आचकर्षतुरन्योन्यंमुष्टिभिश्चापिजघ्नतुः॥ततश्चटचटाशब्दःसुघोरोह्यभ
वत्तयोः॥पाषाणसंपातनिभैःप्रहारैरभिजघ्नतुः॥मुहूर्त्तंतौतदान्योन्यंसमरेपर्यकर्षतां।ततोभीमःसमु
त्क्षिप्यवाहुभ्यांशल्यमाहवे।अपातयत्कुरुश्रेष्ठो।ब्राह्मणाजहसुस्तदा।तत्राश्चर्यंभीमसेनश्चकारपुरु
षर्षभः॥यच्छल्यंपातितंभूमौनावधीद्वलिनंवली।पातितेभीमसेनेनशल्येकर्णेचशंकिते।शंकिताःस

र्वराजानः परिवव्रुर्वृकोदरं। अर्जुनश्च सहितास्तत्र साध्विमौ ब्राह्मणर्षभौ। विज्ञायेतां कजन्मानौ क निवा
सौत थैव चा। को हि राधासुतं कर्णं शक्तो योधयितुं रणे। अन्यत्र रामाद्द्रोणाद्वा पांडवाद्वा किरीटिनः। कृष्णा
द्वा देवकीपुत्रात्कृपाद्वापि शरद्वतः। को वा दुर्योधनं शक्तः प्रतियोधयितुं रणे। तथैव मद्राधिपतिं शल्यं
बलवतां वरं। बलदेवादृते वीरात्पांडवाद्वा वृकोदरात्। वीराद्दुर्योधनाद्वान्यः शक्तः पातयितुं रणे। क्रिय
तामवहारो स्माद्युद्धाद्ब्राह्मणसंयुताव्। ब्राह्मणो हि सदा रक्ष्याः सापराधापि नित्यदा। अथैनानुपलभ्येह
पुनर्योत्स्यामहे हृष्टवत्। तांस्तथावादिनः सर्वान्प्रसमीक्ष्य क्षितीश्वराः। अथान्यान्पुरुषांश्चापि कृत्वा तत्क
र्म संयुगे॥ वैशं ॥४ तत्कर्म भीमस्य समीक्ष्य कृष्णः कुंतीसुतौ परिशंकमानः। निवारयामहमहीपतीं
स्तान्धर्मेण लब्धेत्यनुसीयमनीय सर्वान्॥ एवं ते विनिवृत्तास्तु युद्धाद्युद्धविशारदाः। यथावासं ययुः स
र्वे विस्मिता राजसत्तमाः। वृत्तो ब्रह्मोत्तरो रंगः पांचाली ब्राह्मणैर्वृता। इति ब्रुवंतः प्रययुर्ये तत्रासन्समागताः
ब्राह्मणैस्तु प्रतिच्छन्नौ रौरवाजिनवासिभिः। कृच्छ्रेण जग्मतुस्तौ तु भीमसेनधनंजयौ। विमुक्तौ जनसंबाधा
च्छत्रुभिः परिवीक्षितौ। कृष्णयानुगतौ तत्र नृवीरौ तौ विरेजतुः। पौर्णमास्यां घनैर्मुक्तौ चंद्रसूर्याविवोदितौ। ते

षां माता बहुविघ्नं विनाशं पर्य्यचिंतयत्। अनागच्छत्सु पुत्रेषु भैक्षकालेभिगच्छति। धार्त्तराष्ट्रैर्हतान्स्युर्विज्ञा
य कुरुपुंगवाः। मायाश्रितैर्वा रक्षोभिः सुघोरैर्दृढवैरिभिः। विपरीतं मतं जातं व्यासस्यापि महात्मनः। इत्ये
वं चिंतयामास सुतस्नेहावृता पृथुः। ततः सुप्तजनप्राये दुर्द्दिने मेघसंप्लुते। महत्यथापराह्णे तु घनैः सूर्य
इवावृतः। ब्राह्मणैः प्राविशत्तत्र जिष्णुर्भार्गववेश्म तत्॥ इत्यादिपर्वणि द्रौपदीस्वयंवरे १८२
वैशं॰ गत्वा तु तां भार्गवकर्म्मशालां पार्थौ पृथां प्राप्य महानुभावौ। तां याज्ञसेनीं परमप्रतीतौ भिक्षे
त्यथावेदयतां नराग्र्यौ। कुटीगता सा त्वनवेक्ष्य पुत्रौ प्रोवाच भुंक्तेति समेत्य सर्वे। पश्चाच्च कुंती प्रसमीक्ष्य
कन्यां कष्टं मया भाषितमित्युवाच। साधर्म्मभीता परिचिंतयन्ती तां याज्ञसेनीं परमप्रतीतां। पाणौ गृ
हीत्वोपजगाम कुंती युधिष्ठिरं वाक्यमुवाच चेदम्॥ कुंत्युवाच॥ इयं तु कन्या द्रुपदस्य राज्ञस्त
वानुजाभ्यां मयि सन्निसृष्टा। यथोचितं पुत्र मयापि चोक्तं समेत्य भुंक्तेति नृप प्रमादात्। मया कथं नानृतमु
क्तमद्य भवेत्कुरूणामृषभ प्रवीहि। पंचालराजस्य सुतामधर्म्मो न चोपवर्त्तेत न विभ्रमेच्च॥ वैशं॰ ॥
स एवमुक्तो मतिमान्नृवीरो मात्रा मुहूर्त्तं तु विचिंत्य राजा। कुंतीं समाश्वास्य कुरुप्रवीरो धनंजयं वाक्य

मिदंवभाषे। त्वयाजिताफाल्गुनयाज्ञसेनीत्वयैवशोभिष्यतिराजपुत्री। प्रज्वाल्यतामग्निरमित्रसिंहगृह्
णयाणिंविधिवत्त्वमस्याः॥ अर्जुनउ ॥मामांनरेंद्रत्वमधर्म्मभाजंकृथानधर्म्मोयमशिष्टदृष्टः। भवा
न्निवेश्यःप्रथमंततोयंभीमोमहावाहुरचिंत्यकर्म्मा। अहंततोनकुलोनंतरंमेपश्चादयंसहदेवस्तरस्वी।
वृकोदरोहंचयमौचराजंनियंचकन्याभवतोनियोज्या। एवंगतेयत्करणीयमत्रधर्म्म्यंयशस्यंकुरुतद्विचि
त्य। पंचालराजस्यहितंचयत्स्यात्प्रशाधिसर्वेस्मवशेस्थितास्ते वैशं जिष्णोर्वचनमाज्ञायभक्तिस्ने
हसमन्वितं। दृष्टिंनिवेशयामासुःपांचाल्यांपांडुनंदनाः। दृष्ट्वातेतत्रपश्यन्तींसर्वेकृष्णांयशस्विनीं। संप्रेक्ष्या
न्योन्यमासीनांहृदयैस्तामधारयन्। तेषांतुद्रौपदींदृष्ट्वासर्वेषाममितौजसां। संप्रमथ्येंद्रियग्रामंप्रादुरा
सीन्मनोभवः। काम्यंरूपंहिपांचाल्याविधात्राविहितंस्वयं। वभूवाधिकमन्याभ्यःसर्वभूतमनोहरं। तेषामा
कारभावज्ञःकुंतीपुत्रोयुधिष्ठिरः। द्वैपायनवचःकृत्स्नंसस्मारमनुजर्षभः। अब्रवीत्सहितान्भ्रातॄन्मिथोभे
दभयान्नृपः। सर्वेषांद्रौपदीभार्य्याभविष्यतिहिनःशुभा॥ वैशं ॥भ्रातुर्वचस्तत्प्रसमीक्ष्यसर्वेज्येष्ठ
स्यपांडोस्तनयास्तदानीं। तमेवार्थंध्यायमानामनोभिरामांचक्रुस्त्वथतत्रामितौजसः। वृष्णिप्रवीरस्तुकुरु

प्रवीराना शंसमानः सहरौहिणेयः। अजातशत्रुं परिवार्य तांश्चाप्युपोपविष्टान्ज्वलनप्रकाशान्। ततोऽ
ब्रवीद्वासुदेवोभिगम्य कुंतीसुतं धर्म्मभृतां वरिष्ठं। कृष्णोहमस्मीति निपीड्य पादौ युधिष्ठिरस्याऽजमीढस्य
राज्ञः। तथैव तस्याप्यनु रौहिणेयस्ते चापि हृष्टाः कुरवोभ्यनंदन्। पितृष्वसुश्चापि यदुप्रवीराऽवगृह्य तांभा
रतमुख्यपादौ। अजातशत्रुश्च कुरुप्रवीरः पप्रच्छ कृष्णं कुशलं विलोक्य। कथं वयं वासुदेव त्वयेह गूढा
वसन्तो विदिताश्च सर्वे। तमब्रवीद्वासुदेवः प्रहस्य गूढोप्यग्निर्ज्ञायत एव राजन्। तं विक्रमं पांडवेयानतीत्य को
न्यः कर्त्ता विद्यते मानुषेषु। दिष्ट्या सर्वे पावकाद्विप्रमुक्ता यूयं घोरात्पांडवाः शत्रुसाहाः। दिष्ट्या पापो धृतराष्ट्र
स्य पुत्रः सहामात्यो न सकामो भविष्यत्। भद्रं वोस्तु निहितं यद्गुहायां विवर्धध्वं ज्वलनाइवेधमानाः। नवो वि
दुः पार्थिवाः केचिदेवं यास्यावहे शिबिरायैव तावत्। सोनुज्ञातः पांडवेनाव्ययश्रीः प्रायाच्छीघ्रं बलदेवेन सार्धं
॥ इति महाभारते आदिपर्वणि १८६ वैशं धृष्टद्युम्नस्तु पांचाल्यः पृष्ठतः कुरुनंदनौ।
अन्वगच्छत्तदायान्तौ भार्गवस्य निवेशने। सोज्ञायमानः पुरुषानवधाय समंततः। स्वयमारान्निलीनोभूद्भार्ग
वस्य निवेशने। सायं च भीमस्तु रिपुप्रमाथी जिष्णुर्यमौ चापि महानुभावौ। भैक्षं चरित्वा तु युधिष्ठिराय निवे

आ०प०
२८०

दयांचकारदीनसत्वा ८ ।ततस्तुकुंतीद्रुपदात्मजांतामुवाचकालेवचनंवदान्या।त्वमग्रमादायकुरुष्वभद्रे
वलिंचविप्रायचदेहिभिक्षां।येचान्नमिच्छंतिददस्वतेभ्यःपरिश्रितायेपरितोमनुष्याः।ततश्चशेषंप्रविभ
ज्यशीघ्रमर्द्धंचतुर्द्धाममचात्मनश्च।अर्द्धंचभीमायचदेहिभद्रेयएषनागर्षभतुल्यरूपः।गौरोयुवासंहननो
पपन्नएषोहिवीरोवृकुभुक्सदैव।साहृष्टरूपेवतुराजपुत्रीतस्यावचःसाधुविशंकमाना।यथावदुक्तंप्रच
कारसाध्वीतेचापिसर्वेवुभुजुस्तदन्नं।कुशैस्तुभूमौशयनंचकारमाद्रीसुतःसहदेवस्तरस्वी।यथास्वकीया
न्यजिनानिसर्वेसंस्तीर्यवीराःसुषुपुर्द्धरण्यां।अगस्त्यशास्तामभितोदिशंतुशिरांसितेषांकुरुसत्तमानां।कुंत्या
पुरस्तात्तुवभूवतेषांपादांतरेचाथवभूवकृष्णा।अशेतभूमौसहपांडुपुत्रैःपादोपधानीवकृतानाकुशेषु।नतत्र
दुःखंमनसापितस्यानचावमेनेकुरुपुंगवांस्तान्।तेतत्रशूराःकथयांवभूवुःकथाविचित्राःपृतनाधिका २८०
राः।अस्त्राणिदिव्यानिचैरथांश्चनागांश्चखड्गान्गदाश्चापिपरश्वधांश्च।तेषांकथास्ताःपरिकीर्त्यमानाःपं
चालराजस्यसुतस्तदानीं।शुश्रावकृष्णाचतदानिषण्णा।तेचापिसर्वेददृशुर्मनुष्याः।धृष्टद्युम्नोराजपुत्रस्तु
सर्ववृत्तंचतेषांकथितंचैवरात्रौ।सर्वंचराज्ञेद्रुपदायाखिलेननिवेदयिष्यंस्त्वरितोजगाम।पांचालराजस्तु

विषमन्नरूपस्तान्पांडवानप्रतिविंदमानः।धृष्टद्युम्नंपर्य्यपृच्छन्महात्मा क्वसागताकेननीताचकृष्णा।कच्चि
न्नशूद्रेणनहीनजेनवैश्येनवाकरदेनोपपन्ना:।कच्चित्पदंमूर्ध्निनमेनिविष्टंकच्चिन्नमालापतिताश्मशाने।क
च्चित्सवर्णप्रवरोमनुष्यउद्रिक्तवर्णोप्युतएवकच्चित्।कच्चिन्नवामोममसूर्ध्निपादःकृष्णाभिमर्षेणकृतो
द्यपुत्र।कच्चिच्चवर्षेपरमप्रतीतःसंयुज्यपार्थेननरर्षभेण।वदस्वतत्त्वेनमहानुभावकोसौविजेतादुहितु
र्म्ममाद्य।विचित्रवीर्यस्यसुतस्यकच्चित्कुरुप्रवीरस्यध्रियंतिपुत्राः।कच्चित्तुपार्थेनयवीयसाद्यधनुर्गृही
तंनिहतंचलक्ष्यं॥ इत्यादिपर्वणिसप्ताशीतितमोत्तरशतोध्यायः १८७ वैशं ततस्तथो
क्तःपरिहृष्टरूपःपित्रेशशंसाथसराजपुत्रः।धृष्टद्युम्नःसोमकानांप्रबर्होवृत्तंयथायेनहृताचकृष्णा॥
धृष्टद्युम्नउ योसौयुवास्यायतलोहिताक्षःकृष्णाजिनीदेवसमानरूपः।यःकार्मुकाग्र्यंकृतवानधिज्यं
लक्ष्यंचयःपातितवान्पृथिव्यां।असज्जमानश्चततस्तरस्वीवृतोद्विजाग्र्यैरभिपूज्यमानः।चक्रामवज्रीवदितेः
सुतेषुसर्वैश्चदेवैःऋषिभिश्चजुष्टः।कृष्णाप्रगृह्याजिनमन्वयात्तंनागंयथानागवधूःप्रहृष्टा।अमृष्यमाणे
षुनराधिपेषुक्रुद्धेषुवैतत्रसमापतत्सु।ततोपरःपार्थिवसंघमध्येप्रवृद्धमारुज्यमहीप्ररोहं।प्रकाल्नेव
य

सपार्थिवोघ्रान्कृद्धोऽन्तकः प्राणभृतो यथैव। तौपार्थिवानांमिषतांनरेंद्र कृष्णामुपादाय गतौनराग्र्यौ। वि
भ्राजमानाविव चंद्रसूर्यौ बाह्यंपुराद्भार्गवकर्मशालां। तत्रोपविष्टार्चिरिवानलस्य तेषांजनित्री तिमम
प्रतर्क्कः। तथाविधैरेव नरप्रवीरैरुपोपविष्टैस्त्रिभिरग्निकल्पैः। तस्याःस्ततस्तावभिवाद्यपादौ उक्ता च कृ
ष्णात्वभिवादयेति। स्थितौ च तत्रैव निवेद्य कृष्णां भिक्षाप्रचाराय गतानराग्र्याः। तेषांच भैक्षं प्रतिगृह्य
कृष्णादत्वा बलिं ब्राह्मणसाच्च कृत्वा। तां चैव वृद्धां परिवेश्य तांश्च नरप्रवीरान्स्वयमप्यभुंक्त। सुप्तास्तु
ते पार्थिव सर्व एव कृष्णा च तेषां चरणोपधाने। आशीत्पृथिव्यां शयनंच तेषां। दर्भाजिनाग्र्यास्तरणोप
पन्नं। ते नर्दमाना इव कालमेघाः कथा विचित्राः कथयांबभूवुः। न वैश्यशूद्रौपयिकीः कथास्ता न च
द्विजानां कथयंति वीराः। निःशंसयं क्षत्रियपुंगवास्ते यथाहि युद्धं कथयंति राजन्। आशाहि नोप्यस्त्र
भियं समृद्धामुक्त्वाद्धि पार्थोत्कृष्णेमोभ्नि दाहात। यथाहि लक्ष्यं निहतं धनुश्च सज्यं कृतं तेन तथा प्रसह्य
याचभाषन्निपरस्परं ते छन्नाश्चरंति प्रचरन्ति पार्थाः॥ ततः स राजा द्रुपदः प्रहृष्टः पुरोहितं प्रेषयामास
तेषां। विद्याम युष्मानिति भाषमाणो महात्मानः पांडुसुतास्तु कश्चित्। गृहीतवाक्यो नृपतेः पुरोधा गत्वा

प्रशंसामभिधायतेषां।वाक्यंसमग्रंनृपतेर्यथावदुवाचचानुक्रमविक्रमेण।विज्ञातुमिच्छत्यवनीश्व
रोवःपांचालराजोवरदोवरार्हाः।लक्ष्यस्यवेद्धारमिमंहिदृष्ट्वाहर्षस्यनांतंप्रतिपद्यतेसः।आख्यातच
ज्ञातिकुलानुपूर्वीपदंशिरःसुद्विषतांकुरुध्वं।प्राह्लादयध्वंहृदयंममेदंपंचालराजस्यसानुगस्य।पां
डुर्हिराजाद्रुपदस्यराज्ञःप्रियःसखाचात्मसमोबभूव।तस्यैषकामोदुहिताममेयंस्नुषाप्रदास्यामिहिकौ
रवाय।अयंहिकामोद्रुपदस्यराज्ञोहृदिस्थितोनित्यमनिंदितांगाः।यदर्जुनोवैपृथुदीर्घबाहुर्धर्मेणविंदे
तसुतांममैतां।कृतंहितत्स्यात्सुकृतंममेदंयशश्चपुण्यंचहितंतदेतत्।अथोक्तवाक्यंहिपुरोहितंस्थि
तंततोविनीतंसमुदीक्ष्यराजा।समीपतोभीममिदंशशासप्रदीयतांपाद्यमर्घंतथास्मै।मान्यःपुरोधा
द्रुपदस्यराज्ञस्तस्मैप्रयोज्याभ्यधिकाहिपूजा।भीमस्ततस्तत्कृतवान्नरेंद्रतांचैवपूजांप्रतिगृह्यहर्षात्।
सुखोपविष्टंतुपुरोहितंतदायुधिष्ठिरोब्राह्मणमित्युवाच।पांचालराजेनसुतानिसृष्टास्वधर्मदृष्टेनपथा
नकामात्।प्रदिष्टशुल्काद्रुपदेनराज्ञासानेनवीरेणतथानुवृत्ता।नतत्रवर्णेषुकृताविवक्षानचापिशीले
नकुलेनगोत्रे।कृतेनसज्येनहिकार्मुकेनविद्धेनलक्ष्येणहिविप्रकृष्टा।सेयंतथानेनमहात्मनेहकृष्णा

जितापार्थिवसंघमध्येनेवंगतेसोमकिरध राज्ञासंतापमर्हत्यसुखायकर्त्तुं। कामश्चयोसौद्रुपदस्यरा

आ०प०
२८२

ज्ञःसचापिसंपत्स्यतिपार्थिवस्य।संप्राप्यरूपांहिनरेंद्रकन्यामिमामहंब्राह्मणसाधुमन्ये। नतद्धनुर्मंद
बलेनशक्यंमौर्व्यासमायोजयितुंतथापि। नताकृतास्त्रेणनहीनजेनलक्ष्यंतथापातयितुंहिशक्यं।तस्मा
न्नतापंदुहितुर्निमित्तंपंचालराजोर्हतिकर्त्तुमद्य।नचापितत्पातनमन्यथेहकर्त्तुंचशक्यंभुविमानवेन।
एवंब्रुवत्सेवयुधिष्ठिरेतुपंचालराजस्यसमीपतोन्यः।तत्राजगामाशुनरोद्वितीयोनिवेदयिष्यन्निहसि
द्धमन्नं॥ इत्यादिपर्वणि १८८ दूतउवाच जन्यार्थमन्नंद्रुपदेनराज्ञाविवाहहेतोरुपसंस्कृ

नद१७

तंचा।तदाप्नुवध्वंकृतसर्वकार्य्याः कृष्णाचतत्रैतुचिरंनकार्य्या।इमेरथाःकांचनपद्मचित्राःसदश्वयुक्ताव
सुधाधिपार्हाः।एतान्समारुह्यपरैतसर्वेपांचालराजस्यनिवेशनंतत् वैशं ततःप्रयाताःकुरु

२८२

पुंगवास्तेपुरोहितंतंप्रतियाप्यसर्वे।आस्थाययानानिमहान्तितानिकुन्तीचकृष्णाचसहैकयाने।श्रुत्वा
तुवाक्यानिपुरोहितस्ययान्युक्तवान्भारतधर्मराजः।जिज्ञासयैवाथकुरूत्तमानांद्रव्याण्यनेकान्युपसं
जहारफलानिमाल्यानिसुसंस्कृतानिचर्म्माणिवर्म्माणितथासनानि।गाश्चैवराजन्नथचैवरज्जूर्बीजा

निचान्यानिकृषीन्द्रमित्रां।अन्येषुशिल्पेषुचयानपिस्युःसर्वाणिकृत्यान्यखिलेनतत्र।क्रीडानिमित्ता
न्यपियानितत्रसर्वाणितत्रोपजहारराजा।वर्म्माणिचर्म्माणिचभानुमन्तिखड्गामहान्तोश्चरथाश्चचित्राः।
धनूंषिचाग्र्याणिशराश्चचित्राःशक्त्यृष्टयःकांचनभूषिताश्च।प्रासाभुशुंड्यश्चपरश्वधाश्चसांग्रामिकंचै
वनथेहसर्वं।शय्यासनान्युत्तमवस्तुवंतितथैववासोविविधंचतत्र।कुंतीनुकृष्णांपरिगृह्यसाध्वीमंतःपु
रंद्रुपदस्याविवेश।स्त्रियश्चतांकौरवराजपत्नींप्रसर्ज्जयांचक्रुरदीनसत्वां।तान्सिंहविक्रांतगतीन्निरी
क्ष्यमहर्षभाक्षानजिनोत्तरीयान्।गूढोत्तरांसान्भुजगेंद्रभोगप्रलंबवाहून्पुरुषप्रवीरान्।राजाचरा
ज्ञःसचिवाश्चसर्वेपुत्राश्चराज्ञःसुहृदस्तथैव।प्रेष्याश्चसर्वेनिखिलेनराजन्हर्षंसमापेतुरतीवतत्र।
तेतत्रवीराःपरमासनेषुसपादपीठेष्वविशंकमानाः।यथानुपूर्वंविविशुर्नराग्र्यास्तथामहार्हेषुनवि
स्मयन्तः।उच्चावचंपार्थिवभोजनीयंपात्रीषुजांबूनदराजतीषु।दासाश्चदास्यश्चसुमृष्टवेशाःसंभोज
काश्चाप्युपजह्रुरन्नं।तेतत्रभुक्त्वापुरुषप्रवीरायथात्मकामंसुभृशंप्रतीताः।उत्क्रम्यसर्वाणिवसूनिरा
जन्सांग्रामिकंप्राविविशुर्नृवीराः।तल्लक्षयित्वाद्रुपदस्यपुत्रोराजाचसर्वैःसहमंत्रिमुख्यैः।समर्थया

मासनुपेत्यहृष्टःकुंतीसुतान्पार्थिवराजपुत्रान्॥ इत्यादिपर्वणि १८९ वैशं ततआहूय
पांचाल्योराजपुत्रंयुधिष्ठिरं।परिग्रहेणब्राह्मेणपरिगृह्यमहाद्युतिः।पर्यपृच्छददीनात्माकुंतीपुत्रंसुव
र्चसं।कथंजानीमभवतःक्षत्रियान्ब्राह्मणानुत।वैश्यान्वागुणसंपन्नानथवाशूद्रयोनिजान्।मायामा
स्थायमाविप्राःचरन्तःसर्वतोदिशं।कृष्णाहेतोरनुप्राप्ताःदेवाःसंदर्शनार्थिनः।ब्रवीतुनोभवान्सत्यंसंदे
होह्यत्रनोमहान्।अपिनःसंशयस्यान्तेमनःसंतुष्टिमावहेत्।अपिनोभागधेयानिशुभानिस्युःपरंतप।
इच्छयाब्रूहितत्सत्यंसत्यंराजसुशोभने।इष्टापूर्तेनचतथावक्तव्यमनृतंनतु।श्रुत्वाह्यमरसंकाशतववा
क्यमरिंदम।ध्रुवंविवाहकरणमास्थास्यामिविधानतः॥ युधिष्ठिरउ ॥माराजन्विमनाभूस्त्वंपां
चाल्यप्रीतिरस्तुते।ईप्सितस्तेध्रुवःकामःसंवृत्तोयमसंशयं।वयंहिक्षत्रियाराजन्पांडोःपुत्रामहात्मनः
ज्येष्ठंमांविद्धिकौंतेयंभीमसेनार्जुनौविमौ।आभ्यांतवसुताराजन्निर्जिताराजसंसदि।यमौचतत्रकुंतीच
यत्रकृष्णाव्यवस्थिता।व्येतुतेमानसंदुःखंक्षत्रियाःस्मोनरर्षभ।पद्मिनीवसुतेयंतेह्रदादन्यह्रदंगता।इ
तितथ्यंमहाराजसर्वमेतद्ब्रवीमिते।भवान्हिगुरुरस्माकंपरमंचपरायणं॥ वैशं ततःसद्रुपदो

राज्ञाहर्षमाकुललोचनः।प्रतिवक्तुंमुदायुक्तोनाशाकत्तंयुधिष्ठिरं।यत्नेनतुसतंहर्षंसन्निगृह्यपरंतपः।
अनुरूपंतदावाचाप्रत्युवाचयुधिष्ठिरं।पप्रछचैनंधर्मात्मायथातेप्रद्रुताःपुरात्।सतस्मैसर्वमाचख्यावा
नुपूर्व्वेणपांडवः।तच्छ्रुत्वाद्रुपदोराजाकुंतीपुत्रस्यभाषितं।विगर्हयामासतदाधृतराष्ट्रंनरेश्वरं।आश्वा
सयामासचतंकुंतीपुत्रंयुधिष्ठिरं।प्रतिजज्ञेचराज्यायद्रुपदोवदतांवरः।ततःकुंतीचकृष्णाचभीमसे
नार्जुनावपि।यमौचराज्ञासंदिष्टौविविशुर्भवनंमहत्।तत्रतेन्यवसन्राजन्यज्ञसेनेनपूजिताः।प्रत्याश्व
स्तःततोराजासहपुत्रैरुवाचतं।गृह्णातुविधिवत्पाणिमद्यायंकुरुनंदनः।पुण्येहनिमहाबाहुरर्जुनः
कुरुतांक्षणं॥ वैशं ॥तमब्रवीत्ततोराजाधर्म्मात्माचयुधिष्ठिरः।ममापिदारसंबंधःकार्य्यस्तावद्
द्विशांपते॥ द्रुपद उ ॥भवान्वाविधिवत्पाणिंगृह्णातुदुहितुर्मम।यस्यवामन्यसेवीरतस्यकृष्णामुप
दिश युधिष्ठिर उ सर्व्वेषांमहिषीराजन्द्रौपदीनोभविष्यति।एवंहिव्याहृतंपूर्वंममामात्राविशांप
ते।अहंचाप्यनिविष्टोवैभीमसेनश्चपांडवः।पार्थेनविजिताचैषारत्नभूतासुतातव।एषनःसमयोराजन्नत्र
स्यसहभोजनं।नचतंहातुमिच्छामःसमयंराजसत्तम।सर्व्वेषांधर्म्मतःकृष्णामहिषीनोभविष्यति।आनु

पूर्व्वेणसर्व्वेषांगृह्णातुज्वलनेकरान्॥ द्रुपद उ ॥एकस्यबह्व्योविहितामहिष्यःकुरुनंदनः।नैक
स्याबहवःपुंसःश्रूयंतेपतयःक्वचित्।लोकवेदविरुद्धंत्वंनाधर्म्मंधर्म्मविच्छुचिः।कर्त्तुमर्हसिकौंतेयक
स्मात्तेबुद्धिरीदृशी॥ युधिष्ठिर उ ॥सूक्ष्मोधर्म्मोमहाराजनास्यविद्मोवयंगतिं।पूर्वेषामानुपूर्व्वेण
यातंवर्त्मानुयामहे।नमेवागनृतंप्राहनाधर्मेधीयतेमतिः।एवंचैववदत्यम्बाममचैतन्मनोगतं।एषध
र्म्मोध्रुवोराजंश्चरैनमविचारयन्।माचशंकातत्रतेस्यात्कथंचिदपिपार्थिव द्रुपद उवाच ॥
त्वंचकुंतीचकौंतेयधृष्टद्युम्नश्चमेसुतः।कथयंत्वितिकर्त्तव्यंश्वःकालेकरवामहे वैशम् ॥
तेसमेत्यततःसर्वेकथयंतिस्मभारत।अथद्वैपायनोराजन्नभ्यागच्छद्यदृच्छया इत्यादिपर्व्वणि॥
१९० वैशं ततस्तेपांडवास्सर्वेपांचाल्यश्चमहायशाः।प्रत्युत्थायमहात्मानंकृष्णंसर्वेभ्यवादय
न्।प्रतिनंद्यसतांपूजांपृष्ट्वाकुशलमंततः।आसनेकांचनेशुद्धेनिषसादमहामनाः।अनुज्ञातास्तुते
सर्वेकृष्णेनामिततेजसा।आसनेषुमहार्हेषुनिषेदुर्द्विपदांवराः।ततोमुहूर्त्तान्मधुरांवाणीमुच्चार्य
पार्षतः।पप्रच्छतंमहात्मानंद्रौपद्यार्थेविशांपते।कथमेकाबहूनांस्याद्धर्म्मपत्नीनशंकरः।एतन्मेभ

गवान्सर्व्वं प्रब्रवीतु यथातथं व्यास उ अस्मिन्धर्म्मे विप्रलब्धे लोकवेदविरोधके । यस्य यस्य म
तं यद्यच्छ्रोतुमिच्छामि तस्य तत ॥ द्रुपद उ अधर्म्मोयं मम मतो विरुद्धो लोकवेदयोः । नह्येका विद्य
ते पत्नी बहूनां द्विजसत्तम । न चाप्याचरितः पूर्व्वैरयं धर्म्मो महात्मभिः । न चाप्यधर्म्मो विद्वद्भिश्चरितव्यः
कथंचन । ततो नाहं करोम्येनं व्यवसायं क्रियां प्रति । धर्म्मः सदैव संदिग्धः प्रतिभाति हि मे त्वयं धृष्ट
द्युम्न उ यवीयसः कथं भार्य्यां ज्येष्ठो भ्राता द्विजर्षभ । ब्रह्मन्समभिवर्त्तेत सद्वृत्तः संस्तपोधन । न तु
धर्म्मस्य सूक्ष्मत्वाद्गतिं विद्मः कथंचन । अधर्म्मो धर्म्म इति वा व्यवसायो न शक्यते । कर्त्तुमस्मद्विधैर्ब्रह्मं
स्ततो यं न व्यवस्यतिं । पंचानां महिषी कृष्णा भवत्विति कथंचन युधिष्ठिर उ न मे वागनृतं प्राह ना
धर्म्मे धीयते मतिः । वर्त्तते हि मनो मेत्र नैषोऽधर्म्मः कथंचन । श्रूयते हि पुराणेपि जटिला नाम गौतमी ।
ऋषीनध्यासितवती सप्त धर्म्मभृतां वर । गुरोर्हि वचनं प्राहुर्धर्म्म्यं धर्म्मज्ञसत्तम । गुरूणां चैव सर्व्वेषां मा
ता परमको गुरुः । सा चाप्युक्तवती वाचं भैक्ष्यवद्भुज्यतामिति । तस्मादेतदहं मन्ये परं धर्म्मं द्विजोत्तम ॥
कुंत्युवाच एवमेतद्यथा प्राह धर्म्मचारी युधिष्ठिरः । अनृतान्मे भयं तीव्रं मुच्येहमनृतात्कथं ॥ ॥

आ०प०
२८५

अनृतान्मोक्षसे भद्रे धर्मश्चैष सनातनः। न तु वक्ष्यामि सर्वेषां पांचाल शृणु मे स्वयं। यथायं विहितो धर्मो यतश्चापि सनातनः। यथा च प्राह कौंतेय
स्तथा धर्मो न संशयः वैशं ततउत्थाय भगवान्व्यासो द्वैपायनः प्रभुः। करे गृहीत्वा राजानं राजवेश्म समाविशत्। पांडवाश्चापि कुंती च धृष्ट
द्युम्नश्च पार्षतः। विविशुर्यत्र तत्रैव प्रतीक्षंते स्म तावुभौ। ततो द्वैपायनस्तस्मै नरेंद्राय महात्मने। आचख्यौ तद्यथा धर्मो बहूनामेकपत्निता॥ ॥
व्यासउ × पुरा वै नैमिषारण्ये देवाः सत्रमुपासते। तत्र वैवस्वतो राजञ्शामित्रमकरोत्तदा। ततो यमो दीक्षि
तस्तत्र राजन्नामारयत्किंचिदपि प्रजानां। ततः प्रजास्ता बहुला बभूवुः कालातिपातान्मरणप्रहीणाः। सोमश्च
शक्रो वरुणः कुबेरः साध्या रुद्रा वसवोथाश्विनौ च। प्रजापतिर्भुवनस्य यः प्रणेता समाजग्मुस्तत्र देवास्तथा
न्ये। ततो ब्रुवंल्लोकगुरुं समेता भयात्तीव्रान्मानुषाणां विवृद्ध्या। तस्माद्भयादुद्विजंतः सुखेप्सवः प्रयाम स
र्वे शरणं भवंतं पितामहउ किं वो भयं मानुषेभ्यो यूयं सर्वे यदामराः। मा वो मर्त्यसकाशाद्धि भयं
भवितुमर्हति देवाऊचुः मर्त्या अमर्त्याः संवृत्ता न विशेषोस्ति कश्चन। अविशेषादुद्विजंतो विशेषा
र्थमिहागताः भगवानुवाच वैवस्वतो व्यापृतः सत्रहेतोस्तेन त्विमे न म्रियंते मनुष्याः। तस्मिन्नेकाग्ये
कृतसर्वकार्ये तत एषां भवितैवांतकालः। वैवस्वतस्यैव तनुर्विभूषिता वीर्येण युष्माकमुत प्रवृद्धा। सै
षामंतो भविता ह्यंतकाले न तत्र वीर्यं भविता नरेषु व्यासउ ततस्तु ते पूर्वजदेववाक्यं श्रुत्वा देवा य
त्र देवा यजंते। समासीनास्ते समेता महाबला भागीरथ्यां ददृशुः पुंडरीकं। दृष्ट्वा च तद्विस्मितास्ते बभूवुस्तेषा
मिंद्रस्तत्र शूरो जगाम। सोपश्यद्योषामथ पावकप्रभां यत्र देवी गंगा सततं प्रसूता। सा तत्र योषा रुदती ज

इत्यादिपर्वणि २८ ॥ व्यासउ ॥

२८५

त

लार्थिनीगंगांदेवींव्यवगाह्यव्यतिष्ठत।तस्याश्रुबिंदुःपतितोजलेयस्तत्पद्ममासीदथतत्रकांचनं।तदद्भुतंप्रेक्ष
वज्रीस्तदानीमपृछत्तांयोषितमंतिकाद्वै।कात्वंभद्रेरोदिषिकस्यहेतोर्वाक्यंतथ्यंकामयेहंब्रवीहि स्त्र्युवा
च त्वंवेत्स्यसेमामिहयास्मिशक्रयदर्थंचाहंरोदिमिमंदभाग्या।आगछराजन्नग्रतोगमिष्येद्रष्टासितद्रोदि
मियत्कृतेहं मासत तांगछंतीमन्वगछत्तदानींसोपश्यदारात्तरुणंदर्शनीयं।सिंहासनस्थंयुवती
सहायंक्रीडंतमक्षैर्गिरिराजमूर्द्धि।तमब्रवीद्देवराजोममेदंत्वंविद्धिविश्वंभुवनंवशेस्थितं।ईशोहमस्मीति
समन्युरब्रवीद्दृष्ट्वातमक्षैःसुभृशंप्रमत्तं।क्रुद्धंचशक्रंप्रसमीक्ष्यदेवोजहासशक्रंचशनैरुदैक्षत।संस्तंभि
तोभूदथदेवराजस्तेनेक्षितःस्थाणुरिवावतस्थे।यदातुपर्याप्तमिहास्यक्रीडयातदादेवींरुदतींतामुवाच।
आनीयतामेषयतोहमारान्मैनंदर्पःपुनरप्याविशेत।ततःशक्रःस्पृष्टमात्रस्तयातुस्रस्तैरंगैःपतितोभूद्ध
रिण्यां।तमब्रवीद्भगवानुग्रतेजामैवंपुनःशक्रकृथाःकथंचित्।विवर्त्तयैनंचमहाद्रिराजंबलंचवीर्यंचतवा
प्रमेयं।छिद्रस्यचैवाविशमध्यमस्ययत्रासतेत्वद्विधाःसूर्यभासः।सतद्विवृत्यविवरंमहागिरेस्तुल्यद्युतींश्च
तुरोन्यान्ददर्श।सतानभिप्रेक्ष्यबभूवदुःखितःकच्चिन्नाहंभवितावैयथेमे।ततोदेवोगिरिशोवज्रपाणिंवि

विहृत्तनेत्रे कुपितो भुवाचा दरीमेतां प्रविश त्वं शतक्रतो यन्मां वात्स्यादवमंस्थाः पुरस्तात्। उक्तस्त्वेवं विभुना दे
वराजः प्रावेपतान्नौभृशमेवाभिषंगात्। स्त्रस्तैरंगैरनिलेनेव नुन्नमश्वत्थपत्त्रं गिरिराजमूर्द्धि। स प्रांजलिर्वैद्ध
षवाहनेन प्रवेपमानः सहसैवमुक्तः। उवाच देवं वकुत्त्यमुग्रं दृष्टाशेषस्य भुवनस्य त्वं भवाद्य। न मद्बुवी
दुग्रवज्री ष्प्रहस्यनैवं शीलाः शेषमिहाप्नुवंति। एतेप्येवं भवितारः पुरस्तात्तस्मादेतां दरीमाविश्य शेष।
तत्र ह्येवं भवितारो न संशयो योनिं सर्वे मानुषीमाविशध्वं। तत्र यूयं कर्म्म कृत्वा विषह्यं वहून्न्यानिधनं
प्रापयित्वा। आगन्तारः पुनरेवेंद्रलोकं स्वकर्म्मणा पूर्वजितं महार्हं। सर्वं मया भाषितमेतदेवं कर्त्तव्य
मन्यद्विविधार्थयुक्तं पूर्वेंद्रा ऊचुः गमिष्यामो मानुषं देवलोकात् दुराधरो विहितो यत्र मोक्षः
देवास्त्वस्मानादधीरन्नूजनन्यां धर्म्मो वायुर्मघवानश्विनौ च। अस्त्रैर्दिव्यैर्मानुषान्योधयित्वा आगन्तारः
पुनरेवेंद्रलोकं व्यास उ एतच्छ्रुत्वा वज्रपाणिर्वचस्तु देवश्रेष्ठं पुनरेवेदमाह। वीर्य्येणाहं पुरुषं
कार्य्यहेतोर्दद्यामेषां पंचमं मत्प्रसूतं। विश्वभुग्भूतधामा च शिविरिंद्रः प्रतापवान्। शान्तिश्चतुर्थस्तेषां
वै तेजस्वी पंचमः स्मृतः। तेषां कामं भगवानुग्रधन्वा प्रादादिष्टं सन्निसर्गाद्यथोक्तं। तां चाप्येषां योषितं लो

ककान्तांश्रियंभार्य्यामदधान्मानुषेषु।मैरेवसार्द्धंतुततःसदेवोजगाम नारायणमप्रमेयं।अनंतमव्यक्त
मजंपुराणंसनातनंविश्वमनन्तरूपं।सचापितत्र्यदधात्सर्वमेवततःसर्वेसंवभूवुर्द्धरण्यां।सचापिकेशौ
हरिरुद्ववर्हशुक्लमेकमपरंचापिकृष्णं।तौचापिकेशौनिविशेतांयदूनांकुलेस्त्रियौदेवकींरोहिणींच।
तयोरेकोवलदेवोवभूवयोसौश्वेतस्तस्यदेवस्यकेशः।कृष्णोद्वितीयःकेशवःसंवभूवकेशोयोसौवर्ण
तःकृष्णउक्तः।येतेपूर्वंशक्ररूपानिरुद्धास्तस्यांदर्य्यांपर्वतस्योत्तरस्य।इहैवतेपांडवावीर्य्यवंतःशक्रस्यां
शःपांडवःसव्यसाची।एवमेतेपांडवाःसंवभूवुर्येतेराजन्पूर्वमिंद्रावभूवुः।लक्ष्मीश्चैषांपूर्वमेवोप[illegible]र
दिष्टाभार्य्यायैषाद्रौपदीदिव्यरूपा।कथंहिस्त्रीकर्म्मणोन्तेमहीतलात्समुत्तिष्ठेदन्यतोदैवयोगात्।
यस्यारूपंसोमसूर्य्यप्रकाशंगंधश्चाग्र्यःक्रोशमात्रात्प्रवाति।इदंचान्यत्प्रीतिपूर्वंनरेंद्रददानितेदिव्य
मत्यद्भुतंच।दिव्यंचक्षुःपश्यकुंतीसुतांस्त्वंपुण्यैर्दिव्यैःपूर्वदेहैरुपेतान्॥ वैशम् ॥ततोव्यासःपर
मोदारकर्म्माशुचिर्विप्रस्तपसातस्यराज्ञः।चक्षुर्दिव्यंप्रददौतांश्चसर्वान्राजापश्यत्पूर्वदेहैर्यथावत्।त
तोदिव्यान्हेमकिरीटमालिनःशक्रप्रमुखान्पावकादित्यवर्णान्।वद्धापीडांश्चारुरूपांश्चयूनोव्यूढोर

स्कांस्तालमात्रानूददर्श। दिव्यैर्वस्त्रैररजोभिः सुगंधैर्माल्यैश्चाग्र्यैः शोभमानानतीव। सा ह्याश्चर्यं दृष्ट्वाव
संश्चापि रुद्रानादित्यांश्चा सर्वगुणोपपन्नान्। तान्पूर्वेंद्रानभिवीक्ष्याभिरूपांश्च कार्त्मजं चेंद्ररूपं निशाम्य।
प्रीतो राजा द्रुपदो विस्मितश्च दिव्यां मायां तामवेक्ष्याप्रमेयां। तां चैवाग्र्यां स्त्रियमभिरूपयुक्तां दिव्यां सा
क्षात्सोमवह्निप्रकाशां। योग्यां तेषां रूपतेजोयशोभिः पत्नीं मत्वा हृष्टवान्पार्थिवेंद्रः। स तद्दृष्ट्वा महदा
श्चर्यरूपं जग्राह पादौ सत्यवत्याः सुतस्य। नैतच्चित्रं परमर्षे त्वयीति प्रसन्नचेताः स उवाच चैनं॥ ॥
व्यासउ आसीत्तपोवने काचिदृषेः कन्या महात्मनः। नाध्यगच्छत्पतिं सा तु कन्या रूपवती सती। तो
षयामास तपसा सा किलोग्रेण शंकरं। तामुवाचेश्वरः प्रीतो वृणु काममिति स्वयं। सैवमुक्ताब्रवीत्क
न्या देवं वरदमीश्वरं। पतिं सर्वगुणोपेतमिच्छामीति पुनः पुनः। ददौ तस्मै स देवेशस्तं वरं प्रीतमानसः।
पंच ते पतयो भद्रे भविष्यंतीति शंकरः। सा प्रसादयती देवमिदं भूयोऽभ्यभाषत। एकं पतिं गुणोपेतं त्व
त्तोऽर्हामीति शंकर। तां देवदेवः प्रीतात्मा पुनः प्राह शुभं वचः। पंचकृत्वस्त्वयोक्तोऽहं पतिं देहीति वै पुनः॥
तत्तथा भविता भद्रे वचस्तद्भद्रमस्तु ते। देहमन्यं गतायास्ते सर्वमेतद्भविष्यति व्यासउ द्रुपदे

बाहिसायज्ञसुतावैदेवरूपिणी।पंचानांविहितापत्नीकृष्णापार्षत्यनिंदिता।स्वर्गश्रीःपांडवार्थंतुस
मुत्पन्नामहामखे।सेहतप्त्वातपोघोरंदुहितृत्वंतवागता।सैषादेवीरुचिरादेवजुष्टापंचानामेकासुकृ
तेनेहकर्मणा।सृष्टास्वयंदेवपत्नीस्वयंभुवाश्रुत्वाराजन्द्रुपदेष्टंकुरुष्व   इत्यादिपर्वणि १९८
॥ द्रुपदउ ॥अश्रुत्वैवंवचनंतेमहर्षेमयापूर्वंयतितंसंविधातुं।नवैशक्यंविहितस्यापयानंतदेवेद
मुपपन्नंविधानं।दिष्टस्यग्रंथिरनिवर्त्तनीयःस्वकर्म्मणाविहितंनेहकिंचित्।कृतंनिमित्तंहिवरैकहेतो
स्तदेवेदमुपपन्नंविधानं।यथैवकृष्णोक्तवतीपुरस्तान्नैकान्पतीन्मेभगवान्ददातु।सचाप्येवंवरमित्य
ब्रवीत्तांदेवोहिवेत्तापरमंयदत्र।यदि चैवंविहितःशंकरेणधर्मोधर्मोवानात्रममापराधः।गृह्णंत्वि
मेविधिवत्पाणिमस्यायथोपयोषंविहितैषांहिकृष्णा   वैशं   ततोब्रवीद्भगवान्धर्म्मराजमद्यैव
पुण्याहमुतवःपांडवेयाः।अद्यपौष्यंयोगमुपैतिचंद्रमाःपाणिंकृष्णायास्त्वंगृहाणाद्यपूर्वं।ततोराजायज्ञ
सेनःसपुत्रोजन्यार्थयुक्तंबहुतंतदग्र्यं।समानयामाससुतांचकृष्णामाप्लाव्यरत्नैर्बहुभिर्विभूष्य।ततस्तुस
र्वेसुहृदोनृपस्यसमाजग्मुःसहितामंत्रिणश्च।द्रष्टुंविवाहंपरमप्रतीताद्विजाश्चपौराश्चयथाप्रधानाः॥

ततोस्यवेश्माग्र्यजनोपशोभितंविस्तीर्णपद्मोत्पलभूषिताजिरं।वलौघरत्नौघविचित्रमावभौनभो
यथानिर्मलतारकाचितं।ततस्तुतेकौरवराजपुत्राविभूषिताःकुंडलिनोयुवानः।महार्हवस्त्रावरचंदनो
क्षिताःकृताभिषेकाःकृतमंगलक्रियाः।पुरोहितेनाग्निसमानवर्चसासहैवधौम्येनयथाविधिप्रभो।
क्रमेणसर्वेविविशुस्ततःसदोमहर्षभागोष्ठयथाभिनर्दिनः।ततःसमाधायसवेदपारगोजुहावमंत्रैः
ज्वलितंहुताशनं।युधिष्ठिरंचाप्युपनीयमंत्रविन्नियोजयामाससहैवकृष्णया।प्रदक्षिणंतौप्रगृही
तपाणीपरीणयामाससवेदपारगः।ततोभ्यनुज्ञायतमाजिशोभिनंपुरोहितोराजगृहाद्विनिर्ययौ।
क्रमेणचानेननराधिपात्मजावरस्त्रियास्तेजगृहुस्तदाकरं।अहन्यहन्युत्तमरूपधारिणोमहारथाःकौ
रववंशवर्द्धनाः।इदंचतत्राद्भुतरूपमुत्तमंजगाददेवर्षिरतीवमुत्तैंमानुषं।महानुभावाकिलसासुम
ध्यमावभूवकन्यैवगतेगतेहनि।कृतेविवाहेद्रुपदोधनंददौमहारथेभ्योवहुरूपमुत्तमं।शतंरथानांव
रहेममालिनीचतुर्युजांहेमखलीनमालिनां।शतंगजानामपिपद्मिनांतथाशतंगिरीणामिवहेमशृंगि
णां।तथैवदासीशतमग्र्ययौवनंमहार्हवेषाभरणांवरस्रजं।पृथक्पृथग्दिव्यदृशांपुनर्ददौतथा

रग्निसाक्षिकं।तथैव वस्त्राणि विभूषणानि प्रभावयुक्तानि महानुभावः।कृते विवाहे तु ततस्तु पांडवाः प्र
भूतरत्नामुपलभ्य तां श्रियं।[blot]जह्रुरिंद्रःप्रतिमा महाबलाः पुरे तु पांचालनृपस्य तस्य ह   इत्यादिपर्व
णि ९२ वैशं पांडवैः सह संयोगं गतस्य द्रुपदस्य ह।न बभूव भयं किंचिद्देवेभ्योपि कथंचन।
कुंतीमासाद्य ता नार्यो द्रुपदस्य महात्मनः।नाम संकीर्त्तयंत्यो स्याजग्मुः पादौ स्वमूर्द्धभिः।कृष्णा च क्षौ
मसंवीता कृतकौतुकमंगला।कृताभिवादना श्वश्र्वास्तस्थौ प्रह्वा कृतांजलिः।रूपलक्षणसंपन्नां शीलाचा
रसमन्वितां।द्रौपदीमवदत्प्रेम्णा पृथाशीर्वचनं स्नुषां।यथेंद्राणी हरिहये स्वाहा चैव विभावसौ।रोहिणी
च यथा सोमे दमयंती यथा नले।यथा वैश्रवणे भद्रा वसिष्ठे चाप्यरुंधती।यथा नारायणे लक्ष्मीस्तथा त्वं
भव भर्तृषु।जीवसूर्वीरसूर्भद्रे बहुसौख्यसमन्विता।सुभगा भोगसंपन्ना यज्ञपत्नी पतिव्रता।अतिथीना
गतान्साधून्वृद्धान्बालांस्तथा गुरून्।पूजयंत्या यथान्यायं शश्वद्गच्छंतु ते समाः।कुरुजांगलमुख्येषु रा
ष्ट्रेषु नगरेषु च।अत्र त्वमभिषिच्यस्व नृपतिं धर्म्मवत्सलाः।पतिभिर्निर्जितामुर्वी विक्रमेण महाबलैः।कु
रुब्राह्मणसान्सर्वामश्वमेधे महाक्रतौ।पृथिव्यां यानि रत्नानि गुणवंति गुणान्विते।तान्याप्नुहि त्वं कल्या

आ०प०
२८९

णि सुखिनी शरदां शतम्। यथा च त्वाभिनंदामि वध्वद्य क्षौमसंवृतां। तथा भूयोभिनंदिष्ये जातपुत्रान्गुण
न्वितान्॥ वैशं॰ ततस्तु कृतदारेभ्यः पांडुभ्यः प्राहिणोद्धरिः। वैडूर्य्यमणिचित्राणि हेमान्याभरणानि
च। वासांसि च महार्हाणि नानादेश्यानि माधव। कंबलाजिनरत्नानि स्पर्शवंति शुभानि च। शयनासनया
नानि विविधानि महांति च। वैडूर्यवज्रचित्राणि शतशो भाजनानि च। रूपयौवनदाक्षिण्यैरुपेताश्च स्वलंकृ
ताः। प्रेष्याः संप्रददौ कृष्णो नानादेश्याः सहस्रशः। गजान्विनीतान्भद्रांश्च सदश्वांश्च स्वलंकृतान्। रथां
श्च दांतान्सौवर्णैः शुभ्रैः पट्टैरलंकृतान्। कोटिशश्च सुवर्णं च तेषामकृतकं तथा। वीथीकृतममेयात्मा
प्राहिणोन्मधुसूदनः। तत्सर्वं प्रतिजग्राह धर्मराजो युधिष्ठिरः। मुदा परमया युक्तो गोविंदप्रियकाम्य
या॥ इत्यादिपर्वणि वैशं॰ ततो राज्ञश्चरै राप्तैः प्रवृत्तिरुपनीयत। पांडवैरुपसंपन्ना द्रौ
पदी पतिभिः शुभा। येन तद्धनुरायम्य लक्ष्यं विद्धं महात्मना। सोऽर्जुनो जयतां श्रेष्ठो महाबाणधनुर्द्धरः॥
यः शल्यं मद्रराजं वै प्रोत्क्षिप्यापातयद्बली। त्रासयामास संक्रुद्धो वृक्षेण पुरुषान्रणे। न चास्य संभ्रमः क
श्चिदासीत्तत्र महात्मनः। स भीमो भीमसंस्पर्शः शत्रुसेनांगपातनः। ब्रह्मरूपधरांछ्रुत्वा प्रशांतान्पांडुनंद

२०९